No. ४४०२

Title पारस्कर गृह्यसूत्र व्याख्यान प्राणिका प्रयोग पद्धति

Author श्री हरिहर: अग्निहोत्री

Extent २०६ Age १६६२

Subject सूत्र पद्धति परिशिष्ट

पारस्करगृह्यसूत्रव्याख्यानपूर्विका प्रयोगपद्धतिः

४४०५

पद्धति बस्ता १

6605

र्ग्या २ सूत्र ५ = तत्र परिसमुह्य त्रिभिर्दर्भैः लिख्यतेऽभ्यवोदकेनावद्या

नमः शिवाय॥ ॥ इष्टाष्टहोत्रक्रियासिद्धिहेतुं यत्नमुनीमुखं। श्रुतित्रयीचयासारं वंदे नागाधिदैवतं। पारस्करानुकृतेगृह्यसूत्रे व्याख्यानपद्धतिं कां। प्रयोगपद्धतिं कुर्वे वासुदेवादिसम्मतां॥ अथातो गृह्यस्थालीपाकानां कर्म। अथ श्रौतकर्मविधानानन्तरं। यतः श्रौतानि कर्माणि विहितानि स्मार्त्तानि विधेयानि। अतो हेतोः गृह्ये आवसथ्येऽग्नौ ये स्थालीपाकाः गृह्यस्थालीपाकास्तेषां गृह्यस्थालीपाकानां कर्म क्रिया अनुष्ठानमिति यावत्। व्याख्यास्यत इति शेषः॥ तत्रादावाधानादि सर्वकर्मणां साधारणो विधिः॥ प्रथमकंडिकायोच्यते। तत्र गार्ह्यावसथ्याधानादिषु सर्वकर्मसु यजमान एव कर्त्ता नान्यः स्वत्विक् तस्यानुक्तत्वात्। अथ यजमानं सुस्नातः प्रक्षालितपाणिपादः स्वाचांतः कर्मस्थानमागत्य वरणादि यज्ञियवृक्षोद्भवासने प्रागग्रानुदगग्रांश्चात्रीन्कुशान्दत्वा प्राङ्मुख उपविश्य वाग्यतः॥ शुद्धायां भूमौ सप्तविंशत्यंगुलं मंडलं ... लिख्यं। प्रागग्रा उदक् सं

सू ३

ज्ञानाति२ सूत्रे३त्रे३

प्र३ कृ२

यत्र क्वचिद्धोमः। एषः परिसमूहनादिपर्युक्षणपर्यन्तो विधिरेव न मंत्राः। क्व। यत्र क्वचित्लौकि-
स्मार्त्ते वाग्नौ होमस्तत्र वेदितव्याः॥ आवसथ्याधानं दारकाले। आवसथ्याग्निसाध्यानि कर्म्म-
व्याख्यातुं ग्रानातितातीति प्रथमं सूत्रकृता पारस्करेण यतो ऽतस्तस्याधानविधिं व्याख्यातु-
क्रमते। आवसथ्यस्य गृह्यस्य अग्नेराधानमावसथ्याधानं तद्दारकाले विवाहकाले वतुर्थी-
र्म्मानन्तरं कुर्यात्। प्रश्नतु थीकर्म्मणः पत्न्या भार्यीत्वस्यानुत्पत्तेः सभार्य्यस्य च आधाने ऽधि-
। वैवाहिकोग्निरेवोपासनाग्निरित्याश्वलायनादीनां पक्षः। तेहि विवाहहोममेव दाराग्न्योगु-
रकं मन्यन्ते। अस्माकं तु आवसथ्याधानं दारकाल इत्यारभ्याग्निसंस्कारस्य पारस्कराचार्येण ऽ
धीतत्वात् तत्संस्कारसंस्कृतोग्निरौपासनः ४। दायाद्यकाले एकेषां। एकेषामाचार्याणां मते दाया-
द्याणां पितृधनविभागकाले अविभक्तोहि पित्र्ये धने सर्वेषां भ्रातॄणां स्वत्वस्य साधारणत्वेनावि-
नहेत्वात् धनविनियोगासाध्यं हि आवसथ्यादिकर्म्मानुष्ठानं। अतो भ्रातृमतो विभक्तानां ३

ना३ घौ२

४॥

धिकारः इति तेषामभिप्रायः। अभ्रातकस्य दारकाले। एवं व्यवस्थितो विकल्पः। एवं कृते विवा
मन्ते धनस्य आधाने अधिकारमभिधाय इदानीं आहरणपक्षे आधानमाह। वैश्यस्य बहुपशो
दग्निमाहृत्य चातुष्प्राश्यपचनवत्संधौ तत्रावसथ्याधानं करिष्यन् उक्ते कालातिक्रमो भावे
शास्त्रोदितअग्न्याधानार्थोपदिष्टमासर्तुतिथिनक्षत्रवारादिके काले प्रातः सुस्नातः सुप्रः
पाणिपादः स्वाचान्तः सपत्नीकः गोमयोपलिप्ते शुचौ देशे स्वासने उपविश्य अद्येहेत्यादि देश
लोऽस्मत्‌ आवसथ्याग्निमहमाधास्ये इति संकल्पं विधाय मातृपूजापूर्वकं आभ्युदयिकं श्राद्

धि३ धं तत्कुर्यात्। कालातिक्रमे तु यावंत्यब्दान्यतीतानि निरग्नेर्द्विजन्मनः। तावंति कृच्छ्राणि चरेद्धोम
दद्याद्यथाविधि इति वचनात्। अतिक्रान्तसंवत्सरसंख्यप्राजापत्यरूपं प्रायश्चित्तं मुख्याविधिना च
रित्वा दैवतदशक्तौ। प्रतिप्राजापत्यं गां दत्वा तदलाभे तन्मूल्यं निष्कमेकं अर्द्धं तदर्द्धं वा द्वादशब्राह्मण
भोजनमयुतगायत्रीजपं वा गायत्र्या तिलाज्यसद्रव्यहोमं वा ... पे द्रव्याऽन्यतमं विधाय होमं सा

यं प्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपर्याप्तं अतिक्रान्तदिवसानां गणयित्वा ब्राह्मणेभ्यो दद्य
प्रशंसावाक्यं गृहस्थकाण्डे। नावसथ्यात्परो धर्म्मो नावसथ्यात्परं तपः। नावसथ्यात्परं दानं न
सथ्यात्परं धनं। नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः। नावसथ्यात्परा सिद्धिर्नावसथ्
रामतिः। नावसथ्यात्परं स्थानं नावसथ्यात्परं व्रतमित्यावश्यकत्वान्नित्यं। तस्मात्तदकरणे प्र
यात्। तत्रत्ययार्थे प्रायश्चित्तमुचितं। तत्र वाक्यं। आवसथ्याधानमुख्यकालातिक्रान्ते तावद्दू
ग्नित्वजनितदुरितक्षयाय एतावन्ति प्राजापत्यव्रतानि चरिष्ये। तदशक्तौ प्राजापत्यप्रत्याम्नायं
प्रति प्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं संप्रददे। एवमन्येषु गोमूल्यदानं द्वादशब्राह्मण
अयुतगायत्रीजपः गायत्र्या तिलाहुतिसहस्रं षपेषु वाक्यमूहनीयं। ततः स्वशाखाध्या
म्मे सुतत्वज्ञं ब्रह्माणं गन्धपुष्पमाल्यवस्त्रालंकारादिभिरभ्यर्च्यामुकगोत्रममुकशर्म्माण

५॥

२४

वेदममुकशाखाध्यायिनं आवसथ्याधानं करिष्यन् कृताकृतावेक्षकत्वेन ब्राह्मणमभि-
नपुर्ष्यत्ते तवस्त्रालंकारैस्त्वामहं वृणे। वृतोस्मीति तेन वाच्यं। केचिद्ब्राह्मणं मधुपर्केणार्चय-
न्ति स्त्रीविशेषात्। ततः पत्न्या सहाहते वाससी परिधाय अग्न्याधानदेशे स्थंडिलमुपलिप्य
भूसंस्कारं कृत्वा तं देशं पिधाय ब्राह्मणैः सह सम्पदं स्थालीमादाय ब्राह्मणैः परिवृतो वेदध्व-
मंगलगीतवाद्यादिभिः आनितोत्साहो वैश्यस्य तृतीयवर्णस्य बहुपशोः पशुभिः समृद्धस्य तद-
भे गोभिलादिसूत्रवचनात्। अम्बरीषाद्वाहुयाजिनो ब्राह्मणस्य गृहाद्वा बह्वन्नपाकाद्ब्राह्मणम-
हानसाद्वा स्थाल्यामग्निं गृहीत्वा तथैव गृहमागत्य परिसमूहनादिभूसंस्कारसंस्कृते स्थंडिले ऽ
ङ्मुख उदे पविश्यात्माभिमुखमग्निं निदध्यात्। ततो ब्रह्मोपवेशनादि ब्राह्मणभोजनान्तं वृद्धम-
णां कर्म कुर्यात्। चातुष्प्राश्यपचनवत्सर्वमिति सूत्रे कृतापूर्वपक्षे उपन्यस्तो न तु सम्मत इति कर्के

ने ३

पाध्यायो भाष्ये निरूपितवान्। अधुनाऽरणिप्रपञ्चमाह। अरणिप्रदानमेके एके आचार्याः
णिप्रदानं प्रशस्तं उपशान्तस्यार्थे। अरणीप्रदानं उपादानं कारणं उत्पत्तिस्थानं यस्य
सोऽरणिप्रदानस्तमरणिप्रदानमग्निमादधीतेति मन्यन्ते। पंचमहापत्तादिति श्रुतेः। पंच
पत्तानां श्रौतत्वात् आरणेये आवनुष्ठानं युक्तमित्यभिप्रायः। ततो ब्रह्मोपवेशनादि आ
गान्तं कर्म कृत्वा॥ अग्न्याधेयदेवताभ्यः स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती
तित्वन्नो अग्ने सत्वन्नो अग्ने इमम्मे वरुण तत्त्वायामि ये ते शतमयाश्चाग्न उदुत्तमं भवतं न
ष्टे। सूत्रं। अग्न्याधेयस्य श्रौतस्य देवता अग्निः पावमानो अग्निः पावकोऽग्निः शुचिरदि
अग्न्याधेयदेवताभ्यः स्थालीपाकं चरुं श्रपयित्वा यथाविधि पर्युक्ष्य। आज्यभागौ आग्नेय
आघारपूर्वकौ हुत्वा आज्येन आहुतयो होमाः आज्याहुतयस्ताः आज्याहुती हुत्वा होति

का २

६॥

6

ग्नेरन्वादिभिर्भवतन्नरसांतानिरष्टभिर्कृत्रिः प्रत्यचमष्टो। ननु अग्न्याधेयदेवताभ्यो हु
होतीतिवक्ष्यति। तत्किमर्थमत्राग्न्याधेयदेवताभ्य इत्युक्तं बह्वीनां देवतात्वज्ञापनाये।
त्। ननु बहुत्वमस्येवा। कुतः शंका। पवमानादिविशेषणविशिष्टस्याग्नेरेकत्वात्। अग्निरेव
दितिद्वितीयेति हि एवाग्न्याधेयदेवतेइति द्वयोरेव देवतात्वं माभूदिति पुनर्ग्रहणात्। बह्वी
देवतात्वं। विशिष्टस्य देवतांतरत्वमिति दूरमहेन्द्राधिकरणे जैमिनीयेनिर्णीतत्वात्। आज

प्याह

भागाविष्टेति किमर्थं पुनर्वचनं। अग्न्यारादीनां चतुर्दशानां क्रमेण पठिष्यमाणत्वात्। उच्यते
आहुतीनां किं स्थानमिति संशये आज्याहुतिस्थानविधानार्थं। ग्रहणं तु मंत्रवतीकसं

नि २

यैवत्यर्थं। पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति। सर्वत्रां पुरस्ता
त्सर्वैकस्य अग्न्याधेयदेवताहोमस्य अष्टौ जुहोति यथा एवमुपरिष्टात्। एवं तथात्वन्नो अग्नेर

त्यादिना क्रमेण उपरिष्टात् जुहोत्यष्टौ किं कृत्वा हुत्वा काभ्यः आग्नेयादिदेवताभ्यः । ए

भ्यः कस्य स्थालीपाकस्य चरोः स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । स्विष्टकृते च । सू

ढौ २ कृते चाग्नये अष्टहोमान्ते स्थालीपाकस्य हुत्वा । वशद्धात् अथास्याग्रे हविषः कृतमित्यने

णाज्याहुतिं जुहोति । ननु स्विष्टकृत इति किमर्थमुक्तं प्राग्होमाहुतिभ्यः स्विष्टकृद्देवद

हविरिति वक्ष्यमाणत्वात् । अत्र चान्यस्य हविषस्त्वाभावात् । प्राग्होमाहुतिभ्यः प्राप्तस

स्वहोमस्य अथास्याग्रेरिति आज्याहुतेर्महाव्याहृतिभ्यः पूर्वं प्राप्त्यर्थो । बर्हिर्हुत्वा प्रा

१२४ बर्हिः प्रस्तरणार्थं अग्रे प्राश्नाति मन्त्रयति अत्र प्राशनोपदेशो सामर्थ्यात् प्रा

श्नातं । तर्हि हुतशेषः अन्यद्द्रविं चित् । उच्यते । पाकयज्ञेषु वक्तस्यास्य सर्वहोमो हुत्वा शे

नमिति कात्यायनोक्तेः स्रुवेण वक्तस्य होमद्रव्यस्य सर्वस्य होमानिषेधात् हुतशेषस्य

नविधानात् सर्वसामाहुतीनां होमद्रव्यं स्रुवेव शेषितं संस्रवत्वेन प्राप्तिं हुत्वा प्रातरे

७॥

का१

तत्प्राशयमिति ननु अहुते वैश्वदेवे त्वित्यादिवचनाद्वैश्वदेवात्प्राक्स्थालीपाकानुष्ठा
नं तत्र च संस्रवप्राशनं विहितं तत्कृत्वा कथं माध्याह्निकवैश्वदेवादिकर्माण्यधिकार इति
उच्यते। शेषप्राशनस्य कर्माङ्गत्वेन विधानात्। अप्राशने कर्मानिवृत्तेर्वैगुण्यात्। नोत्तरकर्मा
कारनिवृत्तिः बर्हिहोमश्च विधानसामर्थ्यात्। अग्न्याधानएव भवति। नान्येषु कर्मसु। तत
ब्राह्मणभोजनं। ततः समाप्ते कर्मणि ब्राह्मणभोजनं दद्यात्। ब्राह्मणभोजनमित्यत्र ए
स्मै द्वाभ्यां बहुभ्यो वा भोजनं ब्राह्मणभोजनमिति समासस्य तुल्यत्वात् एकस्मिन्नपि ब्राह्मणे
भोजिते अर्थस्यानुष्ठितत्वात् एकस्यैव भोजनमिति युक्तं। इति सूत्रार्थः ॥१॥ ॥ अथ पद्धतिः ॥
तत्रावसथ्याधानं करिष्यन् उक्तकालातिक्रमाभावे ग्न्याधानार्थोपदिष्टमासतिथिनक्षत्रवा
रादिके काले प्रातः सुस्नातः शुद्धक्षालितपाणिपादः स्वाचान्तः सपत्नीकः गोमयोपलि
प्ते शुचौ देशे आसने उपवेश्य अद्येहेत्यादिदेशकालौ स्मृत्वा आवसथ्याग्निमहमाधास्य इति

संकल्पं विधाय मातृपूजा पूर्वकमाभ्युदयिकं श्राद्धं यथोक्तं कुर्यात्। कालातिक्रमे तु यावंत्यब्दान्य
तीतानि निरग्नेर्द्विजन्मनः। तावन्ति कृच्छ्राणि चरेद्धोमश्च द्यायथाविधि इति वचनादतिक्रां
त संवत्सरसंख्यं प्राजापत्या प्रायश्चित्तं मुख्यविधिना चरित्वा तदशक्तौ प्रतिप्राजापत्यं गां द
तदलाभे तन्मूल्यं निष्कमेकमर्धं तदर्धं वा द्वादशब्राह्मणभोजनं अयुतगायत्रीजपं गायत्र्यातिल
सहस्रहोमं वा शक्त्यपेक्षया न्यतमं विधाय होमं संसाय प्रातर्होमद्रव्यं प्रत्यहमाकृतिचतुष्टय
तं अतिक्रांतदिवसानां गणयित्वा ब्राह्मणेभ्यो दद्यात्। तत्र वाक्यं। आवसथ्याधानमुख्यकाल
क्रांतेतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय एतावन्ति प्राजापत्यव्रतानि चरिष्ये अशक्तौ प्रा
त्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्यो हं संप्रददे। एवमन्येष्वपि वाक्यमू
यं तद्यथा। आवसथ्याधानमुख्यकालातिक्रांते तावद्वर्षनिरग्नित्वजनितदुरितक्षयाय प्र

व२

८॥

त्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यं एतावती नां गवां मूल्यमिदमेतावत्सुवर्णं ब्राह्मणेभ्यो हं सं
प्राजापत्याम्नायत्वेनैतावतो ब्राह्मणान्नहं भोजयिष्ये। आवसथ्याधानमुख्यकालातिक्रांते
षीनिरग्नित्वजनितदुरितक्षयाय एतौ प्राजापत्यप्रत्याम्नायत्वेन गायत्र्या एतावत्ययुतानि ज
तद्धत एतावत्तिलाज्याहुतिसहस्राणि दास्यामीति। एवं कृतप्रायश्चित्तो होमद्रव्यं दद्यात
था। आवसथ्याधानमुख्यकालातिक्रांते तावद्दिनसंबंधिसायंप्रातर्होमद्रव्यं एतावत्परिम
ति प्राजापत्यमेकैकं निष्कं अशीतिरत्तिका परिमितं। अयुतरूत्वो गायत्रीजपं वा करिष्ये। गा
तिलहोमसहस्रं वा द्वादशब्राह्मणान्वा भोजयिष्ये। सुवर्णार्द्धं सुवर्णद्वार्द्धं सुवर्णमूल्यं वा॥
द्रव्यं वा तंडुलाद्रव्यं वा यवद्रव्यं वा तुभ्यमहं संप्रददे। तावत्परिमाणं दक्षितंडुलयवानाम न्य
मणेभ्यो हं संप्रददे॥ तन्मूल्यं द्रव्यमेतावत्परिमाणं वा होम्यं दद्यादिति वचनात्। उत्तरप

अथमातृपूजायथाप्रतिमातृभित्तौपरेवालिखितासु अत्रतपुंजेषुवागोर्यादिकोइशमातृ ४ प्रत्येक
मावाह्यस्थापयित्वापूजयेत १ गुटि ४

तेऽन ४

दिकर्म्मद्रव्यदाननिवृत्तिः। छंदऋषिस्मरणं। इषेत्वादिखंब्रह्मान्तं। ततःस्वशाखाध्यायिनं कर्म्मसु
तत्वज्ञंब्राह्मणंगंधपुष्पमाल्यवस्त्रालंकारादिभिरभ्यर्च्यो ऽमुकगोत्रममुकशर्म्माणममुकवेद
ममुक शाखाध्यायिनंआवसथ्याधानंकरिष्य न्हृताकृतावेक्षकत्वेनब्रह्माणमभिश्रृंदनपुष्
त्ततवस्त्रालंकारैस्त्वाहं वृणे। वृतोस्मीतिवाच्यं। केचिद्ब्राह्मणंमधुपर्केणार्चयंति। तत्र विकल्पाविशे
षात्। ततःपत्न्यासहोतेवाससीपरिधायअग्न्याधानदेशेस्थंडिलमुपलिप्यपंचभूसंस्कारान्कृत्वा
तंदेशंपिधायब्राह्मणेनसहसमृद्धंस्थालीमादायब्राह्मणैः परिवृतोवेदघोषमंगलगीतवाद्य
भिर्जीनितोत्साहोवैश्यस्यबहुपशोर्गृहात्। सूत्रांतरमतेनअम्बरीषाद्बहुयाजिनोब्राह्मणस्यगृ
द्वाबहुन्नपाकाद्ब्राह्मणमहानसाद्वास्थाल्यामग्निंगृहीत्वातथैवगृहमागत्यपरिसमूहनादि
भूसंस्कारसंस्कृतेस्थंडिलेप्राङ्मुखमुपविश्यआत्माभिमुखमग्निंनिदध्यात्। तारत्याहरणपक्षे
णयपक्षेतुगृह्याग्न्याधानजातेष्टौयजमानःपुत्रेहनि। अश्वत्थोयः ४ शमीगर्भः ४ प्रशस्तोद्दीस

५॥

तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्ध्वगापि वा। अरणिस्तन्मयी ज्ञेया तन्मध्ये वोत्तरारणि
द्वारवंशाग्रमौविली च प्रशस्यते॥ संसन्नमूलेय १ शम्याः सशमीगर्भ उच्यते। अभावे त्वशम
द्धेरेदेवाविलंबितः। चतुर्विंशत्यंगुलादीर्घो विस्तरेण षडंगुला। चतुरंगुलमुत्सेधमरणि
कैः स्मृता। मूलाद्द्वादशांगुलं त्यक्त्वा अग्राद्य द्वादशांगुलं। अंतरं देवयोनिः स्यात्तत्र मन्थ्यो हुत
नः ४ मूर्द्धाक्षिकर्णं च वक्त्राणि कंधरा चापि पंचमी। अंगुष्ठमात्राण्येतानि द्व्यंगुष्ठं वक्त्र उच्यते। अंगु
ष्ठं हृदयं त्र्यंगुष्ठमुदरं तथा। एकांगुष्ठा कटिर्ज्ञेया द्वौ बस्ती द्वौ च गुल्फकं। ऊरू जंघे च पादौ च च
त्र्यैवैर्यथाक्रमं॥ अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिता ४। यत्तद्गुह्यमिति प्रोक्तं देवयोनिः
तः। तस्यां यो जायते वह्निः स कल्याणकृदुच्यते। प्रथमे मंथने ह्येष नियमो नोत्तरेषु च॥ अष्टां
प्रमंथस्याग्नात्रं स्याद्द्वादशांगुलं। ओविली द्वादशैव स्यादेतन्मंथनयंत्रकं। गोवालैः शण
सूत्रैश्च वह्नितमनंभुकं। व्यामप्रमाणं नेत्रं स्यात्तेन मथ्यो हुताशन ४। चात्रमूले प्रमंथाग्रं ग

त्वा विचक्षणः। इत्युक्तलक्षणमरण्यादिकं संपाद्य। उक्ते काले माघादिपंचमासानामन्यतमे मासे कृ
त्तिकारोहिणीमृगशिरःफाल्गुनीद्वयहस्तामनानक्षत्राणामन्यतमर्क्षेऽन्वितायां शुभतिथौ चंद्र
शुद्धौ गृह्याग्निमादधीत मुख्यकालातिक्रमे तु एतावान्विशेषः। उक्तविधिना कृतप्रायश्चित्तो द
हौम्यद्रव्यः। स्नानादिपूर्वकं संकल्पादि मातृपूजा वृद्धिश्राद्धं ब्रह्मवरणं हतवासः परिधाना
दि कृत्वा शालायां यजमान उपविशति। यजमानस्य दक्षिणे पत्नी। अथ ब्रह्मा अरणी आ
यज्ञ अधरारणिं पत्न्यै उत्तरारणिं यजमानाय दद्यात्। ते चावसथ्याग्निसाधनभूते इमे अरणी अ
न्यां परिगृहीते तत्रेयमधरा इयं उत्तरा इदं चात्रं इयमोविली इमानि स्रुवादीनि पात्राणि परिगृ
तानि परिगृहीतानि। ततो आधानदेशे शंकुं द्वादशांगुलं खादिरं चतुरंगुलमस्तकं निखाय
रज्जुपाशं दत्वा आमुच्य सार्द्धत्रयोदशांगुलरज्ज्वा तं शंकुं तरान्ते संवेष्ट्य प्रदक्षिणं परिभ्रामय

परिलिख्य तत्रोपरिसमूहनादिभूसंस्कारान्कृत्वा अग्नेर्घमंथनमारभेत । तद्यथा । प्राग्
ग्रंरलोम कृष्णाजिनमास्तीर्य तत्रांगग्रामधरारणिं निधाय तत्स्पृष्टं तदुत्तरारणिं च श्रुवं
ण्याउत्तलत्वणमंथनप्रदेशे प्रथमं मूलं विधाय चात्राग्रे वो विलीमुदग्ग्रां च नेत्रेण चात्रं
वेष्टयित्वा गाढं धृत्वा पश्चिमाभिमुखोपविश्य पात्न्या मंथयेत् । यावदग्नेरुत्पत्तिः । प
मंथनासामर्थ्ये अन्ये ब्राह्मणाः श्रु च यो मंथंति एवं यजमानासामर्थ्ये अन्यो यंत्रं धारयति । तं
जातमग्निं मृन्मये पात्रे शुष्कं गोमयपिंडचूर्णे परिनिहितं तले सपुरीषं प्रक्षिप्य संधुक्ष्य ज्वाल
पूर्वसंस्कृते देशे आदध्यात् । तत्र ब्रह्मोपवेशनादि देवताभिध्यानं पर्युक्षणान्तं कृत्वा स्त्रुवम
दाय दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धः ४ प्रजापतये स्वाहेति मनसा ध्यायन्प्रांचमूर्द्ध्वं संजुहुसं
मान्येन अग्रे रुत्तरप्रदेशे पूर्णाघारमाघारयेत् । इदं प्रजापतय इति त्यागं कृत्वा हुतशेषं प

त्रान्तरे अक्षिपेत्। तथैव ॐ प्रायस्वाहेति अग्नेर्दक्षिणप्रदेशे उत्तराघारं। इदमिन्द्रायेति त्यागं वि

धाय। अग्नये स्वाहेत्यग्नेरुत्तरार्द्धपूर्वार्द्धे आग्नेयमाज्यभागं हुत्वा इदमग्नय इति इदं त्यक्त

तथैव सोमाय स्वाहेति दक्षिणार्द्धपूर्वार्द्धे सौम्यमाज्यभागं हुत्वा इदं सोमायेति स्वत्वंऽत्यजे

६४

समितमेवाग्निप्रदेशे आघाराघा॥ सर्वाहुतीर्जुहुयात्। अथाष्टर्चे होमः॥ त्वन्नो अग्ने स

त्वन्नो अग्ने इमं मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्न उदुत्तमं भवतन्न इत्येताभिरष्टाभिः प्रत

अष्टाज्याहुतीर्हुत्वा यथादैवतं स्वत्वत्यागं च कृत्वा स्थालीपाकस्य जुहुयात्। तत्र प्रथमा त्व

अग्न इति वामदेव ऋषिः त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः। सत्व

ति द्वे देवते। अयाश्चाग्न इति प्रजापतिरृषिर्विराट्छन्दोऽग्निर्देवता। ये ते शतमिति शुनः

ऋषिर्जगती छन्दः वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्तहोमे वि

योगः॥ उदुत्तमं शुनःशेपस्त्रिष्टुप् वरुणः॥ विसृज्य मे षु पाशोन्मोचने विनियोगः॥ त्वन्नो अ

६१

मु १

११॥ त्यादिप्रमुमुग्ध्यस्मत्स्वाहा।इदमग्नीवरुणाभ्यां।सत्वन्नोअग्नेसुहवोनएधिस्वाहा।इदमग्नी
वरुणाभ्यां।इममेवरुणवकेस्वाहा।इदंवरुणाय।तत्वायामिप्रमोषीःस्वाहा।इदंवरुणाय।ये
तेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः।तेभिर्नोअद्यस [illegible] वितोतवि
ष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा।इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः
र्द्भ्यः।केचितइदंवरुणायेति॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाअसि।अ
नोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा।इदमग्नये।उदुत्तमंअदितयेस्यामस्वाहा।इदंव
रुणाय।भवतंनः।शिवोनाभवतमद्यनःस्वाहा।इदंजातवेदोभ्यां।केचिदिदमग्निभ्यामिति
अथस्थालीपाकेनचतस्रोग्न्याधेयदेवतां।अग्नयेपवमानायस्वाहा।इदमग्नयेपवमाना
य।अग्नयेपावकायस्वाहा।इदमग्नयेपावकाय।अग्नयेशुचयेस्वाहा।इदमग्नयेशुचये।अदि
त्यैस्वाहा।इदमदित्यै।इत्यग्न्याधेयदेवताभ्यः।ततःपूर्ववदाज्येनाष्टर्चंहोमः।ततोब्रह्मा

न्वारब्ध उत्तरार्द्धात् स्रुवेण चरुमादाय अग्नये स्विष्टकृते स्वाहेत्यग्नेरुत्तरार्द्धे जुहुयात् इ
दमग्नये स्विष्टकृते। अथानन्वारब्ध आज्येन। अयास्यग्नेर्वषट्कृतं यत्कर्मणोऽत्यरीरिचं देवा
तु विदः स्वाहा। इदं देवेभ्यो गातुविद्भ्य इति स्रुवं त्यक्त्वा। अथ ब्रह्मान्वारब्धः। प्रजापतिर्ऋषि
र्गायत्री छंदो अग्निर्देवता प्रजापतिर्ऋषिरुष्णिक् छंदो वायुर्देवता। प्रजापतिर्ऋषिरनुष्टुप् छंदः
सूर्यो देवता व्याहृती होमे विनियोगः। ॐ भूः स्वाहा इदमग्नये। इदं भूर्द्यो। ॐ भुवः स्वाहा
वायवे। इदं भुवः इति वा। ॐ स्वः स्वाहा। इदं सूर्याय। इदं स्वः इति वा। त्वन्नो अग्ने स त्वन्नो
अयाश्चाग्नेये ते शतं उदुत्तमं पंचमंत्राः प्राजापत्यां तान्वाहुती हुत्वा बर्हिर्होमं कृत्वा संस्रव
श्यावस्यपवित्राभ्यां मुखं मार्जयित्वा पवित्रे अग्नौ प्रक्षिप्य प्रणीता अग्नेः पश्चिमतो निनी
सादितपूर्णपात्रवरयोरन्यतरस्य ब्रह्मणे दक्षिणात्वेन दानं कृत्वा एकब्राह्मणभोज
स्मृत्यंतरोक्तत्रयोविंशति ब्राह्मणभोजनं। अत्र मार्जनं पवित्रप्रतिपत्ति बर्हिर्होम:

२४

२२।

ताविमोकइत्येते चत्वारः पदार्था भाष्यकारमतेन गृह्यकर्म्मसु न भवंति वचनाभावात्॥ अ
सथ्याधाने तु वर्हिर्होमो वचनाद्भवति इत्यावसथ्याधानं। ततो मणिकाविधानं पंचमहाय
सायंप्रातर्होमनिमित्तं च श्राद्धं चतुर्थ्यां तद्दिन एव कृत्यं। अथ पुनराधाननिमित्तानि लिख्य
तत्र कृतावसथ्याधानौ पत्नीयजमानौ भिन्नं परित्यज्य यदि ग्रामसीमां समतीत्य वसेयातामेक
रात्रिं तत्र प्रातरागत्याग्निं मंथित्वा स्वविधिना ब्रह्मोपवेशनादि ब्राह्मणभोजनान्तमाधानं कु
र्यात्। होमलोपे तु एकतंत्रेण सायंप्रातर्होमं कुर्यात्। बहुहोमलोपे त्वेवं। यदि कृताधानो यजमा
नः प्रजार्थी कामार्थी वोद्वहेत्तत्र अन्य अरणी संपाद्य प्रातर्होमं विधाय यदि वा विवाहं कृत्वा
आचतुर्थीकर्मणो होमं त्यक्त्वा तदंते अतिक्रांतहोमद्रव्यं दत्वा पंचमेहनि पुनराधानं यथो
क्तमित्येकः पक्षः। प्रातर्होमं कृत्वा दिवा विवाहं संपाद्य सद्यः चतुर्थीकर्म च कृत्वा तद्दिन एवावसथ्या
धानमिति द्वितीयः। अत्र पक्षद्वयेपि परिग्रहोरण्योः स्फारितयोरावसथ्ये दहनं अन्यारण्योराधा

नंपाच्चाणितान्येवयत्तु छन्दोगपरिशिष्टे सदारोन्यैः पुनर्दारैर्न कथंचित्कारणांतरात्तायोद
हेदग्निमाधातुं क्व होमोस्य विधीयते। स्वग्नावेव भवेद्धोमो लौकिके न कदाचनानह्याहि
ताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयत इति पुनराधानाभावप्रतिपादनं तच्छन्दोगविषयं। अन्ये कं
कस्ये कस्याः पत्न्या मरणे अरणिपात्रैः सहावसथ्येन तां दाहयित्वाशौचांते पुनराधानं।
पत्नीकस्य तु पत्नीमरणे कृतविवाहस्य चतुर्थीकर्मानंतरं पुनराधानं। अग्नावुपशांते हे
लहूयालिकमग्टहपतौ प्रोषिते प्रमादात् पत्न्या ग्रामांतरवासे तथा सह स्थिते यजमाने
प्रवासे प्राग्घोमकालादनागमने पुनराधानं। केचित्तु यजमानायामग्निसंनिधौ तिष्ठन्त्यामप
पातसहितानां केवलानां वा कार्यवशाद्ग्रामान्तरेऽवस्थितेऽपत्यो वा अग्निसंनिधौ तिष्ठति सपत्नी
त्नीनां ग्रामांतरगमने नाग्निनाश इत्याहुः। तथा पत्न्या अग्निं विना समुद्रगानयंच मेमते
तायाः अग्निनाः सहितायाः भयं बिना सीमातिक्रमे कर्मार्थे हरणादन्यत्र शकटं विनाशम्य

हूहूंत्रिरुच्छ्रसतः प्रत्यक्षाग्निहरणे मथ्यमानस्य हृष्टस्याग्नेर्मंथनयंत्रोस्यापनाद् हूहूं नाशे सं
रमदं यजमानस्य होमाकरणे प्राजापत्यब्रह्मकूर्च्चयोरन्यतरप्रायश्चित्तकारणं हूहूंप
श्वपादक्रांते श्वाचरणे पुनर्द्दिवाह वेधानं। उदकेनाग्न्युपशमने शिकयेनास्युपशमने शिके
ग्न्युद्वाहने प्रत्यक्षस्यारणिसमारूढस्य वा। मेरेक नामधेय शतयोजनगामिनदीयोजनगा
गामिनदीसंतरणे वसंध्येत्रसीमातिक्रमणे आघे तसीमातिक्रमणे वा पत्नीयजमानयोरन
भावे रैकरगर्दभकाकश्रृगालश्वकुक्कुटमर्कटशूद्रांत्यजमहापातकिशवसूतिकारजस्वला
रेतोमूत्रपुरीषमेदोश्रुश्लेष्मशोणितपूयास्थिमांसमज्जासुराप्रभृतिभिरमेध्यैः प्रत्यक्षस्य
रणिसमारोपितस्य वाग्नेः स्पर्शे त्रीण्यक्षाग्निरंतरंपक्ष होमकरणे पुनराधानं तथाग्नेरपहरणे
दुंकरणे हूहूं पृष्ठे वा शांते ग्नौ मंथने प्रारब्धे ग्निजन्माभावे लौकिकाग्निब्राह्मणदाहिणे ह
स्तदक्षिणके णे कुशास्तंबजलानामन्यतमेग्निस्थाने प्रकल्पिते स्थ्यो स्तमयेवा जातेपुनरा

धानं। अग्निनाशश्चात्या अग्निं मथित्वा पूर्वोग्निं हुत्वा समेपितमग्निं अयं ते योनिरिति मंत्रेणारण्योःस
मारोप्य पूर्वोद्दिष्टो होमादिकं विदध्यात्। यदा तु लौकिकाग्न्याद्यन्यतमं निक्षयहोमं कृत्वा मंथनेन
रद्वेद्वितीयहोमकालात्तृतीयाद्वा अग्नेर्नाशो भावस्तदा पुनराधानं। आरोपिताग्न्योररण्योस्त्री
एकस्य वा पुनराधानं। असमारोपितयोस्तु एकतरविनाशे द्वितीयं छित्वा मंथनेन नष्टायाः प्रतिप
रावसथ्ये दाहः। यदा पुनर्जतुमज्ञानेन मंथनेन वा मंथानायोग्ये भवतस्तदाऽन्येऽरणी गृहीत्वा
शेषन्वादिकर्म निर्वर्त्य जीर्णमरणिद्वयं सिकालीकृत्य तस्मिन्नग्नौ प्रज्वाल्य दक्षिणहस्तेन नू
तनारणीं सव्यहस्तेनाधरारणिं गृहीत्वा दीप्तेऽग्नौ धारयन् उद्बुध्यस्वाग्ने प्रविशास्व योनिं
देवयज्यां वोढवे जातवेदः। अरण्या अरणीमनु संक्रमस्व जीर्णान्तनुमजीर्णया निर्गुदस्व
यं ते योनिर्ऋत्विय इत्येतौ मंत्रौ जपित्वा मंथनयंत्रं निधायाग्निं मथित्वा संस्कारपूर्वकं स्थापने
धाय पूर्णाहुतिवदाज्यं संस्कृत्यानादिष्टहोमं कुर्यात्। अयपवन्होविधिः। तत्र यजमानस्य ३

म१

यावित्वेरोगार्त्तौवद्ध्यगमनेराष्ट्रभ्रंशेधनाभावेगुरुगृहवासेअन्यास्वपिभयादिषु
नांसमासोभवति।तद्यथा।प्रतिपदिसायंकालआहुतिपरिमाणंहोमद्रव्यंचतुर्दश
एकस्मिन्पात्रेकृत्वाअग्नयेस्वाहेतिहुत्वापुनस्तथैवचतुर्दशकृत्वोहोमद्रव्यंगृहीत्वा
पतयेस्वाहेतिहुत्वायात्।एवमेवहोमद्रव्यंचतुर्दशकृत्वाएकत्रपात्रेनिधायसूर्यायस्
प्रातर्हुत्वातथैवहोमद्रव्यमादायप्रजापतयेस्वाहेतिजुहुयात्।ततोदक्षिणेनपाणिना
ग्राममुत्तरामरणिंगृहीत्वासव्येनाधरामग्नेरुपरिधारयेत्।अयंतेयोनिरितिमंत्रेणाग्नि
रोप्यारणीधारयेत्।अथपौर्णमास्याममावास्यायांवाप्राप्तायांप्रातररण्योरग्निंमंथि
कुंडेनिधायावसरप्राप्तंवैश्वदेवादिकंकर्मविधायसायंकालेसायंहोमंप्रातःकालेप्रा
मंहुत्वापक्षादिहोमंकुर्यात्।एतावपिपर्वद्यापन्नानिवर्त्ततेतदाउक्तविधिनापुनःपक्षहो
कुर्यात्।तृतीयेपक्षेतुआपदनुवृत्तावपिनपक्षहोमविधिःकिंतुकृच्छ्राण्यपिपृथगेवस

तर्हिमान्नाविद्ध्यान्नान्ततोप्यापदनुवृत्तौ पुनरुक्तविधिना पक्षे पक्षे होमसमासं कुर्यात्॥ त
तीयपक्षे एवं यदे वापन्निमित्तं तदादि औपवसथ्याहः प्रातर्होमपर्यन्तानां होमानां सम
कुर्यात्॥ न पक्षान्तरगतानां केवलं आतपक्षेतु न पक्षद्वयमेव पक्ष होमानयमः। आपत्तु
दनुवृत्तौ यावदापन्निवृत्तिस्तावत्प्रतिपक्षमुक्तप्रकारेणानिरन्तरं पक्षहोमात्समस्येदिति
प्रकारः। प्रकारान्तरं तु सायंकाले समिधादाधानपर्युक्षणानन्तरं आहुतिपरिमाणं होम
ग्नये स्वाहेति हुत्वा पुनस्तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्र
ये स्वाहेति सकृत्तु जुहुयात्॥ इति सायंप्रातस्तनयोर्होमयोः समासं यावदापदमाचरेत
तु आपदो गुरुत्वं भवति तदा सायंहोम एवानेन विधिना प्रातर्होमानां समासं कुर्यात्॥ ए
म समासे कृते यद्यन्तराले आपन्निवृत्तिस्तदा प्रत्यहं सायंप्रातर्होमान् कृतानपि तु जुहुयात्॥ त
कठा आमनन्ति एतेच होमसमासाः सायमुपक्रमाः प्रातरपवर्गा इत्युत्सर्गः आपद्विशेषेतु

१५

= अपराह्णे पिंडपितृयज्ञः पिंडपितृयज्ञपद्धतिर्लिख्यते। अमावास्या

नुपक्रमाः शुद्धौ ह्यपराह्णादिकालानपन्नाः अपि बोद्धव्याः। यतः तत्र यत्कालपुरस्का

वहोमस्य मासोपक्रमो युज्यते।। ॐ अपराह्णे श्राद्धपाकादेश्च देवपात्रान् निर्जनां तावि

प्राचीनावीती नीवीबद्धा दक्षिणामुखोग्निसन्निधावुपविश्याद्य पिंडपितृयज्ञेनाहं त

त्राग्निं कव्यवाहनं सोमं पितृमंतं अमुकगोत्रान् यजमानपितृपितामहप्रपितामहान्

कामुकशर्मणः व्रीहिमयैः पिंडैर्यक्ष्य इति प्रतिज्ञाया ग्नेयादिदक्षिणान्तं दक्षिणाग्रैः कुशैः

परिस्तीर्य पात्राणि सादयेत्। पश्चादग्ने दक्षिणे संस्थानि तत्र स्रुवं चरुस्थाली उलूखलं मुशलं

शूर्पं उदकमाज्यं मेक्षणं स्फ्यं। उदपात्रं सकृदाच्छिन्नानि व्रीहीन् राक्षत्राणि चेति। ततो

मपरेण शूर्पं स्रुचं व्रीहीन् गृहीत्वोत्तरतोग्नेः कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय व्री

हीनुलूखले निक्षिप्य मुसलमादायातिष्ठन् दक्षिणामुखः स्त्रीः कलोऽवहन्याद्यावद्व्रीह

या वितुषा भवंति। ततः शूर्पेणानिः पूय पुनरुलूखले निक्षिप्य सकृत्फलीकृत्य पुनः शूर्पे

6

णा कृत्वा निःष्प्रयसोदकायां चरुस्थाल्यां तंडुलानोप्याग्नावधिश्रित्याग्र दक्षिणं मेक्षणेन
यिले षष्ठि तं चरुं श्रपयेत् श्रितमासादितेन हुतेनाभिघार्य दक्षिणत उद्वास्य पूर्णोपा
त्तरत आनीय स्थापयेत् ततः सव्यं जान्वाच्य मेक्षणेन चरुमादायाग्नये कव्यवाहनाय ते
स्विधाय पुनर्मेक्षणेनामा हुतिं हुत्वा इदमग्नये कव्यवाहनायेति त्यागं विधाय पुनर्मेक्षणेन च
रुयासोमाय पितृमते स्वाहेति हुत्वा इदं सोमाय पितृमते इति त्यागं विधाय मेक्षणमग्नौ
स्याग्नेर्दक्षिणतः पश्चाद्वा दक्षिणामुख उपविश्य सव्यं जान्वाच्योपलिप्य स्फेनापहता अ
रारक्षांसि वेदिषद इति दक्षिणायतां लेखामुल्लिख्योदकमुपस्पृश्य पयेत् पाणिमुमुल
लेखाग्रे निधाय पुनरुदकमुपस्पृश्योदपात्रमादाय पितृतीर्थेन लेखायाममुकगोत्रा
त्पितरमुमुकशर्मन् अवनेनिक्ष्व त्येवं पितामहयोरवनेजनं दत्वोपमूलछिन्नं सकृ
न्नानिदर्भान् दक्षिणाग्राणि लेखायामास्तीर्य तत्रावनेजनं क्रमेणामुकगोत्रास्मत्पितरमुक

२६॥ 16

एतत्ते तत्रं स्वधा नमऽ इति पिंडं दत्वाऽ उदं पित्रेऽ इति त्या गोत्र धायेवं पितामह प्रपितामहाभ्यां॰
कं पिंडं दत्वा अपितरऽ इत्यर्द्धर्चं जपित्वा पराङ् आवृत्य वा पु धार्या तमनादुदश्रु ख्वाऽ आसि॰
ते नैवावृत्यामीमदंत इदं ऋचं जपित्वा पूर्ववदनेनैव मनेनादिं विस्तृण्व स्य नमो व इति प्रतिमं॰
मं जलिं करोति गृहान्नऽ इत्याशिषं प्रार्थ्य तद्व इति प्रतिपिंडं सूत्राणि दत्वा ऊर्जमिति पिंडेष्व॰
निषिंच्य पिंडाननु सायप्रस्थानां मवधायावजिघ्रति सकृदाछिन्नानां गोत्रास्यो लमुकं प्रवि॰
देकं स्पृष्ट्वा चम्यापिंडाञ्चाहायेकं मध्ये कुमार मेदितिपं उपितत्र्य ज्ञ४॥ लोके हुतस्र रक्षोध्ववरा॰
युक्तो हीनमंत्रोऽनुहोतिय४॥ अप्रवृद्धेस ध्रमेवासो धः स्यादन्यजन्मनि। स्वल्पेऽपद्दे स स्पु॰
लिंगे वामावर्तेऽमयानके। अर्हको ष्टे श्वसंपूर्णे स्वत्कार वति पावको कस्मा छिद्रेषि सु दुर्गं भित॰
थाल्लिहति मेदिनी। आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवम्॥ उदं ब्राह्म्यपुराणे। षड॰
र्घ्यो भवन्ति। षट्पुरुषा अर्घ्योऽर्घ्यो हि भवन्तीति शेषः। के ते आचार्य ऋत्विग्विवाह्यो राजा

प्रियः स्नातक इति। आचार्य उपनयनपूर्वकं वेदाध्यापकः। ऋत्विक् श्रौतस्मार्तादिकर्म
र्यं कर्ता ब्रह्मादिः। विवाह्यो वरः। राजा अभिषेकादिगुणवान् प्रजापालने ऽधिकृतः। प्रि
प्रिय उत्कृष्टजातिः समानजातिर्वा सखा। स्नातकः ब्रह्मचर्यात् समावृतः। आचार्यस्याद्वे
न्यस्यात् तथा च मनुः। तं च प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः। स्रग्विणं तल्प आसीन
येत्प्रथमं गवेति। इत्येते। प्रतिसंवत्सरान् अर्हयेयुः। प्रतिसंवत्सरमागतानेतान् आचा
न् अर्घेण पूजयेयुः। नार्वाक्। यक्ष्यमाणास्तु ऋत्विजः। यक्ष्यमाणाः यज्ञं करिष्यन्तो यज
ऋत्विजः याजकान् तु पुनः अर्हयेयुरित्यनुषंगः। न प्रतिसंवत्सरनियमः ४। कथमर्ह
रित्यपेक्षायामाह। आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति। आ
नं वारणादिदारुमयं पीठादि। आहार्य अनुचरैरानीय। आह ब्रवीति। अर्द्धक ४। विं
एवं भवान् ऋत्या साधु सुखं यथा भवति तथा आस्तां तिष्ठतु। अर्चयिष्यामः पूजयिष्या

२२

वक्तमर्घ्यनीयं पावत्यग्रे उद्धीपिष्यामइतिबहुवचनं भार्यापुत्रादिसद्धेगत्वापेक्षंतथा च

तिः। यत्राबार्हेअर्घागच्छतिसर्घ्यंगत्वाद्ववैतत्रचेष्टंतीति। आर्हन्तिविष्टरंपद्यं पादा

दकमर्घ्यमाचमनीयंमधुपर्कंदधिमधुघृतमपिहितंकांस्येकांस्येन। आहरन्ति

नयंतियजमानपुरुषाः विष्टरादिमधुपर्कपर्यन्तानि अर्हणोपकरणानि। तत्रविष्टर

चविंशतिदर्भतरुणमयंकूर्चं। पद्यं पद्भ्यां मार्जनमाणीयं। उक्तलक्षणं द्वितीयं विष्टरं॥

द्यार्थमुदकं पादप्रक्षालनार्थं ताम्रादिपात्रस्थं जलं सुखोष्णं। अर्घ्यं गंधपुष्पाक्षतशालि

लसर्षपदधिदूर्वान्वितं सुवर्णादिपात्रस्थमुदकं। आचमनीयं। आचमनार्थं कमण्डलु

संभृतजलं मधुपर्कं दधिमधुघृतं कांस्यपात्रेकृतं अन्येन कांस्यपात्रेणाच्छादितं। अ

न्यस्त्रिस्त्रिः प्राहविष्टरादीनि। अन्यअर्घ्यकादपरः। विष्टरोविष्टरोविष्टरः इत्येवमेकै

वंत्रिस्त्रिः त्रीस्त्रीन्वारान् ब्रूयात् । विष्टरप्रभृतीन् । पाद्यपादार्थोदकाद्याचमनीयमधुपर्को
न्वा । विष्टरं प्रतिगृह्णाति । प्रत्यङ्मुखेन यजमानेनैतिष्ठता दत्तं आसनात्पश्चिमे प्राङ्मुखस्ति
ष्ठन्नर्घ्ये ४ पूर्वोक्तलक्षणं विष्टरं तत्सींपाणिभ्यामुदगग्रमादत्ते । वर्ष्मोस्मीति मंत्रान्ते एवं विष्ट
रमुदगग्रमासने निधायाभ्युपविशति । पादयोरन्यं विष्टर आसीनाय । विष्टरे आसीनायाद
पान्यं विष्टरं यजमान ४ पूर्ववद्ददाति । स च तं पूर्ववत्प्रतिगृह्य प्रक्षालितयोः पाद
रधस्तात् वर्ष्मोस्मीत्यनेन मंत्रेण निदधाति । सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्रा
ह्मणश्चेद्दक्षिणं प्रथमं । ततो अन्येन पाद्यमिति त्रिरुक्ते यजमानार्पितं पाद्योदकमादाय वामं
णं प्रक्षाल्य इतरं प्रक्षालयति क्षत्रियादिरर्घ्यः । यदि ब्राह्मणोर्घ्यः स्यात्तदा प्रथमं दक्षिणं
क्षाल्य वामं प्रक्षालयति विराजो दोहोसीत्यावृत्तेन मंत्रेण । अर्घ्यं प्रतिगृह्णाति । ततो र्घ इत्य
त्रिरुक्ते यजमानेन दत्तमर्घ्यं आपस्थ युष्माभिरित्यनेन मंत्रेण प्रतिगृह्णाति । निनयन्नाभि

१८॥

18

त्र्यते समुद्रंवः इति। प्रतिगृह्णीतमर्घं शिरसाभिवंद्य निनयन् मूमो प्रवाहयन्। अग्निमं
ते समुद्रव इति मंत्रेण। आचामत्यामागन्निति। तत आचमनीयमिति त्रिरन्यो नैयजमा
नं आचमनीयं प्रतिगृह्णामागन्यशसेत्यनेन मंत्रेणाचामति। सकृत्प्राश्नाति जलं ततः
र्नैमाचमनं करोति। एवं पूर्वं त्रमित्रस्य त्वेति मधुपर्कं प्रतीक्षते। ततो मधुपर्क इति त्रिर
न्येयजमानहस्तगतमुद्धारितं मधुपर्कं मित्रस्य त्वेति मंत्रेण चक्षुः प्रतीक्षते पश्यति। दे
वेति प्रतिगृह्णाति। देवस्य त्वेति मंत्रेण यजमान दत्तं मधुपर्कं दक्षिणहस्तेन प्रतिगृह्य
सव्यपाणौ कृत्वा दक्षिणस्यानामिकयास्त्रिः प्रयौति नमः श्यावास्येति। तं मधुपर्कं वाम
हस्ते निधाय दक्षिणस्य पाणेः अनामिकांगुल्या त्रिवारमालोडयति। नमः श्यावास्येति
त्रेण। अनामिकांगुष्ठेन च त्रिर्निरुक्षयति। अनामिका च। अंगुष्ठश्च अनामिकांगुष्ठे ते
त्रिवारं निरुक्षयति पात्राद्बहिर्निर्गमयति चकारात् प्रतिसंयवैनं निरुक्षणं। तस्य त्रि

म१

श्नातियन्मधुनो मधव्यमिति। तस्य मधुपर्कस्य एकदेशमेकदेशमादाय यन्मधुनो मधव्य
मित्यादिना मंत्रेण सकृत्प्राश्य। पुनरनेनैव मंत्रेण उच्छिष्टं द्वितीयं प्राश्य। तथैव तृती
यं प्राश्नाति मधुमतीभिर्वा प्रत्यृचं। मधुवाता इति तिसृभिः ऋग्भिः प्रत्यृचं प्रतिमंत्रं वा पूर्व
वत्त्रिः प्राश्नाति पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्सर्वं वा प्राश्नीयात्प्राग्वा
संचरे निनयेत्। मधुपर्कस्य शेषप्रतिपत्तिमाह। पुत्राय सूनवे अन्तेवासिने उपनयन
प्रभृति विद्यार्थित्वेन आचार्यकुलवासिने शिष्याय वा कथंभूताय उत्तरत आसीनाय उ
च्छिष्टं प्राशितशेषं मधुपर्कं प्रयच्छेत्। अथवा सर्वं भक्षयेत्। यद्वा प्राक् पूर्वस्यां दि
श्यसंचरे जनसंचाररहिते देशे त्यजेत्। अत्र पूर्वपूर्वाभावे उत्तरोत्तरां प्रतिपत्तिं कु
र्यात्। आचम्य प्राणान्संमृशति। वाङ्म इत्यादिभिर्मंत्रैः। तद्यथा। आचमनं सकृन्मं

ततस्त्रिरात्रस्य एवं पूर्ववत्स्मार्तमाचमनं कृत्वा वाग्यता आस्ये स्वस्ति मुखं कराग्रेण। नमो मे
स्वस्तित अन्यं गुष्ठाभ्यां युगपद्दक्षिणादिनासारंध्रेष्व घ्राणो मे चक्षुरस्त्विति श्रनामिका
भ्यां युगपच्चक्षुषी। कनिष्ठयो मे श्रोत्रमस्त्विति मंत्रावृत्त्या दक्षिणोत्तरौ कर्णौ बाह्वो मे ब
मस्त्विति करौ वा बाहू। ऊर्वो मे ओजोऽस्त्विति युगपद्धस्तेनोरू। अरिष्टानि मेऽङ्गानि तनूस्त
नेस हस्त्विति शिरः प्रभृति पादांतानि सर्वाण्येवं गात्राण्युभाभ्यामालभेत। आचान्तोदक
पशासमादाय गौरिति त्रिः प्राह प्रत्याह। आचांतमुदकं येन स आचान्तोदकस्तस्मै अर्घ्यं प
सं खड्गहस्तो हीत्यायत्तमानः गौ। गौर्गौः आलभ्यतामिति प्राह ब्रवीति ततोऽर्घ्यः प्रत्याह म
ताः रुद्राणां मा दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनु वोचं चिकितुषे जनं
यमा गामनागामदितिं वधिष्ट। मम चामुष्य च पाप्मानं हनोमीति यद्यालभेत। ततो द

= र्नुमित्यंतं उपांशु पठित्वा उत्व. तत्र

मातारुद्राणामित्यादि वाशिष्ठेत्यंतं मंत्रं पठित्वा मम च अमुकशर्म्मणो यजमानस्य च पाप्मानं हनो
मीति पठति यदि गामालभेत । अथवा यद्युत्सृजेत् । अथवा अद्येत्यादि गामुत्सृजे हुं उद्धे तद
मम च अमुकशर्म्मणो यजमानस्य च पाप्मा हतः र्नुमुत्सृजत तृणान्यत्त्विति ब्रूयादित्यंतं उच्चैः प
ठेत् । न त्वेवामांसोऽर्घः स्यात् । तुशब्दः पक्षव्यावृत्त्यर्थः । अर्घः अमांसः पश्वालंभवर्जितो नैव भव
त । अत्र यद्यालभेत यद्युत्सृजेदित्यनेन सूत्रेण गवालंभस्य विकल्पं विधाय न त्वेवामां
सः इत्यनेन गवालंभं अर्घमात्रे नियमेन विधत्ते । तथा च सति द्वयोः सृत्योर्विरोधे अ
त्ये प्राप्ते व्यवस्थामाह । अर्घियजमाधि विवाहं कुरुते त्येव ब्रूयात् । अर्घियजं यजेता अ
र्हं विवाहे । कुरुत विदधत गवालंभं पाप्मानं हनोमीत्यस्यांते इत्येवं वदेत् । अन्यत्र
हतः । पाप्मानं हनोमीति वा विकल्प्य । नान्यत्रेति भावः । यद्यप्येवं मधुपर्के गवालंभ आ
तः तथापि अस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च कलौ न विधेयः । अस्वर्ग्यं लोकविद्विष्टं धर्म्म

२०॥

चरेन्नाग्निति याज्ञवल्क्यादिस्मृतिषु निषेधदर्शनात्। य[illegible]घप्पसवत्संबत्सरस्य
ऽतेत्कृताग्र्यप्येनं याजयेयुर्न्नोकृताग्र्या इति श्रुतेः। यद्यपि सं:वत्सरस्य संवत्स
स्तुनः पुनः सोमेन ज्योतिष्टोमादिना यजेत तदा तदापि एनं सोमयाजिनं कृताग्र्यो
कृताग्र्याः एव संतः याजयेयुः यज्ञं कारयेयुः नैकृताग्र्यो याजयेयुरिति श्रौवचना
न यजेत्यनेन सोमयागार्थमेव कृताग्न्यित्विजः अग्र्या इति गम्यते। न यागांतरार्थं। च
पाकयज्ञाः। पच्यते श्रप्यते पुंदनादिकमस्मिन्निति पाको गृह्याग्निः तस्मिन्पाके ना
तिभावः पाकेयज्ञाः पाकयज्ञाः यतः वैवाहिकेग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि। पंचय
विधानं च पक्तिं चान्वाहिकीं गृहीति मनुना दैनंदिनपाको गृह्येग्नौ स्मर्यते तति चत्वा र
तुर्विधा भवंति। कथं। हुतो हुतः प्रहुतः प्राशित इति। तत्र हुतः होममात्रः यथा सायं प्रा
होमः। अहुतः। होमबलिरहितं कर्म यथास्तरारोहणं। प्रहुतो यत्र होमो बलिकर्म

न्नणंचयथापन्नादिकर्म्मार्थ्यशितः यत्रप्राशनमात्रंनहोमोबलिः यथासद्योसांगवांपयसिपा
यसश्रपणंनंतरंब्राह्मणभोजनमित्थंचतुर्विधाः। पंचसुबहिःशालायांविवाहेचूडाकरणउ
पनयनेकेशांतेसीमंतोन्नयने। पंचसुसंस्कारकर्म्मसुबहिःशालायांगृहाद्बहिःशालाबहिः
शालामंडपइतियावत्। तस्यांकर्म्मभवति। यथाविवाहेपरिणये। चूडाकरणेद्वारकर्म्मणि। उ
पनयनेमेखलाबंधे। केशांतेगोदानकर्म्मणि। सीमंतोन्नयनेभैंगेसंस्कारे। अन्यत्रगृहा
तरेमुख्यशालायामेव। उपलिप्तउद्धृतावोक्षितेऽग्निमुपसमाधाय। उपलिप्तेगोमयोदकेन
द्धृतेस्फ्येनोल्लिखितेतिस्रष्टाभिःरेखाभिः अवोक्षितेउदकेनाभ्युक्षिते। बहिःशालागृहयोःअन्य
रस्मिन्प्रदेशे। अग्निमुपसमाधाय। अग्निंलौकिकमावसथ्यंवा। उपसमाधायस्थापयित्वा। अ
वलेपनादिविधिर्नोपूर्वैः। अपितुपरिसमुह्येत्यादिपूर्वोक्तास्येनानुवादः। ततश्चात्रानुक्त
पिपरिसमूहनंउद्धरणंचसर्वत्रभवति। एवमेवविधिर्यत्रक्वचिद्धोमइतिवचनात्तानिकर्म्मै

द्विविवाहे एके आचार्याः विवाहे पाणिग्रहे निर्मन्थ्यमारणेयमग्निं वैवाहिकहोमाधिकर
छंति। अथ विवाहाख्यं कर्माह। उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं
यात। उदगयने मकरादिराशिषट्कस्थिते रवौ। आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे ज्योति
स्त्रोक्तविघ्नादिदोषरहिते कुमार्याः अनन्यपूर्विकायाः कन्यायाः। अनेन विंशतिप्रस्तुत
स्य तंत्ररविहितस्य पुनर्विवाहस्यानियमात् इच्छाचेत्करोति। पाणिं गृह्णीयात् पाणिं हस्त
गृह्योक्तविधिना गृह्णीयात्। अस्मिन् अयनपक्षे दिनानि नियम्य नक्षत्रनियममाह। त्रि
त्रिषूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा। उत्तराः आदिर्येषां तान्युत्तरादीनि। तेषु
षु तथाहि उत्तरा हस्तचित्रा इति त्रीणि। उत्तराश्रवणधनिष्ठा इति त्रीणि। तथा उत्तरा रेव
त्यश्विनी इति त्रीणि। स्वातौ मृगशिरसि रोहिण्यां वा एतेषां नक्षत्राणामन्यतमे इत्यर्थः ॥ वृ
ध्याः पाणिं गृह्णीयात्। इति सामान्येनोक्तं। तत्र विशेषमाह। तिस्रो ब्राह्मणस्य वर्णानु

ग्र२ मा१ =ग्र१

सर्वेषां ४

णहे राजन्यस्यैका वैश्यस्या ब्राह्मणस्य द्विजात्यस्य वर्णानुपूर्व्येण वर्णक्रमेणातिस्य ब्राह्मणो क्ष
त्रियावैश्यां विवाह्या भवन्ति। हे क्षत्रियावैश्ये राजन्यस्य विवाह्ये भवतः। एका वैश्यैव वैश्यस्य
विवाह्या भवति। वर्णानुपूर्व्यग्रहणात्तत्क्रमो निषिद्धः। स [illegible] षाठं शूद्रामप्येके मंत्रवर्जं।
ब्राह्मणक्षत्रियविशां शूद्रामप्येके विवाह्यां मन्यन्ते। तत्र विशेषः मंत्रवर्जं मंत्ररहितं यथा
भवति तथा। अत्र द्विजातीनामपि शूद्रापरिणयने आचार्येण मंत्रवत्क्रियानिषेधात् शूद्रस्य
शूद्रापरिणयने मंत्रवत्क्रिया नास्ति किंतु मंत्ररहितं क्रियामात्रं इति गम्यते। ततश्च शूद्र
शूद्रापरिणयने यन्मन्त्रवद्धोमादिकर्म कुर्वन्ति तदशास्त्रीयं एके मन्यन्ते शूद्राविवाहं कु
शूद्रायाः कर्म्मकार्येष्वनधिकारात्। कुतोऽनाधिकार इति चेत्। रामा रमणाय वित्तदत्ते न
धर्म्माय चेति निरुक्तकारयास्कः इति वचनात्। अतो रमणार्थं शूद्रापरिणयनं पठेत्। एवं स
वर्णासादीक्षासंवत्सरदीक्षानंतरं अग्न्यं वित्वा प्रथमं नरामुपेयादिति निषेधः उपप

२२॥ प्राप्तं हि प्रतिषेधस्य विषयः यदि रामो छानस्यात्। तदा अग्निचितः कथं तत्प्रथमगमः
तिथि स्यात्। तस्मात्क्रीडापरिणयनं भोगार्थं इच्छया कुर्वतो न शास्त्रातिक्रमः। धर्म्मप्रजारत्व
ह विवाहः। प्रासंगिकमभिधाय इदानीं प्रकृतमाह। तत्र पुण्ये हनि। अथैनां वासः परिधा
ति जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा। शतं च जीव शरदः सुवर्च्चा रा
पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास इति। सूत्रं। अथाग्निस्थापनानंतरं एनां कु
मारीं वासः अहतं सदशं वस्त्रं परिधापयति परिहितं कारयति वरः जरां गच्छेति मंत्रं पठि
। कुमारी च स्वयं परिधत्ते। अथ उत्तरीयं या अकृंतन्नवयं या अतन्वत याश्च देवीस्तन्तू
भितो ततंथ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति। सूत्रं। अथ अंतः
य परिधानानंतरं उत्तरीयं वासः परिधापयति वरः। या अकृंतन्निति मंत्रमुक्त्वा। अत्र परि
धापयतीति णिजंतस्य कारितार्थत्वात् परिधत्स्व वास इति मंत्रस्यापि तदर्थत्वात् परिधापा

तान्यः इत्यवगम्यते। स किंवरः अध्वर्युर्वा। इति संशयः। तत्राध्वर्युः कर्मसु वेदयोगादितिप
रिभाषाबलात्। अध्वर्युः परिधापयितेति चेत्। न। स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्वयोगाभा
वात्। समाख्यया हि अध्वर्योः कर्मसु योगः। समाख्या च वेदयोगात्। न च स्मृतिर्वेदः। स्मर
णादेव स्मृतीनां प्रामाण्यात्। न पुंर्वेदमूलत्वेन। अतः समाख्याया अभावात्। स्वयं कर्तृत्वं पा
कयज्ञेषु। अतो वर एव परिधापयिता। ननु पूर्णपात्रो दक्षिणा वरो वेति पाकयज्ञेषु पारिक्र
यार्थो दक्षिणा श्रूयते। सा च दक्षिणा परिक्रेतव्याभावेनोपपद्यते। अतस्तदन्यथानुपप
त्या अन्यस्य कर्तृत्वं कल्प्यतां। नैतदेवं। अन्यस्य ब्राह्मणः कर्तुर्विद्यमानत्वात् परिक्रयार्थे द
क्षिणाश्रवणस्योपपत्तेः। किंच। वचनाभावे परः परस्य कर्मकर्तुं न प्रवर्तते। नात्र वच
नमस्ति पाकयज्ञेषु स्वतोन्यकर्तृत्वविधायकं श्रौतवत्समाख्यापि नास्ति। ननु स्मृतीनां
वेदमूलत्वात् यद्वेदमूलं स्मार्तं कर्म तद्वेदसमाख्याया अन्यस्य कर्तृत्वं कल्प्यतामेवं।

स्मृतयो निश्चितवेदमूला:॥ अतो न ज्ञायते किं वेदमूलमिदं कर्म्म। यद्वेदसमाख्याय-
न्य: कर्त्ता कल्प्येत मंत्रलिंगविरोधोपि परकर्तृत्वात्। कथं सोमनुव्रता भव प्रजापतिष्ट्वा
नक्तु मह्यं॥ अमोहमस्मीत्यादि सा न: पूषा शिवतमामेत्यादयो वैवाहिका मंत्रा: आत्म-
गा: ते च परकर्तृत्वे विरुध्यंते॥ तस्मात्याकयज्ञेषु स्वयं यजमानस्यैव कर्तृत्वमिति सिद्धं
त्र वरोपि वाससी परिधत्ते॥ परिधास्यै यशसामेति मंत्राभ्यां॥ अथैनौ समंजयति समंजं-
तु विश्वेदेवा: समापो हृदयानि नौ। समातरिश्वा संधाता समुदेष्ट्री दधातु नाविति॥ सूत्रे
अथ वस्त्रपरिधानानंतरं परस्परं समंजयातामिति प्रैषेण कन्यापिता एनौ वधूवरौ सम-
ति संमुखौ वरकुमार्यौ करोति॥ तत्र वर: समंजंतु विश्वेदेवा इत्यादिकं मंत्रं वर: कन्या सं-
खी मूत: पठति॥ अत्र कन्यादानप्रयोगो लिख्यते। उत्तरत्र पित्राप्रत्तो दाता। सूत्राणि॥ तद्यथा
अमुकं गोत्रस्य अमुक ३ प्रवरस्यामुकशर्म्मण: प्रपौत्राय॥ अमुकं गोत्रस्य अमुक ३ प्रवर

स१ स२

स्य अमुकशर्म्मणः पौत्राय अमुकसगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पुत्राय इति वरप

क्षे। अमुकसगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः प्रपौत्री अमुकगोत्रस्य अमुक ३ प्रवरस्य

अमुकशर्म्मणः पौत्री। अमुकसगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पुत्री इति कन्याप

क्षे। एवमेव पुनर्वारद्वयमुच्चार्य। अमुकसगोत्राय। अमुक ३ प्रवराय अमुकशर्म्मणे ब्राह्मणा

य इति ब्राह्मणपक्षे। इतरपक्षे वर्म्मणे। अमुकगुप्ताय अमुकदासाय इति विशेषः। अमुकगो

त्रां अमुक ३ प्रवरां अमुकनाम्नीमिमां कन्यां प्रजापतिदैवतां यथाशक्त्यलंकृतां पुराणोक्तां

कन्यादानफलकामः भार्यात्वेन तुभ्यमहं संप्रददे इति सकुशेन जलेन कन्याहस्तं वरस्य हस्ते

दद्यात्। वरश्च द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णात्विति मंत्रेण प्रतिगृह्णीयात्। ततः को

दादिं कामस्तुतिं पठेत्। ततः कृतैतत्कन्यादानप्रतिष्ठार्थं सुवर्णं गोमिथुनं च दद्यात्। द

त्त अर्द्धहारादन्यदपि यौतकत्वेन सुवर्णरजतताम्रगोमहिष्यश्वग्रामादिकं कन्यापि

ता१ ब१

ति२

२४॥

यथासंभवं ददाति। अन्येपि बांधवादयः४ यथासंभवं यौतकं प्रयच्छंति। केचन यौतकं हो-
प्रयच्छंति। अत्र देशाचारः। ततो वरस्यापित्रा प्रत्तामादाय गृहीत्वा निष्क्रामेत। पित्रा जन-
प्रत्तां संकल्पदत्तां आदाय प्रतिग्रहविधिना प्रतिगृह्य गृहीत्वा हस्ते धृत्वा निःक्रामेत्।
हमध्यात् मंडपाद्वा अग्निसमीपं गंतुं। यदैषि मनसेत्यादिना मंत्रेण करोत्वमुक्ति। द्वावि
तेन अत्रापि त्रेत्युप्लहणं। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पू
शे प्रकृतिस्थः परः पर इति याज्ञवल्क्येन अन्येषामपि कन्यादाने अधिकारस्मरणात्। अ
नौ समीक्षयति। अथ निःक्रमणानंतरं एनौ वधूवरौ परस्परं समीक्षेथामिति प्रेषेण
पिता समीक्षयति समीक्षणं कारयति तत्र समीक्षमाणो वरः अघोरचक्षुरित्यादीन्
विध्याइत्यंतान्मंत्रान्पठति॥४॥ प्रदक्षिणमग्निं पर्याणीयैके। एके आचार्याः अग्नेः प्रद
क्षिणं कारयित्वा वासः परिधानं समंजनं समीक्षणं च मन्यंते। पश्चादग्नेस्तेजनीं कटं वा दक्षि

प्र वृत्य
प्र ३

पादेनप्रदक्षणोपविशति। समीक्षणानंतरंश्च ग्नेःप्रदक्षिणीकृत्याग्नेःपश्चिमतःप्राङ्मुखउ
पविशति। दक्षिणतोब्रह्माकिंकृत्वादक्षिणपादेनतेजनीतृणपूलिकांकटंवातृणमयंस्व
रंडमप्युत्क्षिप्येत्यर्थः। दक्षिणपादेनउल्लंघयन्ववलित्वा। उभयोःसंस्कार्येत्वास्रवधूक
अन्वारब्धआघारावाज्यभागौमहाव्याहृतयःसर्वप्रायश्चित्तंप्राजापत्यंस्विष्टकृच्चेत
त्सर्वत्रअन्वारब्धेवाहिकोहोमप्रसंगेनसर्वेकर्मधर्मपरिभाषांकरोत्याचार्यः।
तद्यथा। ब्रह्मणादक्षिणेबाहौदक्षिणहस्तेनअन्वारब्धेकर्त्तरिआघारसंज्ञकेआज्याहुते
थामनसाप्रजापतयेस्वाहा। इदंप्रजापतयेमनसात्यागमपि। इन्द्रायस्वाहा। इदमिन्द्राय
ज्यभागौ। आज्यभागसंज्ञकौहोमौयथा। अग्नयेस्वाहा। इदमग्नये। सोमायस्वाहा। इदंसो
माय। महाव्याहृतयः। भूरग्नयेस्वाहा। इदमग्नये। इदंभुवो। इतित्याग
तयेवभुवःस्वाहा। इदंवायवे। इदंभुवइतिवा। स्वःस्वाहा। इदंसूर्यायादःइदंस्वःइति

२५।।

सर्व्वप्रायश्चित्तं। सर्व्वप्रायश्चित्तसंज्ञका: पंचाहुतय: यथा। त्वन्नोअग्नेइत्यादिप्रमुमुग्ध्यस्म
हा। सत्वन्नोअग्नेसुवहवोनएधिस्वाहा। इदमग्नीवरुणाभ्यांद्वाभ्यांत्यागः। अयाश्चाग्नेस्यनभि
स्तिपाश्चसत्यमित्वमयाअसि। अयानोयज्ञंवहास्यानोधेहिभेषजं स्वाहा। इदमग्नये। येते
शतंवरुणायेसहस्रंयज्ञियापाशावितता महांतः। तेभिर्न्नोअद्यसवितोतविष्णुर्विश्वेमुंचंत
मरुतःस्वर्क्का: स्वाहा। इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः।।उदुत्त
मित्यादि अदितयेस्यामस्वाहा। इदं वरुणाय। प्राजापत्यं प्रजापतिर्देवताको होमः। यथा
प्रजापतयेस्वाहा। इदं प्रजापतये। स्विष्टकृच्च। स्विष्टकृद्धोमश्च। यथा। अग्नयेस्विष्टकृते स्वाहा।
इदमग्नयेस्विष्टकृते। चकारः सर्व्वसमुच्चयार्थः। एतन्नित्यं सर्व्वत्र। एतदाद्याराद्विस्विष्ट
कृदवसानं सर्व्वत्र। सर्व्वेषु होमात्मकेषु कर्म्मसु नित्यं यत्र होमाभावस्तत्र नास्ति यथा स्वस्तरा
रोहणलांगलयोर्यजनयायमञ्ञा हृणभोजनेषु अंते पुविहितस्यैस्विष्टकृदन्यद्वेदाज्या

हविः। महाव्याहृतिभ्यः प्राक् पूर्वं स्विष्टकृत् प्रयोगो भवति। चेद्यदि आज्यात्तस्सकाशादन्यदापच
रुपमिति हविर्भवति केवलाज्ययोगे सर्वाहुतिशेषे भवति। सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदवा
पस्यानं विवाहे। सर्वप्रायश्चित्तं त्वन्नो अग्न इत्यारभ्य उदुत्तममित्यंतं आहुतिपंचकं प्राजापत्यः प्रा
जापत्याहुतिः सर्वप्रायश्चित्तं च प्राजापत्यश्च सर्वप्रायश्चित्तप्राजापत्यौ तयोरंतरं सर्वप्राय
श्चित्तप्राजापत्यांतरं एतत् आवापस्थानं कस्मिन्कर्म्मणि विवाहे। आवापस्थानं। आवापः अन्य
त्राविहितस्य होमजपादेः कर्म्मणः कर्म्मान्तरे प्रक्षेपः। आवापस्य आगंतुकत्वेन अंते निवेशो यु
क्तो न्यायात्। तान्निवृत्त्यर्थं तमेवावापमाह। राष्ट्रभृत्संज्ञका आहुतीः आवपेदित्यध्याहार
जयाभ्यातानां श्च। सूत्रं। जयाश्च अभ्यातानाश्च। जयाभ्यातानाः। तान् जयाभ्यातानांश्च। आव
न् किं कुर्वन्निच्छन्। राष्ट्रभृज्जयाभ्यातानां होमफलं कामयमानः। किं प्रमाणमिति चेत्।
नत्येन कर्म्मणा ऋध्नुयादिति वचनात्। सूत्रं। येन कर्म्मणा यस्मिन्कर्म्मणि र्त्सेत् तेन यत्फलं भव

राष्ट्रभृत्
तर इच्छन्।
सूत्रं। वि
वाहे वेदि
त्रि कर्तोम
कर्म्माणि
राष्ट्रभृ
तः ४

२६॥

तिजानान्नविदन्।तत्कर्म्मफलमिछन्नतस्मिन्नकर्म्मणितत्कर्म्मआवपेदितिवचनाच्छ्रुतेःअ
र्थेः।तत्रराष्ट्रभृतोयथा॥ऋताषाडृतधामाग्निर्गंधर्वइत्यादिकाद्वादशमंत्राःराष्ट्रभृत्संज्ञक
चित्तंचचित्तिश्चाकूतंचाकूतिश्चविज्ञातंचविज्ञातिश्चमनश्चशक्करीश्चदर्शश्चपूर्णमासश्च
बृहद्रथंतरंचप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाजयेषुतस्मैविशःसमन
मंतसर्वाःसउग्रःसइहव्योबभूवस्वाहा।सूत्रं।चित्तंचेत्येवमादीनांचतुर्थ्यंतानांकेचिदाह
तदसांप्रतंकुतः।नह्येतानिदेवतापदानिकिंतुमंत्राःएतेमंत्राश्चयथाम्नाताएताएवयुज
।अग्निर्भूतानामधिपतिःसमावत्विंद्रोज्येष्ठानांयमःपृथिव्यावायुरंतरिक्षस्यसूर्योदिवश्चं
द्रमानक्षत्राणांबृहस्पतिर्ब्रह्मणोमित्रःसत्यानांवरुणोपांसमुद्रःस्रोत्यानामन्नंसाम्रा
ज्यानामधिपतितन्मावतुसोमओषधीनांसविताप्रसवानांरुद्रःपशूनांत्वष्टारूपा
णांविष्णुःपर्वतानांमरुतोगणानामधिपतयस्तेमावंतुपितरःपितामहाःपरेवरेततास्तता

इहमावत्वास्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यां ८
स्वाहेति। सूत्रं। अभ्यातानसंज्ञा काह्येते अष्टादशमंत्राः। सर्वत्रानुषजति। अग्निर्भूतानामि
त्यादि पितरः पितामहा इत्यंतेष्वष्टादशसु मंत्रेषु। प्रतिमंत्रं यथालिंगं यथावचनं समावहि
त्यादि देवहूत्यां ८ स्वाहेत्यंतं वाक्यैकदेशं अनुषजति संयुनक्ति। अग्निरेत्वित्यादि परंमृत्य
वितिचैके प्राशनांते इत्यंतां सूत्रं। अग्निरेत्वित्यादिकाः परंमृत्यवित्यंताः पंचमंत्राः परंमृत्यवि
ति जुहुयात्। एके आचार्याः परंमृत्यवित्येतामाहुतिं प्राशनांते संस्रवप्राशनांते जुहुयादिच्छ
न्तीति उदकस्पर्शः।।५।। कुमार्या भ्राता शमीपलाशमिश्रांल्लाजानंजलिनांजलावावपति
तां जुहोति सं ८ हतेन तिष्ठती। सूत्रं। कुमार्याः कन्यायाः भ्राता शमीपलाशमिश्रान् लाजा
न् शमीपत्रयुक्तान् भ्रष्टानि धान्यानि अंजलिना कृत्वा बद्धांजलौ आवपति। निक्षि
ति। तां जुहोति। तान् अंजलिस्थान् लाजान् संहतेन मिलितेन अंजलिना जुहोति।

२७॥

गुप्र्ष्ठ
अ ५

ति१

वाहाग्नेःप्रदक्षिणं परितिष्ठती ऊर्ध्वा अर्यमणं देवमित्यादि इयं स्वाहेत्यं तं सूत्रं। अर्यमा
देवमित्यादि प्रथमं। इयं नार्युपब्रूत इति द्वितीयं। इमां लाजानावपामीति तृतीयं। अ
स्यै दक्षिणं हस्तं गृह्णाति सांगुष्ठं गृभ्णामि ते सौभगत्वायेत्यादि श्रणु यावन शरदः शत
मित्यंतं सूत्रं। अथ लाजाहोमानंतरं अस्यै अस्याः कुमार्याः दक्षिणं हस्तं गृह्णाति स्वद
क्षिणहस्तेन आदत्ते। कीदृशं हस्तं सांगुष्ठेन सहितं। अथैनामश्मानमारोहयत्युत्तरतो
दक्षिणपादेना आरोहेममित्यादि पृतनायत इत्यंतं सूत्रं।

अथ पाणिग्रहणानंतरं एनां वधूं अश्मानं दृषदं उत्तरतो अग्नेर्ध्रुवमाणं द
क्षिणपादेन कृत्वा रोहयति। आरोहेममित्यादि पृतनायत इति मंत्रेण। अथ गाथां गा

५२ गाथा १

अथ अश्मारोहणानंतरं गाथां गायति। तां गाथां सरस्वति प्रेदमवेत्यादिकां उक्तमंपश्चात् रूपंतौ। अथ परिक्रांतस्त्वममग्रेडति। अग्निर्यासप्तार्यो अग्निं प्रादक्षिण्येन परिक्रामतो वधूवरौ तत्र मंत्रः। तुभ्यमग्रेपर्यवहन्नित्यादिकस्य प्रजापतिर्ऋषिः तस्य मंत्रस्य वरपठितस्यो

गाथा २

ते। अश्वारोहणादि परिक्रमणं ते रेषु कर्म्म सु वरएव मंत्रानापठति। एवं द्विरपरं लाजा

दि। एवमुक्तप्रकारैर्द्विः वार इदं अपरं पुनरपि लाजादिकुमार्या भ्राते त्यारभ्य परिक्रमणान्तं

कर्म्म भवति। चतुर्थं शूर्प्प कुष्ठया स र्व्वोला जा ना वपति भगाय स्वाहेति। ततः तृतीयं परिक्रम

णानंतरं कुमार्या भ्राता शूर्प्प कुष्ठया शूर्प्पस्य कोणेन स र्वा न् यावन्तः पूर्व्वं वाशिष्टान् लाजान्

न् कुमार्या अञ्जलौ संश्रावपति निक्षिपति। तान् लाजान्नातिष्ठती कुमारी भगाय स्वाहेति। तां मंत्रे

णा चतुर्थं जुहोति। ततः समाचारात्सर्व्वैरपि चतुर्थं परिक्रमणं वधूवरौ कुरुतः। ततोनंतरं यो त्त्रिं। एतत्

या रत्नेः कारणस्य अवास्य अभावात्। ब्रह्मा अग्नेरंतरागमनं हि रतरया वृत्तिकारणं

२८॥

प्रत्तर१

इति चेत्। हविष्पात्रस्योँमृत्विजां पूर्वं पूर्वमंतरमृत्विजां च यथा पूर्वमिति परिभाषासूत्रात् ततः
परिक्रमणं कुर्वंतौ वधूवरौ ब्रह्माग्न्योर्मध्येन गच्छेतां। त्रिः परिणीतां प्राजापत्यं हुत्वा। पूर्ववदु
श्यः प्रजापतये स्वाहेति ब्रह्मान्वारब्धे हुत्वा इदं प्रजापतय इति त्यागं विदध्यात्। अथैनामुदीचे
सप्तपदानि प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पंच पशुभ्यः
तुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुषजति। सूत्रं। अथ
ज्ञौँत्यहोमानंतरमेनां वधूं उदीचीं उदङ्मुखीं ऽसप्तपदानि प्रक्रामयति। सप्तप्रक्रामणं द
पादेन कारयति उत्तरोत्तरं बरः। कथंभूतां त्रिः परिणीतां त्रीन्वारानग्नेः प्रादक्षिण्येन नीता
तां। इति व्यवहितेन संबंधः कुतः पाठक्रमादर्थक्रमो बलीयान् इति न्यायात्। एकमिषे इ
त्यादिभिः सप्तभिर्मंत्रैः तद्यथा। एकमिषे विष्णुस्त्वा नयत्विति वरेणोक्ते मंत्रे वधूरेकं पदं उदग्द
ति तथा द्वे ऊर्जे विष्णुस्त्वा नयत्विति मंत्रांते द्वितीयं। त्रीणि रायस्पोषाय विष्णुस्त्वा नयत्विति तृ

५
४
५५

त्रतीयं। चत्वारि मायोभवाय विष्णुस्त्वा नयत्विति उक्ते चतुर्थं। पंच पशुभ्यो विष्णुस्त्वा नयत्वित्यु
क्ते पंचमं। षड्ऋतुभ्यो विष्णुस्त्वा नयत्वित्युक्ते षष्ठं। सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा
नयत्वित्युक्ते सप्तमं। विष्णुस्त्वा नयत्वित्येतावन्मंत्रभागं सर्वत्र एकमिष इत्यादिषु मं[illegible] सर्वेषु मं
त्रेषु अनुषज्जात संबध्नाति। निष्क्रमणप्रभृति तु उदकुंभं स्कंधे कृत्वा दक्षिणतो ग्नेर्वाग्यतस्तिष्ठे
तामवतु त्वरं एकेषां निष्क्रमणप्रभृति पित्रा प्रत्तामादाय गृहीत्वा निःक्रामतीत्यादि तत आरभ्य
काश्यपुरुषो जलपूर्णं कलशं स्कंधे धनि[illegible]धाय वधूवरयोः पृष्ठत आगत्य अग्नेर्दक्षिणस्यां दिशि
मोनोस्थित आस्ते। केषांचित्पक्षे उत्तरतः। तत एनां मूर्द्धन्यभिषिंचतीत्यादि आपो हि ष्ठे
तिचाति स्थितः। इत्येतावत्सूत्रं। ततस्तस्मात्स्कंधस्थितादुदकुंभात् आचारादाम्रादिपल्ल
वसहितेन हस्तेन जलमादाय एनां वधूं मूर्द्ध्न्यभिषिंचति वरः। आपः शिवा इत्यादिनाभेष
जमित्यंतेन मंत्रेण। पुनस्तथैवोदकमादाय आपो हि ष्ठेत्यादि आपो जनयथा च न इत्यंत

विवाह २

२४॥

४१

मिस्तिस्तमिर्जौष्ट्रिः। अभिषिंचतीतिचकारादं[illegible]नुषज्यते। अथैनां सूर्यमुदीक्षयत
च्चक्षुरिति। अथ अभिषेकादुपरि सूर्यमुदीक्षस्वेतिप्रैषेण सूर्यं एनां वधूं वर उदीक्षय
सूर्यं निरीक्षणं कारयतीत्यर्थः। सा च वरप्रेषिता सती तच्चक्षुरिति मंत्रेण सूर्यं निरीक्ष
देवाविवाहपक्षे। अथास्य दक्षिणांसमधि हृदयमालभते। अथ सूर्योदीक्षणानंतर
स्य रात्रिषष्ठ्यर्थे चतुर्थी। अस्या वध्वाः दक्षिणांसमधि दक्षिणस्य स्कंधस्योपरि हस्तं नीत्वा
तस्या हृदयमालभते वरः स्पृशति। मम व्रते ते हृदयं दधामीत्यादिना नियुनक्तु मह्यमित्यंते
मंत्रेण। अथैनामभिमंत्रयते सुमंगलीरित्यादिना विपरीतेनेत्यंतेन मंत्रेण। अथ हृदयालंभनानं
तरमेनां वधूं वरोभिमंत्रयते सुमंगलीरित्यादिना मंत्रेण। अत्राशिष्टसमाचारात्। उत्तरतश्चायत
हिस्त्रीतिश्रुतिलिंगाच्च वधूर्वरस्य वाममभाग उपवेशनंति। तां दृढपुरुष उन्मथ्य प्राग्वोदग्वा
नुगुप्तागारे अनडुहे रोहिते चर्मण्युपवेशयति र[illegible]वरति। सूत्रं। ततः तां वधूं दृढ

रुषःवलवान्कश्चित्सुमाभिन्नउन्मथ्यउत्थाप्यवध्याक्पूर्वस्यांवादिशिउदक्उदीच्यांवादि
शिप्रहर्वकल्पितेअनुगुप्तेसर्वतःपरिवृतेआगारेगृहेतत्रचपूर्वमास्तीर्णेअनडुहेआर्षभे
रोहितेलोहिते [illegible] लोहितवर्णेचर्मणिआजिनेप्राग्ग्रीवेउत्तरलोम्नि।उपवेशयतिरहगाव
इत्यादिजानिषीदत्वित्यस्यमंत्रस्यपाठांते।केचनजामातेवद्दृढपुरुषंदत्याहुः।तत्पक्षेजामाते
ववधूमुद्धृत्यमंत्रमुक्त्वाचर्मणि [illegible] पूपवेशयति।ततआगत्ययथास्थानमुपविश्यब्रह्मान्व
रब्धःस्विष्टकृद्धोमंविधायसंस्रवंप्राश्यब्रह्मणेपूर्णपात्रंवरयोरन्यतरंदक्षिणांदत्वा
कीयाचार्याय।ब्राह्मणःपारणेतागांवरंददाति।क्षत्रियश्चेद्धरस्तदाग्रामंददाति।वैश्यः
दश्वं।यस्यास्तुनभवेद्भ्राताविज्ञायेतवापिता।नोपयच्छेततांकन्यांपुत्रिकाधर्मसंशया
इतिवचनात्।अभ्रातृमतीपरिणयनंप्रतिषिद्धं।तदतिक्रम्ययदिकश्चित्तामुद्वहेत्तर्हि
तस्याःपुत्रिकात्वदोषपरिहारायएकेनरथेनअथवाएकंगवांशतंतत्पित्रेदत्वाउद्वहेत।

७८ दिवाविवाहश्चेत्तदास्तमिते सूर्ये अमुविक्रमीत्वस्वदति श्रेषेण वधूं ध्रुवं तारकां विशेषं दर्शयति ७ त्रुटि

मवचनं कुर्युः। अत्र विवाहे ग्रामशा[illegible] वाक्यानां स्वकुलवृद्धानां स्त्रीणां श्मशाने च व

३०॥

कुर्युः। अंकुरार्पणे ज्ञोत्तवंदनादि धर्मप्रतिपादकं। कस्मात् विवाहश्मशानयोः

प्राविशतादिति वचनात्। तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः। विवाहे च श्मशाने च

मं स्वकुलवृद्धाः स्त्रियः प्राविशतात् शास्त्रातिरिक्तं कर्तव्यमाचारं प्रच्छेतरइति वचनात्

तिस्मृतेः। न केवलं स्मृतेः श्रुतेश्च। का सा श्रुतिः। तस्मात्तयोर्ग्रामः प्रमाणमिति। यत

स्वकुलवृद्धास्त्रियः पूर्वपुरुषानुष्ठीयमानं सदाचारं स्मरंति। तस्मात्तयोर्विवाहश्म

शानयोर्ग्रामं प्रमाणं सदाचारबोधकमित्यर्थः ८। अस्तमिते ध्रुवं दर्शयति। रात्रौ चेद्विव

७३

हस्तदा बँदानानंतरमेव। तद्यथा। ध्रुवमसीत्यादि सं जीव शरदः शतमित्यंते वरा

पठितेमंत्रे बधू ध्रुवमीक्षते। सा यदि न पश्येत् पश्यामीत्येवं ब्रूयात्। सा वधूर्यदि ध्रुवं न

द्वेत तथापि पश्यामीत्येवं वदेत्। न विपरीता। त्रिरात्रमक्षारालवणाशिनौ स्याता

तां ४

मधःशय्यातां। विवाहदिनमारभ्य त्रिरात्रं ओ। अहोरात्रौ। अक्षारालवणाशिनौ। अक्षारं

लवणं च अक्षारालवणं तत्र अश्नीतः स्त्येवंशीलौ अक्षारालवणाशिनौ स्यातां भवेतां। अधः

मौनरवद्भायांशयी। यातां। संवत्सरं त्रामिथुनमुपे यातां द्वादशरात्रं० षड्रात्रं त्रिरात्रं

तः। संवत्सरं ब्रह्मचर्यं यावता मिथुनं अभिगमनं नोपेयातां नोपगच्छेतां। अथवा द्वादशरात्रं।

वा षड्रात्रं। यद्वा त्रिरात्रं। अंततः संवत्सरादिपक्षाणामंते त्रिरात्रमित्यर्थः॥ संवत्सरादि

कल्पास्तु अशक्तपेक्षया व्यवस्थिता विज्ञेयाः। संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयणं

चतुर्थीकर्मानंतरं च मासादिरौ वाभिगमनं। चतुर्थीकर्मणः प्राक् तस्या भार्यात्वमेव न

व्यक्तं। विवाहैकदेशत्वाच्चतुर्थीकर्मणः॥ इति सूत्रार्थः॥ ॥ अथ पद्धतिः॥ अथ प्र

विवाहकर्म्महा तत्र पुत्र्येऽहनि मातृपूजापूर्वकं वरस्य पिता स्वपितृभ्यः पुत्रविवाह

निमित्तं नांदीमुखं श्राद्धं विधाय विवाहं पुत्रं मंगलतूर्यवेदघोषेण कन्यापितुर्गृहमा

॥ संवत्सरादिविकल्पास्तु अशक्त्यपेक्षया व्यवस्थिता विज्ञेयाः ५

३१॥

कन्यापिता च मातृपूजापूर्वकं कन्याविवाहनिमित्तकं स्वपितृभ्यो नांदीमुखं श्राद्धं विधाय य-
दुपद्वारमागतं वरं अमुष्या नादिभिः प्रतीक्ष्य मधुपर्केण अर्चयेत्। तद्यथा। अर्चयिता आ-
नमानाय्य तस्यासनस्य पश्चात्तिष्ठन्तं अर्घ्ये प्राति। साधुभवानास्तामर्चयिष्यामो भवन्तं-
तिब्रवीति। ततश्चैकपुरुषाः विष्टरं पाद्यं पादार्थमुदकमर्घ्यमाचमनीयं मधुपर्कं तत्स-
मपमानयन्ति। अथार्चयिता एकं विष्टरमादाय तिष्ठति। अन्यः कश्चिद्ब्राह्मणः विष्टरो
विष्टरो विष्टर इति श्रावयति प्रतिगृह्णातामित्यर्घ्यस्य हस्तयोर्ददाति। अर्घ्यश्च वर्ष्मो-
स्मि समानानामुद्यतामिव सूर्यः। इमन्तमभितिष्ठामि यो मा कश्चाभिदासति। इत्यनेन मं-
त्रेण विष्टरमासनेनिधाय तदुपर्युपविशति। ततोऽन्येन पाद्यं पाद्यं पाद्यमिति श्रावितेपा-
दार्थमुदकमर्घ्ययिता अर्घ्याय प्रतिगृह्यतामित्युक्त्वा समर्पयति। अथार्घ्यस्तत्पा-
त्रं भूमौ निधायांजलिनाजलमादाय विराजो दोहोसि विराजो दोहमशीय मयि पा-

ध्याये विराजो दोह इति मंत्रेण ब्राह्मणो दक्षिणं पादं प्रक्षाल्य तथैव वामं प्रक्षालयति ॥ द्वात्रि
पादयस्त्वर्घ्यः सर्वं प्रक्षाल्यानेनैव विधिना दक्षिणं प्रक्षालयंति ॥ ततः पुनर्विष्टरो ऽविष्ट
र इत्यन्येन आविते प्रतिगृह्यतामिति यजमान दत्तं विष्टरं प्रतिगृह्य वर्ष्मोऽस्मीति मं
त्रेण पादयो रधस्तान्निदधाति ॥ ततो ऽर्घो ऽर्घो ऽर्घ इत्यन्येन आविते ऽर्घे यिता प्रतिगृह्यतामि
त्युक्त्वा अर्घ्योयार्घे आपस्थ युष्माभिः सर्वान्कामानवाप्नवानीति मंत्रं पठित्वा तव ते ऽर्घ्य
ह्णाति ॥ अर्घ्ये अर्घे प्रतिगृह्य मरूद्वः पर्यन्तमानीय समुद्रं वः प्रहिणोमि स्वां योनिम
भिगच्छत अरिष्टा अस्माकं वीरा मा परासेचि मत्पय इत्यनेन मंत्रेण निनयन्नभिमं
त्रयते ॥ अथाचमनीयमाचमनीयमाचमनीयमित्यन्येन आविते ऽर्चयिता अर्घ्याय प्र [illegible]
तिगृह्यतामित्युक्त्वा आचमनीयं प्रयच्छति ॥ अर्घ्यश्च प्रतिगृह्य आमागन्यशसा सं
सृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति मंत्रेण सकृ

दाचम्य स्मार्त्तमाचमनं करोति। अथ मधुपर्कं मधुपर्को मधुपर्क इत्यन्येनोक्तो यजमा
नहस्तस्थितमुद्घाटितं मधुपर्कं मित्रस्य त्वा चक्षुषा प्रतीक्ष इति मंत्रेण प्रतीक्ष्य देवस्य
त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रेण अंजलिना प्रति
गृह्य सव्ये पाणौ निधाय दक्षिणस्य पाणौ रूपकानिष्ठिकया गुल्या। नमः श्यावास्यायान्न
शने यत्त आविद्धं तत्ते निष्कृन्तामीति मंत्रेण सकृदालोड्य त्रःसी सकृत् अनामिकांगुष्ठ
भ्यामादाय बहिर्निःक्षिप्य पुनरेवं द्विर्वीरमालोड्य नं निरूक्षणं च करोति। ततो यन्मधु
नः मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मम
धव्योऽन्नादोऽसानीति मंत्रेण अनामिकांगुष्ठाभ्यामादाय आदाय त्रिः प्राश्नाति मधुवात
ऋतायत इत्यादिमस्तिसृभिर्ऋग्भिः प्रत्यृचं प्राश्नाति वा। प्राशितशेषं पुत्रायाशि
ष्यवा दद्यात् सर्वं वा मन्नयेत्। पूर्वस्यां दिशि असंचरे देशे प्रक्षिपेत्। ततः स्मार्तं

विधिनाचम्य वाङ्म आस्येस्त्विति कराग्रेण मुखं स्पृशति। नसोर्मे प्राणोस्त्विति दक्षिणवामनासारन्ध्रे।
अक्ष्णोर्मे चक्षुरस्त्विति दक्षिणेतरे चक्षुषी। कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणं श्रोत्रं संस्पृश्य पुनः
कर्णयोर्मे श्रोत्रमस्त्विति वामं। एवं बाह्वोर्मे बलमस्त्विति दक्षिणेतरौ बाहू। ऊर्वोर्मे ओजोस्त्वि
तियुगपदूरू। अरिष्टानि मेङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरःप्रभृतीनि पादान्तानि सर्वा
ण्यङ्गानि पुनर्नाभ्यां हस्ताभ्यामालभेत। एवमाचान्तो दकाया खड्गहस्तो यजमानः गौर्गौर्गौरान
ताभिति ब्रूयात्। ततो छः माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्र नु
वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। मम चामुकशर्मणोस्य च पाप्मानं हने
मीति गवालंभपक्षे प्रतिब्रूयात्। उत्सर्गपक्षे तु माता रुद्राणामित्यादि पाप्मा हतः। नुं [illegible] मित्सुपांश्
क्का उत्सृजत तृणान्यत्त्वित्युच्चैः प्रतिब्रूयात्। ततो बरं बर्हिः शालायामीशान्यां दिशि वतुर्हे स

कं१

॥३३॥ यांसिकताबन्नायां वेदिकायां लौकिकं निर्मथ्यं वाग्निं स्थापयित्वा पश्चादग्नेः तृणपूलं कटं वा स्था
त। अथ कन्यापिता वस्त्रचतुष्टयं वराय प्रयच्छति। वरश्च तेषु मध्ये जरां गच्छ परिधत्स्व वासो भवा
कृष्टीनामभिशस्तिपावा शतं [illegible] च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीद
परिधत्स्व वास इत्यनेन मंत्रेण एकं कुमारीं परिधापयति। द्वितीयं या अकृंतन्नवयं या अतं। याश्च दे
वीस्तंतूनभितो ततंथ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति मंत्रेण। स्वयं च प
धास्यै यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये
इति मंत्रेण एकं परिधत्ते। यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यशो भगश्च मा विदद्य
शो मा प्रतिपद्यतामिति द्वितीयं। अथ कुमार्याः पिता एनौ परिहितावहतसदृशवस्त्रौ कन्याव
रौ समंजयति। परस्परं समंजेयामिति प्रैषेण। ततो वरः कन्यासम्मुखीभूत समंजंतु विश्वे दे

वाः समा पो रुद्रयानिनौ। सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ। इति मंत्रं पठति। अथ कन्या
दानं करोति पित्रादिः कन्यादानाधिकारी॥ तत्र वाक्यं। अमुकगोत्रस्यामुक ३ प्रवरस्यामुकशर्म
णः प्रपौत्राय। अमुकगोत्रस्यामुक ३ प्रवरस्यामुकशर्म्मणः पौत्राय। अमुकगोत्रस्यामुक ३ प्रवरस्या
मुकशर्म्मणः पुत्राय वरपत्ने। अमुकगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः प्रपौत्री। अमुकगोत्र
स्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पौत्री। अमुकगोत्रस्य अमुक ३ प्रवरस्य अमुकशर्म्मणः पुत्रीं
। एवमेव पुनर्वारद्वयमभिहिते। अथ कन्यापिता कुशजलान्वितपाणिः उदङ्मुखोपविष्टः प्राङ्मुखो
पविष्टाय वराय त्वङ्मुखोपविष्टां कन्यां अमुकगोत्राय अमुक ३ प्रवराय अमुकशर्म्मणे ब्राह्मणा
य इति ब्राह्मणेपत्नी। इतरपत्ने वर्म्मणे अमुकगुप्ताय अमुकदासायेति विशेषः। अमुकगोत्रा
मुक ३ प्रवरां अमुकनाम्नीमिमां कन्यां सालंकारां प्रजापतिदैवतां पुराणोक्त शतगुणीकृत
ज्योतिष्टोमातिरात्र समफलप्राप्तिकामो भार्यात्वेन तुभ्यमहं संप्रददे इत्युक्त्वा सकुशा

इति ४

वरः३

३६॥

भा. स्क. ४

ततस्तां कन्यां दक्षिणहस्तं वरदक्षिणहस्ते दद्यात्। वरश्च द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णा-
त्वनेन मंत्रेण तां प्रतिगृह्णीयात्। अथ कोदादिति कामस्तुतिं पठेत्। ततः कृतैतत्कन्यादानप्रति-
ष्ठार्थं सुवर्णं गोभूयुतं च दक्षिणां दद्यात्। अत्राचारात् अन्यदपि यौतकत्वेन सुवर्णरजतता-
म्रगोमहिषीअश्वग्रामादिकं पिता यथासंभवं ददाति। अन्येऽपि बांधवादयः यथासंभवं यौत-
कं प्रयच्छन्ति। केचन यौतकं होमान्ते प्रयच्छन्ति। अत्र देशाचारतो व्यवस्था। एवं पित्रा दत्तां गृही-
त्वा प्रतिग्रहस्थानान्निष्क्रामति। यदैषि मनसा दूरं दिशोऽनुपवमानो वा हिरण्यपर्णो वैक-
र्णः स त्वा मन्मनसां करोतु अमुकि इत्यनेन मंत्रेण। अथ निष्क्रमणप्रभृत्येको जलपूर्णकलशं
स्कंधे निधाय दक्षिणतोऽग्नेर्वाग्यतः ऊर्ध्वस्तिष्ठति उत्तरतो वा आ अभिषेकपर्यन्तं। अथैनौ वधूवरौ
अग्निसमीपमागतौ कन्यायाः पिता परस्परं समीक्षेथामिति प्रैषेण समीक्षयति। ततः प्रेषितो व-
रः समीक्षमाणां कन्यां समीक्षमाणः अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुव-

द्यौः वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे। सोमः प्रथमो विविदे गंधर्वो विविद
उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः। सोमो ददद्गंधर्वाय गंधर्वो ददद ग्नये। रयिं
च पुत्रांश्चादादग्निर्मह्यमथो इमां। सा नः पूषा शिवतमामेरय सा न ऊरू उशती विहराय स्या
मुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै इत्यादिक चतुरो मंत्रान्पठति। ततः
प्रदक्षिणमग्निं परीत्य पश्चादग्नेः पूर्वस्थापित तेजनी कटयोरन्यतरे दक्षिणं पादं ग्रकृ
त्वोपविशति वरः। तस्य दक्षिणतो वधूः। ततः ब्रह्मोपवेशनादि चरुवर्ज्जं पर्युक्षणांतं कु
र्वीत। इयांस्तु विशेषः। शमी पलाश मिश्राः लाजाः अश्मा अग्रस्तं डुलो हितमानडुहं चर्म
। कुमार्या भ्राता शूर्पं। दृढ पुरुषः। आचार्याय वरइव्यां इत्येतावंति वस्तू[illegible]नि उपकल्प
येत्। नप्रोक्षेत्। ततः स्रुवमादाय दक्षिणं जान्वाच्य आघारावाज्यभागौ महाव्याहृतीः
सर्वप्रायश्चित्तं ब्रह्मान्वारब्धो जुहुयात् [illegible] नाः अग्ने रक्षित्यादिकाः परम

३५॥

35

वितत्वंताः अनन्वारब्धो तु कुर्यात्। आशनांते वा परं मत्वविति। तद्यथा। प्रजापतये स्वाहा
। इदं प्रजापतये। इंद्राय स्वाहा। इदमिंद्राय। अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदं
सोमाय। ॐ भूः स्वाहा। इदमग्नये। ॐ भुवः स्वाहा। इदं वायवे। ॐ स्वः स्वाहा। इदं सूर्याय। त्वं
नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा
द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्यां। स त्वं नो अग्ने अवमो भवोती नेदिष्ठो
अस्या उषसो व्युष्टौ। अवयक्ष्वा नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा।
इदमग्नीवरुणाभ्यां। अयाश्चाग्नेस्य नभिशस्तिपाश्च सत्यमित्वमया असि। अया नो यज्ञं व
हास्या नो धेहि भेषजं स्वाहा। इदमग्नये। ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वित
ता महांतः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा। इदं वरुण
यसवित्रे विष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः। उदुत्तमं वरुण पाशमस्माद वाधमं विम

ध्यमᳫं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। इदं वरुणाय।
ब्रह्मान्वारब्धो हुत्वा। तत्र राष्ट्रभृतो यथा। ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्मक्ष
त्रं पातु तस्मै स्वाहा वाट्। इदमृताषाहे ऋतधाम्नेऽग्नये गंधर्वाय। ऋताषाडृतधामाग्नि
र्गंधर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा। इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यः। स
ᳫंहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदᳫं सᳫं
हिताय विश्वसाम्ने सूर्याय गंधर्वाय। सᳫंहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयो
ऽप्सरस आयुवो नाम ताभ्यः स्वाहा। इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यः। सुषुम्णः सूर्यरश्मि
श्चंद्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं सुषुम्णाय सूर्यरश्मये चंद्र
से गंधर्वाय। सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ता
भ्यः स्वाहा। इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः। इषिरो विश्वव्यचा वातो गंधर्वः स न इद

ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदमिषिरायविश्वव्यचसेवातायगंधर्वाय॥इषिरोविश्वव्यचा
वातोगंधर्वस्तस्यापोअप्सरसऊर्जोनामताभ्यःस्वाहा॥इदमद्भ्योऽप्सरोभ्यो ऊर्ग्भ्यः॥भुज्युःसुप
र्णोयज्ञोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय॥
भुज्युःसुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसस्तावानामताभ्यःस्वाहा॥इदंदक्षिणाभ्यो
प्सरोभ्यस्तावाभ्यः॥प्रजापतिर्विश्वकर्मामनोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्
इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वाय॥प्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सा
मान्यप्सरसएष्टयोनामताभ्यःस्वाहा॥इदमृक्सामेभ्योप्सरोभ्यो एष्टिभ्यः॥केचितअन्यथा
मंत्रप्रयोगंकुर्वन्तितस्यदर्श्यते॥ऋताषाडृतधामाग्निर्गंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहावाट्॥इतिप्रथमः॥तस्यौषधयोप्सरसोमुदोनामताभ्यःस्वाहेतिद्वितीयः॥एवंसर्व
त्रमंत्रेषु॥अस्मिन्नपिपक्षेत्यागस्तुतएव॥अथजयाहोमः॥चित्तंचस्वाहा॥इदंचित्ताय॥चित्ति

श्च स्वाहा। इदं चित्त्यै। आकूतं च स्वाहा। इदमाकूताय। आकूतिश्च स्वाहा। इदमाकूत्यै। विज्ञातं च स्वा
हा। इदं विज्ञाताय। विज्ञातिश्च स्वाहा। इदं विज्ञात्यै। मनश्च स्वाहा। इदं मनसे। शाक्वरीश्च
स्वाहा। इदं शक्वरीभ्यः। दर्शश्च स्वाहा। इदं दर्शाय। पौर्णमासं च स्वाहा। इदं पौर्णमासा
य। बृहच्च स्वाहा। इदं बृहते। रथन्तरं च स्वाहा। इदं रथन्तराय। चित्तं चेत्येवमादीनां
पदानां चतुर्थ्यन्ततां केचिदिच्छन्ति तदसाम्प्रतं। कुतः न ह्येतानि देवतापदानि किं तु मं
त्रा एते मंत्राश्च यथाम्नाता एव प्रयुज्यन्ते। प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृत
नाजयेषु तस्मै विशः समनमन्त स उग्रः स इह हव्यो बभूव स्वाहा। इदं प्रजापतये ज
यानिन्द्राय॥ अथाभ्यातानाः। अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्ष
त्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां स्वाहा। इदमग्नये भूतानाम

नामधिपतए

धिपतये। इंद्रो ज्येष्ठानामधिपतिः समाव[illegible]दि स्वाहा। कारांतो मंत्रः। इदमिंद्राय ज्ये
ष्ठाय। एवं समावत्वस्मिन्नित्यादि वक्ष्यमाणेषु सर्वमंत्रेष्वनुषंगः। यमः पृथिव्या अधिपतिः
इदं यमाय पृथिव्याधिपतये। वायुरंतरिक्षस्याधिपतिः। इदं वायवे अंतरिक्षस्याधिपतये। सू
र्यो दिवोधिपतिः। इदं सूर्याय दिवोधि[illegible]पतये। चंद्रमा नक्षत्राणामधिपतिः। इदं चंद्रम
से नक्षत्राणामधिपतये। बृहस्पतिर्ब्रह्मणोधिपतिः। इदं बृहस्पतये ब्रह्मणोधिपतये।
मित्रः सत्यानामधिपः। इदं मित्राय सत्यानामधिपतये। [illegible]ः वरु
णो पामधिपतिः। इदं वरुणायापामधिपतये। समुद्रः स्रोत्यानामधिपतिः। इदं समु
द्राय स्रोत्यानामधिपतये। अन्नं साम्राज्यानामधिपति तन्मावत्वस्मिन्ब्रह्मण्य
स्मिन्[illegible] इदमन्नाय साम्राज्यानामधिपतये। सोम ओषधीनामधिपतिः। इदं सोमा
य ओषधीनामधिपतये। सविता प्रसवानामधिपतिः। इदं सवित्रे प्रसवानामधिप

५१

तया। रुद्रः पशूनामधिपतिः। इदं रुद्राय पशूनामधिपतये। उदकोपस्पर्शनं। त्वष्टा रूपाणाम
धिपतिः। इदं त्वष्ट्रे रूपाणामधिपतये। विष्णुः पर्वतानामधिपतिः। इदं विष्णवे पर्वतानामधिप
तये। मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन्। इदं मरुद्भ्यो गणानामधिपतिभ्यः। पितरः पि
तामहाः परेवरे ततास्ततामहाः इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे ... त्यादि समानं। इदं पितृभ्यः पिता
महेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः। उदकस्पर्शनम्। पत्न्युपस्थादशामंत्राः। अप्यातान
संतकाः। अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात् तदयं राजा वरुणो
नुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्स्वाहा। इदमग्नये। इमामग्निस्त्रायतां गार्हपत्यः प्र
जामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिविबुध्यता
मियं स्वाहा। इदमग्नये। स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि धेह्ययथा यजत्रा यद
स्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इदमग्नये। सुगन्नु पंथां प्रदि

३चा।
एव३

शन्न एहि ज्योतिष्मच्छेह्यजरन्न आयुः। अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं
कृणोतु स्वाहा। इदं वैवस्वताय। परं मृत्यो अनु परेहि पंथां यस्ते अन्य इतरो देवय
नात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्स्वाहा। इदं मृत्यवे।
एकैकं स्रुवं प्राशनांते जुहुयादिति वृत्तिः। उदकोपस्पर्शः। कुमार्या भ्राता उपकल्पि
तशमीपलाशमिश्रान्लाजान्शूर्पे कृतान्स्वेनांजलिना गृहीत्वा कुमार्या अंजल
वावपति। तान्लाजान्प्राङ्मुखी तिष्ठती कुमारी सव्यहस्तसहितेन दक्षिणहस्ते
न अंजलिना विगृह्य जुहोति। अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रे
तो मुंचतु मा पते स्वाहा। इत्यनेन मंत्रेण तृतीयांशं जुहोति। इदमर्यम्णे। इयं नार्युपब्रू
ते लाजानावपंतिका। आयुष्मानस्तु मे पतिरेधंतां ज्ञातयो मम स्वाहा। इत्यनेन मंत्रे
ण अंजलिस्थितानां लाजानामर्द्धं जुहोति। इदमग्नये। इमांल्लाजानावपाम्यग्नौ समृद्धि

करणं तव। मम तुभ्यं च संवदनं तदग्निरनुमन्यतामियं स्वाहा। इत्यनेन मंत्रेण सद्यो
न्लाजान् जुहोति। इदमग्नये। मंत्रत्रयं कन्यैव पठति। अथ कुमार्याः सांगुष्ठं दक्षिणं
हस्तं वरो गृह्णाति। गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो
अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः। अमोहमस्मि सा त्वं सा त्वमस्यमो
अहं। सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं। तावेहि विवहावहै सह रेतो दधावहै। प्र
जां प्रजनयावहै पुत्रान्विंदावहै बहून्। ते संतु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्य
मानौ। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमित्यनेन मं
त्रसंदर्भेण। अथ कुमार्याः दक्षिणं पादं स्वदक्षिणहस्तेन गृहीत्वा आरोहेममश्मा
नमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत इत्यनेन मंत्रे
ण अग्नेरुत्तरतो व्यवस्थित [illegible] वरो [illegible]ति। अथाश्मान्यारूढायां कुमा

र्यीवरो गायां गायति सरस्वति प्रेदमव सुभगे वाजिनीवति। यां त्वा विश्वस्य भूतस्य प्रजायाम
स्याग्रतः यस्यां भूत ७ समभव यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि यास्त्रीणामु
त्तमं यशः इत्यन्तां। अथ वधूवरौ प्रदक्षिणमग्निं परिक्रामतः ४ तुभ्यमग्रे पर्यवहन्त्सूर्यां वहः
ना सह। पुनः पतिभ्यो जायां दाग्ने प्रजया सह। इत्यन्तस्य मंत्रस्य वरपठितस्यांते। एवं पुंसोर
द्वयं लाजावपनादि परिक्रमणांतं कर्म्म निर्विशेषं भवति। ततस्तृतीयपरिक्रमणानंतरं
कुमार्या भ्राता शूर्प्पकोणप्रदेशेन सव्रीहिलाजान् कुमार्यंजलावावपति। तांस्तिष्ठती कु
मारी भगाय स्वाहेत्यंतेन जुहोति। इदं भगाय। ततः समाचारात् तूष्णीं चतुर्थपरिक्रमणं कु
र्यात् ४ नेतरथा वह्निं। अथ प्रजापतये स्वाहेति। ब्रह्मान्वारब्धे हुत्वा। इदं प्रजापतय इति त्या
गं विधाय एतां वधूं उदीचीं सप्तपदानि प्रक्रामयति। तद्यथा। एकमिषे विष्णुस्त्वा नयतु
इति वरेण प्रोक्तं मंत्रे वधूरेकं पदं गच्छति। द्वे ऊर्जे विष्णुस्त्वा नयत्विति द्वितीयं। त्रीणि रायस्

दो।

स्योषाय विष्णुस्त्वा नयत्विति पुनः तृतीयं । चत्वारि मायोभवाय विष्णुस्त्वा नयत्विति चतुर्थं । पंच पशु
भ्यो विष्णुस्त्वा नयत्विति पंचमं । षड्‌ऋतुभ्यो विष्णुस्त्वा नयत्विति षष्ठं । सखे सप्तपदा भव सा मा
मनुव्रता भव विष्णुस्त्वा नयत्विति सप्तमं । एवं वरः एकैकं मंत्रमुच्चार्योच्चार्य सप्तपदानि दा
पयत्युत्तरोत्तरं दक्षिण पादेन । अथ वरः स्कंधधृतादुदकुंभादुदकमादाय वध्वा मूर्द्धन्यभि
षिंचति । आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषजमित्यनेन मंत्रेण । पु
नस्तथैवोदकमादाय । आपो हि ष्ठेति त्रिः ऋचं पठित्वा तथैव मूर्द्धन्यभिषिंचति । अथ वरः सू
दी ३ र्यमुदीक्षस्वेति वधू ब्रुवीत । सा सती सूर्यमुदीक्षेत । तच्चक्षुरित्यादि पश्येम शरदः शतमित्यंतं
मंत्रं स्वयं पठित्वा । अथ वरो वध्वाः दक्षिणांसस्योपरि हस्तं नीत्वा तस्या हृदयमालभते । मम व्र
ते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियु

=होश्याद्दृहपूरुषाः इहोप[विशन्तु] दक्षिणापश्चदुत्तरपूर्वानिषीदन्तु

नकुमर्यामित्यं तेन मंत्रेण । अथ हृदयालंभनानन्तरं वरो वधूमभिमंत्रयते । सुमंगलीरियंवधू
५०॥ रिमां समेत पश्यत । सौभाग्यमस्यै दत्वायाथास्तं विपरेतनेत्यं तेन मंत्रेण । अत्राशिष्टस
माचारात् । वधूं वरस्य वामभागे उपवेशयंति । तस्याः सीमंते वरेण सिंदूरं दापयंति । अथ
रक्षा ग्नेः प्रागुदग्वा पूर्वकल्पितेऽनुगुप्तागारे उत्तरलोम्नि प्राग्ग्रीवे आनडुहे चर्म्मणि तां व
धूं दृढपुरुष उ[त्था]प्यो[प]वेशयति । इह गावो निषीदंत्विति मंत्रेण । यद्वा तामाता दृढ
पुरुषस्तस्मिन्नान्ते वरोपवेशयति वधूं । तत आगत्य पूर्ववत्यथास्थानमुपविश्य ब्रह्म
न्वारब्धो वरः अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । इति स्विष्टकृद्धोमं विधाय
संस्रवान्प्राश्य ब्रह्मणे पूर्णपात्रं वरयोरन्यतरं दत्वा स्वकीयाचार्याय वरं ददाति । ब्राह्म
णश्चेद्ग्रामं क्षत्रियश्चेद्ग्रामं । वैश्यश्चेदश्वं । अन्यश्चेत्सुवर्णादिद्रव्यं यथाश्रद्धं यथाशक्ति
ब्राह्मणेभ्यो दातुं संकल्पयेत् । ग्राम । वचनं कुर्युरित्यनेनाशिष्टाचारं प्राप्ततिलककरण

द्वतचंदनमंत्रविप्राशीर्वचनप्रतिष्ठामंत्रपाठादिकं यथाकुलं यथादेशसमाचारं तत्रक्रियमा
णामनुमन्येत। दिवा चेद्विवाहः तदास्तमिते ध्रुवं दर्शयति वरो वध्वाः। रात्रौ चेदुदरदानानन्त
रमेव तद्यथा। ध्रुवमसि ध्रुवस्त्वेति प्रेषिता वधूः ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्प
तिर्मया पत्या प्रजावती संजीव शरदः शतमित्यं तेन मंत्रेण वरेण। ध्रुवमसि ध्रुवेत। सा वधूः यदि
ध्रुवं न पश्येत तथापि पश्यामीत्येवं वदेत्। विवाहादारभ्य त्रिरात्रं ब्रह्मचारालवणाशिनौ स्या
तां जायापती अधःखट्वा रहिते भस्माग्नेष्वास्तरते शयीयातां त्रिरात्रमेव। संवत्सरं समग्रमिथु
नं नो। पयातां द्वादशरात्रं षड्रात्रं त्रिरात्रं चेति। एते विकल्पाः। मिथुनकरणशक्त्यपेक्षया। अ
त्रिरात्रप्रश्नाश्रयणं चतुर्थ्युत्तरकालं हेतुस्तु व्याख्यानेविहित ४॥ ॥ इति विवाहकर्म्मप
द्धतिः॥ उपयमनप्रभृत्यौपासनस्य परिचरणं। अथ औपासनस्याग्नावसथ्यस्याग्नेः परि

चरणं उपासनं व्याख्यास्यते। कथं उपा यमनप्रभृति उपयमनकुशादानमारभ्य। कोर्थः। उ
पयमनान् कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात्। इति यावत्। अस्तमितानुदित
योः। तस्य कालनियममाह। अस्तमितानुदितयोः। अस्तमितश्च अनुदितश्चास्तमिता
नुदितयोस्तयोः सूर्ययोः सूर्यस्यास्तमयानुदिताभ्यां उपलक्षितयोः कालयोरित्यर्थः। त
त्रास्तमितलक्षणं छंदोगपरिशिष्टे। यावत्सम्यङ्न भाव्यंते नभस्यृक्षाणि सर्वतः। नच लोहि
तमापैति तावत्सायं तु हूयते। अनुदितस्य द्वैविध्यं अनुदितः समयाध्युषिते तथा। सर्वे
थावर्त्तते यज्ञ इतीयं वैदिकी श्रुतिरिति। संपूर्णादित्यमंडलदर्शनोपलक्षित उदितः।
तत्र वाजसनेयिनां नियमेन अनुदितहोमः। सूर्यो ह वा अग्निहोत्रं इत्यैरभ्यतस्मादुदित
होमिनां विच्छिन्नमग्निहोत्रं मन्यामहे इत्यं तेन श्रुतिसमाम्नायेन उदितहोमनिंदाद
र्शनं अनुदितहोमस्य समर्थितत्वात्। छंदोगानां उदितानुदितयोर्विकल्पः। उदिते ऽ

नुदिते चेति गोभिलवचनात्। आश्वलायनानां पुनरुदितहोमनियमः। तथा च तैत्तिरीयब्राह्म
णे। प्रातः प्रातरनृतं ते वदंति पुरोदयात् जुह्वति येऽग्निहोत्रं। दिवाकीर्त्यमदिवाकीर्तयं
तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति। अनुदितहोमनिंदार्थवादपुरःसरं तस्मादुदिते
होतव्यमिति उदितहोमविधानात्। होमद्रव्यनियममाह दध्ना तंडुलैरव्रतैर्वा जुहुयात्
।दध्नाऽगव्येनात तंडुलैर्व्रीहिमयैः। अव्रतैः सलवैकृ पैवैः॥ वाविकल्पेनापि तेषामन्यतमेन।
यैः। अग्नये स्वाहा। प्रजापतये स्वाहेति सायं ७ सूर्याय स्वाहा। प्रजापतये स्वाहेति प्रातः। त
सायं अग्नये स्वाहेति पूर्वाहुतिः। प्रजापतये स्वाहेत्युत्तरां जुहुयात्। सर्वत्र प्राजापत्यायागउपां
शु स्वाहाकारः। आश्वलायनगृह्ये। आ द्वारे तु स्वाहांतोऽपि मानसः। तथा सूर्याय स्वाहेति पूर्वां
प्रजापतये स्वाहेत्युत्तरां प्रातः। यागास्तु प्रयोगे वक्ष्यंते। ते च यजमानेन कृत्याः। कुतः प्राधान

३५

४२॥

त्वात्। प्रधानं च स्वामीफलयोगात् इति कात्यायनवचनात्। प्रधानं हि द्रव्यस्वत्वपरित्यागः। त
थ प्रवसता यजमानेन यथाकालं यथादैवतं। शुचिनाआचांतेन प्राङ्मुखोपविष्टेन स
कर्म्म सुकर्त्तव्यम्॥१॥ तवसायमादिप्रातरंतमेकं कर्म्म प्रचक्षते इति वचनात् सायंहोमसद्ग
णैव प्रातहोमः१ कर्त्तव्यः। तथा येन होत्रा सायं हुतं तेनैव प्रातहोतव्यं। येनारंभस्तेनैव सम
प्तिरिति न्यायात्। तथा दधितंडुलयवानामलाभे श्यामाकनीवारवेणुयवकंदमूलफलज
सत्यानां पूर्व्वपूर्व्वालाभे परं नित्यहोमाय ग्राह्यं। कंदं सूरणादि। फलमाम्रादि। अस्यैव कर्म्म

८४

णः कामसंयोगमाह। पुमांसौ मित्रावरुणावित्यांनामंत्रेण गर्भकामा पत्नी पूर्व्वामाहुतिं जु
हुयात्। अत्र पूर्व्वां गर्भकामेत्यस्य कोऽर्थः। किन्नित्ययोर्द्वयोराहुत्योः प्रथमा पूर्व्वशब्देनाविव
क्षिता उत ताभ्यां पूर्व्वा पूर्व्वे होतव्या अन्यैव किं तावत्प्राप्तं। अन्यैवेति। मंत्रांतरेण देवतांतर
होमविधानात्। मंत्रस्य देवतायाश्च गुणत्वेन कर्म्मभेदकत्वात्। किंच द्वयोः प्रथमायाः पूर्व्व

त्वेनैव विहिते नित्याग्नेयस्य शौर्यस्य च होमस्य बाधः प्रसज्येत । अत्रोच्यते । सत्यं मंत्रादेवत
योः कर्मभेदकत्वं । पूर्वोगर्भकामेतीदं काम्यं कर्म प्रकृतं तु नित्यं । काम्यं नित्यस्य बाधकं । पु
रूषार्थसमासत्तेः काम्यं नित्यस्य बाधकमिति न्यायात् । तस्मादग्नये स्वाहा सूर्याय स्वाहेति
नित्ये आहुती बाधित्वा पुमांसौ मित्रावरुणावित्यादिमंत्र [illegible] विहिता पत्नीकर्तृका कर्मोत्त
ररूपा हि काम्या आहुतिः प्रवर्त्तते । यथा गोदोहनेन पशुकामस्य प्रणयेदित्यत्र काम्यं गो
दोहनप्रणयनं नित्यं चमसं बाधित्वैव प्रवर्त्तते । अत्र कथं बाध्यबाधकभावः । उच्यते नित्यं त
वदफलं [illegible] अकरणे प्रत्यवायजनकं । काम्यं तु फलवत् तत्र फलवद्फलवत् अफलं दु
र्बलं बाधते । अत्र यदि केचित् प्रत्यवतिष्ठेरन् । आधानानुविधानानंतरं सायंप्रातर्होमा
नुविधानं कर्त्तव्यं आचार्येणाकेन हेतुना ऽत्र कृतं को दोष इति चेत् । परप्रकरणाम्नानं । कथं

४३

न्वा ४

षडर्घ्या भवंतीत्यारभ्य तामुद्दुह्येत्यंतं विवाहप्रकरणं। यतः। तत्र समाधीयते। सूत्रकारस्यै
लीयं विवाहात्प्राक् आवसथ्याधानकथनं। यथानेतद्वक्तनीयं। विवाहाग्निरेवावसथ्याग्नि
रिति पक्षस्याचार्यस्याभिमतः। तेनात्र होमानुविधानं कृतमिति। विवाहाग्नेरौपासनत्वं कुतोऽव
गतमिति चेत्। वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि। पंचयज्ञविधानं च पक्तिं चान्वाहिकीं
द्विजः इति मनुवचनात्। कर्म्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि श्रौतं
वैतानिकाग्निषु इति याज्ञवल्क्यवचनात्। कृतविवाहस्य सभार्यस्यावसथ्याधानेऽधिकारः। आ
श्वलायनगोभिलादिगृह्यकारवचनाच्च। तस्माद्बहुसम्मतत्वात् विवाहसमनंतरमेव होमविधा
नादाचार्यस्य विवाहहोमस्यैव नाग्निरेवौपासनः सम्मत इति। अत्रोच्यते। आश्वलायनगृह्यम
तं मन्वादिवचनं तु यथागृह्यमाहितौपासनाग्निपरं। स्वस्वशाखाधर्मप्रतिपादनपरं वा

सा२

जस। नेयिनां पंचदशशाखाश्रयिणां माध्यंदिनका एवप्रभृतीनां चापारस्कराचार्यस्य तु आवस
थ्याधानप्रयोगं विवाहप्रयोगात् पश्चात् अनुविदधतो नैव पक्षः सम्मत इति गम्यते। यदि विवाहहो
मेनैव आवसथ्याग्नेः सिद्धेः पश्चात् कृप्रयोगारंभस्यैव पर्थ्यात्। तस्मादस्थानपाठान्न दोषः। इदं च
औपासनपरिचरणं सर्वदानसंकृतायतस्ततोऽस्तमितेऽग्निं परिचर्य दक्षोपद्याॅ ८ सकृत्सर्वे
ष्वो बलिं ८ हरेत्। इति बलिहरणविधिपरे वाक्ये परिचरणस्य नित्यत्वं ज्ञापयति। छिन्नं ल्लूनं
चपिष्टं च सान्नाय्यं मन्त्रमयं तथा। लोकसिद्धं गृहीतं चेन्मंत्रा जप्याः कथाशया। तत्र छिन्नादि लो
कसिद्धं वेदाद्वियेत तत्र तु प्रतीतं तन्मंत्रजपं प्राह भरद्वाजः कृताकृतं। छिन्ने चावहते ल्लूनेपि
ष्टे दुग्धे च मन्त्रमया ख्याते च लौकिके प्राप्ते जपो नास्त्येव वाजिनां। अत्र च न मंत्रान्ते स्वाहाकार
होमो किंतु आदावेव नचोंकारः ८ प्रतिमंत्रं। किंतु आद्ये एवा यदा होमस्वाहा कुर्यान्नमंत्रां

ते नचैव जुहुयाद्धविः। स्वाहाकारेण हुत्वाग्नौ पश्चान्मंत्रं समापयेत्। सामगानामयं नो कुर्याद्धोम
मंत्राणां प्रमादिषु कुत्रचित्। अन्येषां चापि दृष्टानां कालेनाचमनादिना। अविदृष्टानां अनं
तरितानां कालेन आचमनादिना च॥ ॥ अथ प्रयोगः। आवसथ्याधानोत्तरकालं तद्दैव
सायंप्रातर्होमनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा। संध्यावंदनानंतरं अग्नि
समीपं गत्वा पश्चादग्नेः प्राङ्मुख उपविश्य उपयमनकुशान् समिधस्तिस्रः मणिकवारि
दध्यादीनामन्यतमं होमद्रव्यं अग्नेरुत्तरतः प्राचः आसाद्य उपयमनकुशानादाय तिष्ठं
त्समिधोभ्याधाय पर्युक्ष्य द्वादशपर्वपूरकेण दर्वितंडुलयवानामेकतमेन द्रव्येण ह
स्तेनैव स्वंगाराणि स्वर्चिषि वह्नौ मध्यप्रदेशे देवताध्याय जुहुयात्। अग्नये स्वाहा। इदम
ग्नये। तदुत्तरतः मनसा प्रजापतये स्वाहा। इदं प्रजापतये इति सायं। तथैव सूर्याय स्वाहा।
इदं सूर्याय। प्रजापतये स्वाहा। इदं प्रजापतये इति त्यागमिति प्रातः। पत्नी चेद्धोमे कामा भव

स्य५

तितदा पुमा॰ सोमित्रावरुणौ पुमा॰ सा वश्विना वुभौ। पुमानग्निरिन्द्रश्च सूर्यश्च पुमा॰ सं
वर्द्धतां मयि पुनः स्वाहेति पूर्व्वमाहुतिं पत्नी जुहोति उत्तरां यजमानः। इदं मित्रवरुणाभ्यां
अश्विभ्यामिन्द्राय सूर्याय च॥ इति नित्यहोमविधिः॥ अथ नैमित्तिकमुच्यते। रात्रौ
त्रिमेदेन द्रुमोत्रेयानविपर्यासेन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहनैं रात्रः प्रजापालना
धिकृतस्य यात्रादिप्रस्थितें अत्रत्रिमेदे रथावयवभंगेन द्रुविमोक्षेन द्रुस्यरयस्यविमोक्षे
सन्नद्दने द्धेदेवायानविपर्यासे अश्वोमुखादिमावेवा अन्यस्यां वा व्यापत्तौ अन्यस्मिन्वा अ
शुभसूचके निमित्ते। स्त्रियाश्चोद्वाहने। उद्वाहितायाः पूर्वंपतिगृहानयने च रथात्रिमे
दादिकनिमित्ते संजाते नैमित्तिकं प्रायश्चित्तरूपं कर्मोच्यते। कर्मापपाते प्रायश्चित्तं त
त्कालमिति वचनात्। निमित्तसमनन्तरमेव नैमित्तिकं कुर्यात्। यथा। तमेवाग्निमुपसमा

ति२

धायाज्यं संस्कृत्येहरति जुहोति ना नामंत्राभ्याम्। तमेव यदि राज्ञो निमित्तं तदा प्राश्या
न्वितं सेनाग्निं। यदि स्त्रियाः निमित्तं तदा वैवाहिकमग्निं पंचभूसंस्कारान्कृत्वा उपसमाधा
य स्थापयित्वा ब्रह्मोपशनादि पर्युक्षणांतं कुशकंडिकां विधाय एष एव विधिर्यज्ञब्र
चिन्हो मरुत्यनेनाज्यसंस्कारेणाप्ते पुनराज्यं संस्कृत्येति वचनं आघारहोमात्प्रागेवइ
हरतिरित्याज्याहुं द्वयप्राश्यथं ततश्च पर्युक्षणेत्ताऽऽइहरतिरितिनाना मंत्राभ्याम्। द्वाभ्यां
मंत्राभ्यां जुहोत्या कृतिद्वयं ततआघारादि स्विष्टकृदंतं। अन्य यानमुपकल्प्य तत्रोप
वेशये द्राजानं स्त्रियं वा प्रेत्त्र इतियज्ञान्तेना त्वाहार्षमितिचैतया। अन्यद् यादिकं
यानं वाहनं उपकल्प्य संयोज्य तत्र तस्मिन्याने राजानं रूपं स्त्रियं वा ह्यौतां वधूं उपवे
शयेत्। आरोहयेत् कथम्। प्रति क्षत्रे प्रतितिष्ठामि यज्ञ इत्यनेन मंत्रेण। आ त्वाहार्ष
मित्येतय चां वा। धुर्यौ दक्षिणा प्रायश्चित्तिः। धुर्यौ धुरि साधू अनड्वाहौ दक्षिणा ब्रह्मणे

४५।।
४५।।
ति५

ति ६ ति २

देयादक्षिणाशब्दः परिक्रयार्थे द्रव्ये वर्त्तते। येन ऋत्विजां आनतिर्भवति। इदं कर्म्म यज्ञाय प्रवृत्तिः
दुर्न्निमित्तसूचितदुरितापहारिणी। अतः सति निमित्ते भवति। ततो ब्राह्मणभोजनम्। ततः
कर्म्मसमाप्त्यनंतरं ब्राह्मणस्य भोजनं कारयितव्यम्॥ ६॥ इति सूत्रार्थः॥ अथ प्रयोगः॥ १॥ अ
द्भुतादिनिमित्तानामेकतमे निमित्ते संजाते शुचौ देशे पंचभूसंस्कारान्कृत्वा राज्ञः पुरोहितः स
नाग्निमुपसमाधाय। व[illegible]ः संवरः वैवाहिकमग्निं ब्रह्मोपवेशनादि पर्युक्षणान्तं। इह रतिरि
ह रमध्वमिह धृतिरिह स्वधृतिः स्वाहेति प्रथमाम्। इदमग्नये। उपसृजं धरुणं मात्रे धरुणो
मातरं धयन्। रायस्पोषमस्मासु दीधरत्स्वाहेति द्वितीयाम्। इदमग्नये। इत्याहुतिद्वयं हुत्वा
ततआघारादिस्विष्टकृदन्तं चतुर्द्दशाहुतिकं होमं विधाय संस्रवं प्राश्याचम्य यथोक्तानड्वाहौ ब्रह्म
णे अस्य कर्म्मणः प्रतिष्ठार्थं। एतावनड्वाहौ तुभ्यं ब्रह्मणे मया दत्तौ। इति प्रयोगेण दक्षिणां

दत्वा अन्यधानमानीय तत्र पुरोहितो राज्ञा नां वरो वधूं उपवेशयेत्। प्रतिक्षत्रे प्रतितिष्ठाभिरा
ष्ट्र आत्वाहार्षमिति मंत्राभ्यां ततो ब्राह्मणभोजनम्॥ चतुर्थीमपररात्रेभ्यंतरस्तोग्निमु
मुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयि
त्वाज्यभागाविष्ट्वाज्याहुती जुहोति। चतुर्थीमिति यो विवाहतिथिमारभ्य अपररात्रे रात्रेः पश्चि
मयामे अभ्यंतरतः गृहस्य मध्ये अग्निं वैवाहिकं उपसमाधाय पंचभूसंस्कारान् कृत्वा स्थाप
यित्वा दक्षिणतो ब्रह्मासनमास्तीर्य तत्र पूर्ववद्ब्राह्मणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य
प्रणीतास्थानात्। उत्तरतः जलपूर्णं ताम्रादि पात्रं स्थापयित्वा। तत्र ब्रह्माणमुपवश्येति पु
नर्वचनं उदपात्रप्रतिष्ठापनाव संज्ञापनार्थम्। स्थाली पाकं चरुं यथाविधि श्रपयित्वा। पर्यु
क्षणान्ते आघारानन्तरमाज्यभागाविष्ट्वाज्याहुतीः आज्येन पंचाहुतीर्वक्ष्यमाणैः पंचभिर्मंत्रै
र्जुहोति। अग्ने प्रायश्चित्ते त्वस्यादिभिः ५। स्थालीपाकस्य जुहोति। स्थालीपाकस्य चरोः प्रजापतये

स्वाहेत्येकामाहुतिं जुहोति। हुत्वा हुत्वै तासामाहुतीनामुदपात्रे सँस्रवांत्समवनीय। अग्नेप्रा
यश्चित्त इत्यादीनां प्राजापत्यन्तानां षण्णामाहुतीनां प्रत्येकं हुत्वा हुत्वा संस्रवान् हुतशेषान्
उदपात्रे समवनीय प्रक्षिप्य। केषांचिन्मते स्विष्टकृदाहुतेरपि। तत एनां मूर्द्ध्न्यभिषिंचति। त
तस्मादुदपात्रादुदकमादाय एनां वधूं वरो मूर्द्धनि अभिषिंचति। या ते पति घ्नीत्यादिना
सा जीवेत्वं मया सह आमुक्ति देवि इत्यंतेन। अथैनाँ स्थालीपाकं प्राशयति। अथाभिषेकानंतरं
एनां वधूं स्थालीपाकं चरुशेषं प्राणैस्ते प्राणान् संदधामी त्यादिना त्वचा त्वचमि त्यन्तेन मंत्रेण व
रः प्राशयति। तस्मादेवंवित् श्रोत्रियस्य दारेण नोपहासमिच्छेद् उत ह्येवंवित् परो भवति। यत
ऽनेन चरुशेषप्राशनकर्म्मणा मन्त्रैः सह एकं प्राप्ता दाराः तस्मात् एवंवित्पुरुषः श्रोत्रियस्या
दुषः दारेण जायया सह उपहासं मैथुनं नेच्छेत् न कामयेत। हि यस्मात् एवंविदपि श्रोत्रि

न४

४२॥

यः परः शत्रुर्भवति । तामुद्दिश्य यथर्तु प्रवेशनं । एवं पूर्वोक्तेन प्रकारेण तां वधूमुद्दिश्य विव-
हयित्वा विवाहकर्मणा भार्यात्वं संपाद्य यथर्तु ऋतुकालमृतुकालं प्रवेशनं अभिगमनं
कुर्यादिति शेषः । यथाकामी वा स्त्रियाः काममनतिक्रम्य यथाकामं तदस्यास्तीति यथाका-
मी वा भवेत् । ऋतुकालाभिगमने नियमः । कुतः काममाविजनितोः संभवामेति वचनात्
। कामं स्वेच्छया । आविजनितोः आप्रसवात् संभवाम भर्त्रा सह संगता भवामेति स्त्रीणामि-
न्द्रात् वरप्रार्थनवचनात् । प्रजापतेरिति केचित् । अत्र यद्यपि यथर्तु प्रवेशनमित्यसामा-
न्येनोक्तं तथापि स्मृत्यंतरोक्तः पर्वादिनिषेधपालनं कुर्यात् । यथाह मनुः । अमावास्याष्ट-
मी चैव पौर्णमासी चतुर्दशी । ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ याज्ञवल्क्यो-
ऽपि । षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च व-
र्जयेत् । इत्यादिनिषेधो याथाकाम्यपक्षेऽपि समानः । यतः प्राप्तेऽभिगमने निषेधः प्रवर्त्तते ।

५३

गार्भिण्यभिगमननिषेधस्तु काममाविजननितोः संभवामेति वचनाद्बोध्यते। ऋतावनभिगमने। ऋ
तुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां ब्रह्महत्यायां युज्यते नात्र संशयः ४। ऋतुस्ना
तां तु यो भार्यां शक्तः सन्नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। लोकानंत्यं दि
वः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः। यस्मात्तस्मात्स्त्रियः सेव्याः कर्त्तव्याः सुरक्षिताः। इत्यादिभिः स्मृ
तिभिः स्त्रीरक्षाया विहितत्वात्तासां कामातिक्रमतो व्यभिचारशंकासंभवात् तद्रक्षार्थं यथाकामं
तस्माद्यथाकाम्ये तु न नियमः। यथाकामी वेति कल्पेन विधानात्। अनधिगमने प्रत्यवाय
स्मरणाभावाच्च। अतः लोकानंत्यं दिवः प्राप्तिः। अथास्येदक्षिणांसमधि हृदयमालभते। अ
थ अभिगमनानंतरं अस्यै अस्याः भार्यायाः दक्षिणस्कंधं अधि उपरि दक्षिणं हस्तं नीत्वा हृद
यमालभते। हृदयं वक्षः आलभते स्पृशति। यत्ते सुसीम इत्यादिनाश्शृणुयाम शरदः शत

मित्यनेन मंत्रेण। एवमतऊर्ध्वम्। एवमनेनैव प्रकारेण अतोनन्तरं क्रमतावत्तो प्रवेशनं। य
थाकामं वा इति सूत्रार्थः॥ ॥ अथ चतुर्थी प्रयोगः। तत्र विवाहाच्चतुर्थ्यामपररात्रे गृहा
भ्यंतरतः पंचभूसंस्कारान् कृत्वा विवाहाग्नेः स्थापनं। ब्रह्मण उपवेशनं। प्रणीतास्थानादु
त्तरतः उदपात्रस्थापनम्। प्रणीताप्रणयनादि आज्यभागांतं आवसथ्याधानादिव
त्कुर्यात्। आज्यभागानंतरं अग्ने प्रायश्चित्ते इत्यादिभिः पंचभिर्मंत्रैः पंचाज्याहुतीर्हुत्वा। अग्ने प्रा
यश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाममुपधावामि यास्यै पतिघ्नी तनू
स्तामस्यै नाशय स्वाहा। इदमग्नये। वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाममुपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा॥ इदं वायवे। सूर्य प्रायश्चि
त्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाममुपधावामि यास्यै पशुघ्नी तनूस्तामस्यै
नाशय स्वाहा। इदं सूर्याय। चंद्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ

कामउपधावामियास्येगृहघ्नीतनूस्तामस्येनाशयस्वाहा।इदंचंद्रमसे।गंधर्व्वप्रायश्चित्ते त्वंदेवा
नांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकाम उपधावामियास्ययशोघ्नीतनूस्तामस्येनाशयस्वाहा
इदंगंधर्व्वाय।ततःस्थालीपाकेनप्रजापतयेस्वाहा।इदंप्रजापतये।इतिप्राजापत्यंहुत्वा।अग्नेप्राय
श्चित्तइत्यादिप्राजापत्यन्तानांषडाहुतीनांसंस्रवं उदपात्रेप्रक्षिपेत्।केषांचिन्मतेस्विष्टकृतो
ऽपिसंस्रवंप्रक्षिपेत्।अन्यासामाहुतीनांपात्रांतरेसंस्रवंप्रक्षिपेत्।ततोऽग्नयेस्विष्टकृतेस्वाहा
इदमग्नयेस्विष्टकृते।इतिस्थालीपाकेनस्विष्टकृतेहुत्वा।आज्येन महाव्याहृ[illegible]त्यादिप्राजा
पत्यांतानवाहुतीर्जुहोति।ततःपात्रान्तरस्थान्।संस्रवान्प्राश्यपूर्णपात्रवरयोरन्यतरंब्राह्म
णेदत्वा उदपात्रादुदकमादायवधूंमूर्द्धन्यभिषिंचति।यातेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशो
घ्नीनिंदितातनूर्जारघ्नीततएनांकरोमिसाजीर्यत्वंमयासहासावितिइत्यनेनमंत्रेण।अथ

४९॥

वरः वध्वं स्थालीपाकं हुतशेषं सह प्राशयति। प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनि मांसैर्मां
सानि त्वचा त्वचमिति अनेन मंत्रेण सा च भर्त्रा मंत्रे पठिते प्राश्नाति। अथ ऋतुकाले रजोदर्श
ने संजाते पुण्याहे गर्भाधाननिमित्तं मातृपूजापूर्वकं स्वयमाभ्युदयिकं कृत्वा रात्रावभिगमनं कु
र्यात्। अभिगमनानंतरं बध्वा दक्षिणांसं धस्योपरि दक्षिणहस्तं नीत्वा हृदयं स्पृशति। यत्ते सुसी
मे हृदयं दिवि चंद्रमसि श्रितं। वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतमित्यनेन मंत्रेण। एवं श्राद्धवर्ज्यं प्रत्यृतुकालमभिगमनं कुर्यात्। यथा
कामी वा भवेत्। ऋतुकालाभिगमनं कुर्वन्न ब्रह्मचर्यात्स्खलति। ब्रह्मचर्यं च पर्वण्याद्याश्चत
स्रश्च वर्जयेत्। इति याज्ञवल्क्यस्मरणात्। अनभिगमने ऋतुस्नातां तु यो भार्यां सन्निधौ नो
पगच्छति। घोरायां ब्रह्महत्यायां युज्यते नात्र संशयः॥ ऋतुस्नातां तु यो भार्यां शक्तः सन्नोपगच्छ
ति। घोरायां [illegible] भ्रूणहत्यायां युज्यते नात्र संशयः। इत्यादिप्रत्यवायस्मरणाच्च। ऋतु

मि ४

कालाभिगमनेनियमः। यथाकाम्येतुननियमः॥ यथाकामीवेतिविकल्पेनविधानात्॥ अतः
लोकानंत्यंदिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः। यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः।
इत्यादिभिः स्मृतिभिः स्त्रीरक्षायाविहितत्वात्। तासां कालातिक्रमणे व्यभिचारशंकासंभवात्तद्र
क्षार्थं यथाकाम्यमिति चतुर्थीकर्मपद्धतिः। ॐ॥ विष्णुपुराणे। ऋतावभिगमः शस्तः स्वपत्न्याम
वनीपते। पुन्नक्षत्रे शुभे काले ज्येष्ठयुग्मासु रात्रिषु। नास्नातां स्त्रियं गच्छेन्नातुरां न रजस्वला
म्। नाप्रशस्तां न कुपितां नानिष्टां न च गुर्विणीम्। नादक्षिणां नान्यकामां नाकामां नान्ययो
षितं। क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः। स्नातः स्रग्गंधधृक् प्रीतो नाध्मातः क्षुधितोपि
वा। सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत्। चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा
पर्वाण्येतानि राजेंद्र रविसंक्रान्तिरेव च। तैलस्त्रीमांससंभोगी पर्वस्वेतेषु वै पुमान्। विण्मू

५०॥

ब्रह्मोजनं नाम प्रयाति नरकं स्मृतः॥ ॥पक्षादिषु स्थालीपाकं ८ श्रपयित्वा दर्शपूर्णमास
देवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति प
क्षाणामादयः पक्षादयस्तासु पक्षादिषु प्रतिपत्सु अत्रयघपिपक्षादिष्वि त्युक्तं तथापि
संधिमभितो यजेतेति वचनात्। पर्वणो यश्चतुर्थो शश्चाद्याः प्रतिपदश्चयः॥ यागकालः संधि
त्वयः प्रातर्युक्तो मनीषिभिरिति पर्व चतुर्थांशोपि यागकालत्वेनाभिमतः॥ तथा पूर्वाह्णे वा
थमध्याह्ने यदि पर्वसमाप्यते तदेव यागकालः स्यात्परतश्चेत्परेहनि। तत्रापि। संधिर्यद
पराह्णे स्याद्यागः प्रातः परेहनि। कुर्वाणः प्रातः पक्षागे चतुर्थेपि न दुष्यति। त्यादिभिर्वचनैर्या
गकालं निर्णीया पर्वदिवसे कृतोपवसाथिकाशनः सपत्नीकः शालायां जघनेनाग्निं राज्ञो
जाग्रन्निमश्नः इति हा समिश्रो वा पृथक् शयित्वा प्रातः कृतस्नानसंध्यावंदन प्रातर्होमः स्वा
चान्तोग्नेः पश्चात्प्राङ्मुख उपविश्य पूर्वोक्तविधिना चरुं श्रपयित्वा ज्यभागान्ते दर्शे दर्श देवता

तु २

भ्यः पौर्णमासे पौर्णमासदेवताभ्यः प्रयोगे वक्ष्यमाणाभ्यः चरुं हुत्वा ब्रह्मप्रजापतिविश्वेदेवाद्यावापृ
थिवीभ्यश्चरुं जुहोति। विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च बलिहरणं बलि
दानं। वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाग्नये स्विष्टकृ
ते स्वाहेति। वैश्वदेवस्य विश्वेदेवा देवा पितृमनुष्या देवा आस्यति वैश्वदेवः पाकः पंचमहायज्ञा
र्थं साधितपाकः तत्यर्थः। ननु वैश्वदेवस्याग्नौ जुहोतीति विश्वेदेवसंबद्धस्य चरोस्तद्भूतापान्नस्य
अग्नौ जुहोतीति कथं नोच्यते। यथा वृषोत्सर्गे पायसस्य जुहोतीति पृथक्संबंद्धः पृथगेव पायसं
मयः पूर्वं सिद्धश्चरुर्गृह्यते। किमिति पंचमहायज्ञार्थः। उच्यते स्थालीपाकः अपचितत्वात्। स्था
लीपाकस्यैकवचनान्तत्वात् द्वितीयस्य वैश्वदेवस्य चरोः अग्नावावगम्यते। पौष्लव वैश्वदेवस्य
सिद्धोपान्नस्य पृथगुपादानं तु। पंचमहायज्ञार्थं वैश्वदेवपाकस्य सद्भावान्निवर्त्तते। पंच

५१॥

महायज्ञार्थस्य वैश्वदेवत्वं कुतः इति चेत् । वैश्वदेवादन्नात्पर्युक्ष्येति सूत्रात् । अग्नौ जुहोती
ति अग्निग्रहणं बलिकर्म्मता मा भूदिति । अग्नये स्वाहेत्यादिप्रयोगदर्शनार्थं सर्वत्र । तस्यैः
देशस्योद्धृत्यासादितप्रोक्षितस्य अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो हुत्वा स्थालीपाकाद्वैः
देवाच्च अग्नये स्विष्टकृते जुहोति । ततः शेषसमाप्तिं विधाय । बाह्यतः स्त्रीबलिं हरति ॥ प्रव
गो बन्ध्यमाणेन्द्रमसिन्द्रयाः इत्यादिभिर्मंत्रैः बाह्यतः शालायाः प्रागंगणे स्त्रीबलिं खन्यादिभ्यो ब
स्त्रीबलिस्तं स्त्रीबलिं हरति ददाति शेषमद्भिः प्लाव्य स्थालीस्थितमवशिष्टं चरुं अद्भिर्जुते
नेप्लाव्य मज्जयित्वा । अन्नाय प्रणीताः । तासां सर्वकर्म्मार्थत्वेन प्रणीतत्वात् । ततो ब्राह्मणमे
तनं व्याख्यातं सूत्रार्थे ४ ॥ ॥ अथ प्रयोग ४ ॥ अथ पक्षादिकर्म्मोच्यते । तत्र प्रथमं प्रयोगम
त्पूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अमाषममांसं अक्षारालवणं हविष्यं ब्रताशनं विधा
य रात्रावग्निसमीपे भूमौ दंपती पृथक्कुशशायीयातां । प्रातः स्नात्वा संध्यावंदनानंतरं प्रातर्होमं च

निर्वर्त्यउदितेसूर्येपौर्णमासंस्थालीपाकमारभेत।तत्रात्मनःब्रह्मणःप्रणीतानांचासन
चतुष्टयंकुशैर्दत्वापवित्रादिकर्म्मणाहंयक्ष्येतत्रमेत्वंब्रह्माभवभवामीतितेनोक्तेआसने
उपवेश्यअत्रासादनेवैश्वदेवार्त्थंसादनंविशेषःप्रोक्षणंचाज्यभागान्तंयथोक्तंकर्म्मनि
र्वर्त्यस्थालीपाकमभिघार्यस्रुवेणचरुमादायअग्नयेस्वाहा।इदमग्नये।अग्नीषोमाभ्या
ँस्वाहा।इदमग्नीषोमाभ्यां।उपांशुपुनःअग्नीषोमाभ्याँस्वाहा।इदमग्नीषोमाभ्यां।उच्चैः
ब्रह्मणेस्वाहा।इदंब्रह्मणे।प्रजापतयेस्वाहा।इदंप्रजापतये।विश्वेभ्योदेवेभ्यःस्वाहा।इदं
विश्वेभ्योदेवेभ्यः।द्यावापृथिवीभ्याँस्वाहा।इदंद्यावापृथिवीभ्यां।हुतशेषंस्रुवेण
अग्नेरुत्तरतःआकुसंस्थंविश्वेभ्योदेवेभ्योनमः।इदंविश्वेभ्योदेवेभ्यः।भूतगृह्येभ्योन
मः।इदंभूतगृह्येभ्यः।आकाशायनमः।इदमाकाशायचेति।स्रुवेणबलित्रयंदत्वाअभि

५२॥

घारितवैश्वदेवां त्स्रुवेण दाय । अग्नये स्वाहा । इदमग्नये । प्रजापतये स्वाहा । इदं प्रजापतये ।
विश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यः । इत्याहुतित्रयमग्नौ हुत्वा स्थालीपाकोत्तर
र्द्धो द्वैश्वदेवोत्तरार्द्धीद्वा अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । इति हुत्वा । भूरित्या
दि प्रजापत्यान्तानवाहुतीर्जुहुयात् । संस्रवप्राशनं । मार्जनं । पवित्रप्रतिपत्तिः । प्रणीता
विमोकः । ब्रह्मणे दक्षिणा दानान्तं कृत्वा चरुशेषमादाय शालाया बहिरुपलिप्तायां भूमौ
प्राङ्मुखमुपविश्य स्रुवेण । नमः स्त्रियै । इदं स्त्रियै । नमः पुमांसे वयसे वयसे । इदं पुमां
से वयसे वयसे । नमः शुक्लाय कृष्ण दन्ताय पापीनां पतये । इदं शुक्लाय कृष्ण दन्ताय
पापीनां पतये । नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यः । इदं ये मत्यादि ।
नमोस्तु बलिमेभ्यो हरामि स्वस्ति मेस्तु प्रजां मे ददतु । इदं स्त्रियै पुंसे वयसे शुक्लाय कृष्ण
दन्ताय पापीनां पतये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यः । इदमेभ्य इति

वात्यागः।शेषमद्भिः प्रक्षाल्याचम्याग्निसमीपमागत्य एकस्मै ब्राह्मणायभोजनं दद्यात्।तिलसं
कल्पयेदितिपक्षादिकर्म्मविधिः॥ ॥ दर्शेपुनरियन्विशेषः।स्थालीपाकेनाग्नयेबिलवे
द्र इन्द्राग्निभ्यामितिदर्शदेवताभ्यो होमः।पौर्णमासेअनुदितेवारंभः शेषंसमानं।सायम
दिप्रातरंतमेकं कर्म्म प्रवर्त्तते।पौर्णमास्यादिदर्शान्तमेकमेवविदुर्बुधाः॥इतिवचनात्।कृ
ष्णपक्षे।यद्यन्वाधानं तदादर्शमनिष्ट्वैवपौर्णमास्यांपक्षादिकर्म्मारंभः।यत्तुछंदोगपरिशि
ष्टवचनं।ऊर्द्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोपिवाग्रिमः।य आ[illegible]याति स होतव्यः स एव तैर्दिर
तिश्रुतेः।तत्पुनराधानविषयं तत्कालविषयं वा।इतिपक्षादिप्रयोगः।सायादिगर्भेनदध्यौ
हासाभार्यायदिचेत्गर्भन्नधारयेत्तदासिंहस्यांः श्वेतपुष्पादुपोष्यपुष्येणस्ममुद्धृत्यचतु
र्थेहनिस्नातायांनिशायामुदपेषंपिष्ट्वादक्षिणस्यांनासिकायामासिंचतिगर्भंधारयेत्प्रणाय

प३।।

उ४

53

पा ३

घ्राह्मासिद्धयाः कंटकारिकायाः कथंभूतायाः श्वेतपुष्पायाः श्वेतानि पुष्पाणि यस्याः सा श्वे
तपुष्पी तस्याः तु पोष्यपुष्य वा संहृत्वा पुष्येण चंद्रमा यसा युक्तेन पुष्यनक्षत्रेण मूलं शि
फां तु स्थाप्य उद्धृत्य रजोदर्शनाद्यत्तु थेऽहनि स्नातायां भार्यायां रात्रौ उदपेषं यथा भव
ति तथा पिष्ट्वा तन्मूलं दकेन पिष्ट्वा इव्वीमावमापा घेत्यर्थः दक्षिणस्यां नासिकायां द
क्षिणे नासारंध्रे वसिंचति धारयति मन्त्रौ उयमोषधी त्रायमाणा सहमाना सरस्वती
अस्या अहं त्याः पुत्रः पितुरिव नामजग्रभमित्येतेन मंत्रेण। अथ पुंसवनां अथ उ
मर प्राप्तं पुंसवनाख्यं गर्भसंस्कारकं कर्म व्याख्यास्यते पुरास्पंदत इति पुरा अग्रे स्पं
दते वालिख्यं ति यावत्पुरा निपातयोर्लट् इति पुरा योगे भविष्यदर्थे वर्त्तमान प्रयोग इति
हते मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चंद्रमा युज्येत गर्भधारणका
लात् द्वितीये तृतीये वा मासे यस्मिन्नहनि पुंसा पुरुषनाम्ना पुष्यादिनक्षत्रेण उडुना

शश्चीमिति दर्शदेवताभ्यो होमः पौर्णमासेऽनुदिते चारंभः शेषं समानं । स्वाध्यायमादिप्रात
रंतरमेवं कर्म्म प्रवर्त्तते पौर्णमासादि दर्शान्तमेवं कर्म्म विदुर्बुधाः इति वचनात् । दाक्षप्रपञ्चेप्य
ध्याधानं तदा दर्शमनिष्ट्वैव पौर्णमास्यां पञ्चादि कर्म्मारंभः । यत्तु छंदोगपरिशिष्ट वचनम्
ऊर्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोपि वाग्रियः । य आयाति स होतव्यः स एवादिरिति श्रुतेस्तद्व
सुन राधानविषयं लक्ष्याविषयं वा इति पञ्चादिप्रयोगः । सा यदि गर्भं न दधीत । सोमा
र्या यदि चेत्ता गर्भं न धारयेत् । सि० ह्योः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थे ह नि
स्नाता यां निशायां मुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिंचति । गर्भं धारयत्येव मा हा
सि० ह्योः कंटकारिकायाः कथंभूतायाः श्वेतपुष्प्याः श्वेतानि पुष्पाणि यस्याः सा श्वेतपुष्पी
तस्याः । उपोष्य उपवासं कृत्वा पुष्येण चंद्रमसा युक्ते न पुष्यनक्षत्रेण मूलं शिफां उत्थाप्य

उद्धृत्य रत्नोदर्शनाच्चतुर्थेऽहनि स्नातायां भार्यायां रात्रौ। उदपेषं यथा भवति तथा पिष्ट्वा तन्मूलं तु दकेन पिष्ट्वा इडीभावमापाद्येत्यर्थः १। दक्षिणस्यां नासिकायां दक्षिणे नासारंध्रे ऽवासिंचति न्नारयति मन्त्रो। उ यमोषधीं त्रायमाणां सैना सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमित्यनेन मंत्रेण॥ अथ पुंसवनम्। अथ अवसरप्राप्तं पुंसवनाख्यं गर्भसंस्कारकं कर्म्म व्याख्यास्यते। पुरास्पंदत इति। पुरा अग्रे स्पंदते चलिष्यति। यावत्पुरा निपातयोर्लेडिति पुरायोगे भविष्यदर्थे वर्त्तमानप्रयोग इति हेतोः। मासे द्वितीये तृतीये वाप्यदहः पुंसा नक्षत्रेण चंद्रमा युज्येत। गर्भधारणकालात् द्वितीये तृतीये वा मासे यस्मिन्नहनि पुंसा पुरुषनाम्ना पुष्यादिनक्षत्रेण उडुनाशशी युक्तो भवेत्। तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य। तस्मिन्नहनि उपवास्याभोजनं कारयित्वा भार्यामाप्लाव्य स्नापयित्वा अहते नवे सदशे सकृत्प्रक्षालिते वाससी अन्तरीयोत्तरीये द्वे परिधाप्य परिधानं कार

का॰२

यित्वा न्यग्रोधावरोहाँ छुङ्गां श्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनं। न्यग्रोधस्य वटस्याऽ
वरोहान् अवाचीनं अवरोहन्ति जायन्ते इत्यवरोहास्तान् शुङ्गान् अग्रपल्लवान् मुकुलाँरान्
चकारो वरोहसमुच्चयार्थः। ततश्चोमयं। रात्रौ पूर्ववत् गर्भधारणार्थी कृत्वा [illegible] पिष्ट्वा पू
र्ववदेव आसेचनं भर्तुः। दक्षिणनासारंध्रे। मंत्रविशेषमाहो। हिरण्यगर्भोऽद्भ्यः संभृत इत्येता

क॰५

भ्यां ऋग्भ्याम्। कुशकण्टकं सोमांशुं चैके। एके आचार्याः न्यग्रोधावरोहशुंगेषु पिष्टमात्रेषु कु
शस्य कण्टकं मूलं सोमांशुं सोमलताखण्डं च प्रक्षिपन्ति। तत्पश्चात् इध्मचतुष्टयपेषणं। कूर्मपित्ते
चापस्य कृत्वा उत्संगे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्येन मन्त्रमभिमंत्रयते सुपर्णो
ऽसीति प्राग्विष्णुक्रमेभ्यः। अत्र काम्यमाहा। समन्ती यदि कामयेत अयं गर्भः वीर्यवान् शक्तिमा
न् स्यादितीच्छेत्। तदा अस्या भार्यायाः उपस्थे कूर्मपित्तं जलपूर्णं शरावं निधाय विकृत्या
विकृतिछन्दस्कया सुपर्णोऽसीत्यनया ऋचा स्वःपतेत्यन्तया एनं गर्भमभिमंत्रयते। हस्ते

५५॥

नगर्भो शयंस्यष्टामंत्रं जपतीत्यर्थः॥ विष्णुक्रमेभ्यो विष्णुक्रममंत्रेभ्यः प्राक् पूर्वं यावद्विवृत्तेः परिम
णमितिसूत्रार्थः॥ अथ प्रयोगः॥ तत्र गर्भाधानप्रभृति द्वितीये तृतीये वा मासे यस्मिन् दिने पुन्नक्षत्र
युक्तश्चंद्रः तत्र तस्मिन्नहनि गर्भिणीमुपवासं कारयित्वा मातृपूजाभ्युदयिकं विधाय तां स्नापयित्वा
ऽहते वाससी परिधाप्य रात्रौ न्यग्रोधावरोहां शुंगां च उदके न पिष्ट्वा पदे कुशकंटकं सोमांशुं
च नासिकायां दक्षिणपुटे आसिंचति मंत्रेण॥ हिरण्यगर्भोद्भः संभृत इति ऋग्भ्यां। स यदीच्छे
त्वीर्यवान्स्यादयं गर्भः तदा तस्याः स्त्रियाः उदरशरावं उपस्थे कृत्वा सुपर्णोसीत्येतया वि
ष्णोः क्रमोसीत्येतस्मात्प्राक् पठितया विवृत्त्या अवापनं गर्भमभिमंत्रयते मंत्रेण॥ ०॥ अथ सी
मंतोन्नयनं पुंसवनवत्। अथ पुंसवनानंतरं क्रमप्राप्तं सीमंतोन्नयनं गर्भसंस्कारकं क
र्म व्याख्यास्यते। तत्र पुंसवनवत् पुन्नक्षत्रे भवति। प्रथमगर्भे मासे षष्ठे ऽष्टमे वा। आद्य गर्भे
गर्भाधानप्रभृति षष्ठेऽष्टमे वा मासे नियमेन कुर्यात्। गर्भांतरे ऽप्यनियम इति कर्कोपाध्याय

।अन्येतु प्रथम गर्भएवेति। तथाचाश्वलायनगृह्यपरिशिष्टं। प्रथमेगर्भे सीमन्तोन्नय
नसंस्कारो गर्भमात्रसंस्कारः। सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः। यंयंगर्भं प्रसू
यंते स सर्वः। संस्कृतो भवेत्। मीमांसादेवलश्च सकृत्संस्कृता नारी सर्वगर्भेषु संस्कृता
उपवासाप्लावनाहतवासोयुगपरिधापनानि वतिनागृह्ये ते। तिलमुद्गमिश्रं स्थाली
पाकं श्रपयित्वा प्रजापतेर्हुत्वा। तत्र विशेषमाह। तिलैर्मुद्गैर्मिश्रस्तिलमुद्गमिश्रस्तं स्था
लीपाकं मुद्गौदनं चरुं श्रपयित्वा। आज्यभागान्ते प्रजापतये स्वाहेत्येकामाहुतिं हुत्वा स्विष्टकृ
दादिप्राशनान्तं विदध्यात्। पश्चादग्नेर्भद्रपीठ उपविष्टायां। अग्नेः पश्चिमतः मृदुद्वि
णातः स्रद्वासने आसीनायां गर्भिण्यां सत्यां युग्मेन सटालुग्रप्सेनौदुंबरेण त्रिभिश्च दर्भ
पिंजुलैस्त्र्येण्या शलल्या वीरतरशंकुना पूर्णचात्रेण च सीमन्तमूर्द्ध्वं विनयति भूर्भुवः

स्वरितिप्रतिमहाव्याहृतिभिर्ध्यात । सीमन्तमौदुंबरेण औदुंबरवृन्तोद्भवेन युग्मेन घा
दियुग्मफलवता । शलालुग्रप्सेन अपक्वफलैकस्तबकनिबद्धेन । त्रिभिश्च दर्भपिंजुलैस्त्रि
भिर्दर्भपवित्रैश्च । एण्या त्रिषु स्थानेषु श्वेतया । एणीतया । श्येण्या शलल्या । शल्यकाख्यपक्षि
कंटकेन वीरतरशंकुना शरेषीकया । आश्वसेन वा शंकुना । पूर्णचात्रेण वा सूत्रेण पू
र्णपूर्णचात्रसूत्रकर्तनसाधनं तेन लोहकीलकेन । चकारः सर्वसमुच्चयार्थः । अतश्च
र्तुं
औदुंबरयुग्मादिभिः सर्वैः पुंजीकृतैः सीमन्तं स्त्रियाः ऊर्ध्वं विनयति पृथक्करोति । लला
टान्तरमारभ्य केशान्तं द्विधा करोति । भूर्भुवः स्वर्विनयामि इत्येतावता मंत्रेण स
कृदेव । पश्चात्त्रिरमाहावा इति प्रतिमहाव्याहृतिभिः । महाव्याहृतिं महाव्याहृतिं प्रति
वा विनयामि । तत्र भूर्विनयामि । भुवः विनयामि । स्वर्विनयामि इत्येवं त्रिर्विनयनं भव
ति । अत्र व्याहृतिमंत्रपदानां आख्यातपदं विना वाक्यस्यासंपूर्णत्वात् आख्यातपदा

व्याहारः कार्त्तव्यः। तत्र विक्षिप्तयुक्तस्य मंत्रेणाावः स्यादिति न्यायात्। विनयतीति विक्षिपदं वि
परिणम्यं विनयामीत्यध्याह्रियते। त्रिरुक्तमावध्नाति। त्रिवृतं वेलीप्रति आवध्नाति। पुंजो
क्लतमोदुंबरादि पंचकं वल्यां नियुनक्ति। त्यर्थः। अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति
मंत्रेण। अथाह वीणागाथिनो राजानं संगायेतां यो वाप्यन्यो वीरतर इति। अथोदुंबरादि
पंचकस्य वल्लीं बध्नंतं ब्रवीति। किं। हे वीणागाथिनौ राजानं भूपालं संगायेतां। राजन्वल्लीन
संबद्धं धवादि रूपकं सम्यक्गायेतां युवां। अथवा योन्योपि राजव्यतिरिक्तो वीरतरः प्रव
ष्टो वीरः शूरस्तं संगायेतामित्यनुषंगाः इत्याह ब्रवीति। नियुक्तामप्येके गाथामुपोदाहर
न्ति। एके आचार्याः। नियुक्तां गानेविहितां गाथां मंत्रं उपोदाहरन्ति पठंति अपि समुच्चयार्थे
। तत्पत्नी राजवीरतरयोरन्यतरगानं गाथांलंच समुच्चितं नवाति। पत्नीतेर राजवीरतरयो
रन्यतरगानं गाथागानं वा तां गाथामाह। सोम एव नो राजेत्यादि तीरतुम्पमित्यन्तां।

ना५

पद्धतिकारपक्षे राजवीरतरगायानां एकतमस्यैवगानं। तत्पक्षे नियुक्तामपीत्यापश
द्धो विवक्षितार्थः स्यात्। असाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति
ततो गर्भिण्यां नदी उपसमीपे आवसितास्थिता भवति तस्या नद्याः। असाविति गंगा
यमुनाऽस्येवं प्रथमान्तं नाम गृह्णाति। ततो ब्राह्मणभोजनमित्युक्तार्थमिति सूत्रं व्या
ख्या। अथ पद्धतिः। तत्र प्रथमे गर्भे षष्ठेऽष्टमे वा मासि पुण्येऽह्नि मातृपूजां वृद्धिश्राद्धं च
कृत्वा बहिःशालायां पंचभूसंस्कारान्कृत्वा लौकिकाग्निमुपसमाधाय ब्रह्मोपवेशना
द्याज्यभागान्तं विदध्यात्। तत्र विशेषः। पात्रासादने आज्यानंतरं तंडुलतिलमुद्गान्
क्रमेण पृथगासादनं। उपकल्पनीयानि। मृदुपीठयुग्मान्यौदुंबरफलानि एकसूत्र
वर्णनिबद्धानि। त्रयो दर्भपिंजुलाः त्र्येणीशललीवीरतरशंकुः। शरेषीका आश्वत्थो
वा शंकुः पूर्णचात्रं वीणागाथिनौ चेति। आज्यमधिश्रित्य चरुस्थाल्यां मुद्गान्प्रक्षिप्याधि।

त२ ता१ स्थापयित्वा गर्भिण्यां योषितिस्त्रीयां परि ह्निता

ग्नित्वा ईषच्छृते तेषु मुद्गेषु तिलतंडुलप्रक्षेपं कृत्वा पर्यग्निकरणं कुर्यात्। ततश्चाज्यभागा
न्ते स्थालीपाकेन प्रजापतये स्वाहेति हुत्वा इदं प्रजापतये इति त्यागं विधाय स्थालीपाकेनोत्त
राग्निस्विष्टकृदाहुतिं हुत्वा महाव्याहृत्यादि प्राजापत्यान्तां नवाहुतीर्हुत्वा संस्रवं प्राश्य
पूर्णपात्रं वरयोरन्यतरं ब्रह्मणे दत्वा पश्चादग्नेर्भद्रपीठे उपविष्टायां युग्मेन सटालुग्र
प्सेनौदुंबरेण त्रिभिश्च दर्भपिंजुलैः श्येण्या शलल्या वीरतरशंकुना पूर्णचात्रेण चैत्यैतैः
सर्वैः पुंजीकृतैः स्त्रियाः सीमन्तं भूर्भुवः स्वर्विनयामीति ॐ ह्रुं विनयति मंत्रेण सकृत्राय
ह्रा भूर्विनयामि भुवर्विनयामि स्वर्विनयामि इति त्रिर्विनयति। ततो विनयनसाधनमौ
दुंबरादि पंचकं स्त्रिया वेण्यां बध्नाति। अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति मंत्रेण।
अथ वीणागाथिनौ राजानं संगायेतामिति प्रेषं ददाति। अथवा अमुकं वीरतरं संगाये
तामिति। ततस्तौ यज्ञानायप्रेषितौ संगायतः। अथवा वीणागाथिनौ सोमं राजानं संगा

ता।
यतामिँ त्रोषितौ सोमएनोराजेमामानुषीः प्रजाः अविमुक्तैचक्रआसीरंत्तीरेतुम्यंइत्ये
त्रांगाथां वीणागाथिनौगायतः।उतिविकल्पपक्षः।समुच्चयपक्षेराज्ञानंअन्यं
वीरतरंवा।सोमंराजानंचसंगायेतामितिप्रेषितौउभयंगायतः।अंसोत्थानेसमीपा
वस्थितायाःगंगाप्रमुखायाःनद्याःप्रथमान्तंगंगेत्यादिनामग्रहणंतिगार्ग्येवं।ततो
ब्राह्मणेभ्योनंददाति।अत्रप्रथमगर्भइतिवचनात् स्त्रीसंस्कारकर्मत्वाच्च।यतःसकृत्सं
स्कृत संस्काराःसीमन्तेनहिजस्त्रियः।यंयंगर्भंप्रसूयन्तेससर्वःसंस्कृतोभवेत्।नप्रतिग
र्भंसीमन्तोन्नयनं।पुंसवनंतुदृष्टार्थत्वाद्द्वाध्याकरमतेप्रतिगर्भंभवति॥सोष्यन्तीमद्भिरभ्युक्ष
त्येजतुदशमास्यइतिप्राग्यस्येतइति॥सोष्यन्तीप्रसवशूलवतींस्त्रियंमन्त्रोअद्भिर्जलेनअभ्यु
क्षतिप्रसिंचति।एजतुदशमास्यइत्येतयाप्राग्यस्येतइतिप्राकूपर्यन्तयाऋचावसानयाअविरा
ट्जगत्या।अथावरावपतनम्।अथाभ्युक्षणानन्तरंअवरावपतनंअवरंउल्वंजरायु

चे–

वेष्टितं गर्भवेष्टनं अवाचीनं अधःपतत्वनेन जरायुनेत्यवरावपतनो मंत्रः। तं स्त्रीसमीपे उपविश्य
मंत्रं जपति। यथा। अवैतु पृश्नि शेवलमित्यादि अवजरायु पद्यतामित्यंतं। जातस्य कुमारस्याच्छि
न्नायां नाड्यां मेधाजननायुष्ये करोति। ततः जातस्य उत्पन्नस्य कुमारस्य पुत्रस्य अच्छिन्नायां ना
ड्यां अखंडितेनाले सति मेधाजनन नामके मेधाजननं च आयुष्यं च मेधाजनना नाम्नी ष्ये करोति
पिता मेधाजननं तावदाह। अनामिकया सुवर्णांतर्हितया मधु घृते प्राशयति घृतं वा भूस्त्व
यि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति। अनामिकयां
गुल्या सुवर्णेनाच्छादितया मधु घृतं च मधु घृते द्वंद्वसमास सामर्थ्यादेकीकृते घृतं वा केव
लं कुमारं संप्रत्याशयति। कुमारस्य जिह्वायां निमृष्टे। भूस्त्वयीत्यादि सर्वं त्वयि दधामी
त्यनेन मंत्रवाक्यसमुदायेनानन्वयैकित्वादेकं वाक्यमिति जैमिनिसूत्रात्। सुषंतिडं तं च यो

६०॥

वाक्यं क्रियावाकारकान्विता इत्यमरसिंहोक्तेः । एकार्थमेकं वाक्यं एकस्य वाक्यस्य च । तेषां वा
क्यानि राकांक्षं मिथः संबद्धमिति कात्यायनवचनेनैकमंत्रत्वमिति प्रतिपादनात् । कथमत्र
वाक्यसमुदायस्यैकमंत्रत्वं । अत्रोच्यते । सत्यं यदि इतिकारादिकं मंत्रावसानज्ञापकं किंचिन्न
स्यात् । अत्र पुनरितिकारो मंत्रावसानज्ञापको जागर्तीति तेन नायं दोषः । यथा सर्वैर्भूर्भुवरि
त्येतावतैर्वा गार्हपत्यमादधाति । तैः सर्वैः पंचभिराहवनीयमादधाति । भूर्भुवः स्वरिति च श्रु
तौ वाक्यसमुदायस्य इतिकारेण मंत्रावसानं ज्ञायते । कातीयसूत्रमपि । आदा रुग्निर्ज्वल
न्तमादाधाति । भूर्भुवरिति । आहवनीयमादधाति । भूर्भुवः स्वरिति । अत्र यद्यपि एकैकस्या व्या
हृतेर्मंत्रत्वं युक्तं समस्तानां व्याहृतीनां तथापि इतिकारेण द्वयोरपि व्याहृत्योर्मंत्रत्वं व्यवस्था
प्यते । एवमन्यत्रापि बहूनां मंत्रवाक्यानां इतिकाराद्विनियोजकेन मंत्रैक्यम् । तत्र तत्रायमे
वन्यायोनुसर्तव्यः ॥ अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति । अयमेधाजनानन्ते

रं अस्य कुमारस्य आयुष्यं आयुषेहि तं तो वन बर्द्धनं कर्म्म करोति। तत्पश्चात् नाभिदेशे दक्षिणे वा श्रव
णे नाभ्यां दक्षिणे कर्णे वा इति नेयमधिकरणे सप्तमी गंगायां घोष इतिवत् तेन नाभिसमीपे वा
जपः। अग्निरायुष्मान् इत्यादिका मंत्रा न्त्रिर्जपति त्रीन्वारान् उपांशु पठति। अग्निसोम
ब्रह्म देव ऋषि पितृ यज्ञ समुद्र इत्यन्तान् आयुषमिति वा। ततः आयुर्षं जमदग्नेर इत्यादि त
न्नो अस्तु आयुषमित्यन्तं च मंत्रं तथैव त्रिर्जपति। इदं वा आयुष्यकरणं कालातिक्रमे पाक्रियता मे
धाजननं तु मुख्यकालातिक्रमान्निवर्त्तेत। छतं वा प्रेप्रतिले हयन्निस्तनं वानुधापयन्निति
जातमात्रस्य कुमारस्य श्रुत्या मेधाजननोपदेशात्। स यदि कामयेत सर्वमायुरियादिति
वा सप्रश्नेनमभिमृशेत्। सः पिता यदीच्छेत् अयं कुमारः सर्वं संपूर्णं आयुर्जीवितं इयात् प्राप्नुया
त् इति एवं। तदा वात्स प्रेणव त्सप्रिणाभाल न्दृष्टेनानुवाकेन एनं कुमारं अभिमन्त्र ततः

सर्वं शरीरमालभेत। तत्र विशेषमाह। दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि।
दिवस्परीत्यादिको द्वादशर्चोऽनुवाको वात्सप्रः। तस्य उत्तमां अन्त्यां द्वादशीं आस्ताग्नि
रित्येतामृचं परिशिनष्टि व्युदस्यति। तां परित्यज्य एकादशभिः अभिमृशेदित्यर्थः। प्रतिदिशं
पंच ब्राह्मणान् अवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात् प्राणेति व्यानेति दक्षिणोऽपाने
त्यपर उदानेत्युत्तरः समानेति पंचम उपरिष्टादवेक्षमाणो ब्रूयात् स्वयं वा कुर्याद् दनुप
रिक्रामममधियमानेषु उत्सन्नं स्तत्रं। कुमारस्य प्रतिदिशं दिशि चतस्रषु दिक्षु प्राच्यादिषु
मध्ये च यथाक्रमं पंच ब्राह्मणान् अवस्थाप्य सन्निवेश्य कुमाराभिमुखान् ब्रूयात् तानुद्दि
श्य किम्। इममनुप्राणितान् इमं कुमारं अनुप्राणित अनुलक्षीकृत्य प्राणेत्यादि ब्रूत इति प्रै
षः। ततः प्रेषिता ब्राह्मणाः पूर्वादिक्रमेण प्राण इति कुमारं लक्षीकृत्य पूर्वो ब्रूयात्। व्यानेति
दक्षिणो ब्राह्मणः। अपानेति पश्चिमः। उदानेत्युत्तरः। समानेति पंचम उपरिष्टादूर्ध्वमवेक्षमा

वा। नः २

णः। अविद्यमानेषु असत्सु ब्राह्मणेषु स्वयंस्वमेयेव अनुप्राशनं कुर्यात्। कथं अनुपरिक्रामं प
रिक्रम्य परिक्रम्य पूर्वादिकं दिशं प्राणेत्यादि। अस्मिन्मन्त्रे प्रैषाभाव ४। स यस्मिन्देशे जातो न वति
तमभिमन्त्रयते। स कुमार यस्मिन्देशे भूभागे उत्पन्नः पतति तं देशं अभिमन्त्रयते हस्तेन स्पृशति
वेद ते भूमि इत्यादि शरदः शतमित्यन्तेन मन्त्रेण। अथैनमभिमृशत्यश्माभवेति। अथ जन्मदे
शाभिमन्त्रणानन्तरं एनं कुमारं पिताभिमृशति। स मन्त्रतः शरीरे स्पृशति। अश्माभवेत्यादिना
सञ्जीव शरदः शतमित्यन्तेन मन्त्रेण। अनुपरिक्राम मितिणमुलन्तं। वा तस्य प्राभिमर्शनादिए
तदभिमर्शनान्तं काल व्यतिक्रमेपि क्रियते संस्कारकर्मत्वात्। अथास्य मातरमभिमन्त्रयते। इडा
सीति। अथ अनन्तरं अस्य कुमारस्य जननीमभिमन्त्रयते अनिंद्वीकृत्य इडासीत्यादिना वीरवतो
करदित्यन्तेन। अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छतीम ७ स्तनमिति यस्ते स्तन इत्युत्तरमे
ताभ्यां। अथाभिमन्त्रणं कृत्वा अस्याः मातुः दक्षिणं स्तनं प्रक्षाल्य धावयित्वा कुमाराय ददाति

म१ ना३

६२॥

इमं स्तनमित्येतयर्चा। ततउत्तरं वा। मं स्तनं प्रक्षाल्य प्रयच्छति यत्ते स्तन इमं स्तनमि
त्येताभ्यामृग्भ्यां। उदपात्रं शिरस्तो निदधाति। उदपात्रं जलपूर्णं शिरस्तः शिरः प्रदेश
कुमारस्य निदधाति स्थापयति आपो देवेत्यादिं जाग्रथ इत्यनेन मंत्रेण। द्वारदेशे सूति
काग्निमुपसमाधायोत्थानात्संधिवेलायोः फलीकरणमिश्रां सर्षपान आवावपति। ततः पं
चमसंस्कारपूर्वकं द्वारदेशे सूतिका गृहस्य सूतिकाग्निं स्थापयित्वा उत्थानात् उत्थानं
यावत् संधिवेलयोः सायंप्रातः फलीकरणमिश्रान् फलीकरणैः तंदुलकणैर्मिश्रान् युक्ता
न्सर्षपान् तस्मिन्नग्नौ आवपति। जुहोति आहुतीः शंडामर्का इति। आलिखन्ननिमिषद्
ति द्वाभ्यां मंत्राभ्यां आवपनोपदेशात् होमेति कर्त्तव्यतानिवृत्तिः। नैमित्तिकमाह। यदि कुमा
र उपद्रवे जालेन प्रच्छाद्योत्तरीयेण वापि ताडून् आधाय जपति। यदि च कुमारो बालग्रहः
तं बालं उपद्रवेत् अभिभवेत्। तदा तं बालं जाले न मत्स्यग्रहणसाधनेन तदलाभे उत्तरीये

२५

स्तु ४

एवावाससासाऽश्मा घक्वाद्दयित्वाऽङ्केत्संगे निधाय धृत्वा कूर्चुरुइत्यादिकं यत्र वाग्निमश्मा
मसीत्यन्तं मंत्रं जपति जपान्ते कुमारस्य सर्वांगमग्निमश्मानीति सूत्रार्थः ॥ अथ प्रयोगः
॥ सोष्यन्तीस्त्रियं एततु दशमास्य इत्यनयर्चा अस्वजरायुणा सहेत्यन्तया अद्भिरभ्युक्ष
तिपतिः । ततः स्त्रीसमीपे अवैतु पृश्निशैवलं शुने जरायत्त्ववे नैव मंसेन पीवरि नक
स्मिश्चनायतनमवैरायुंप द्यतामित्यन्तं अवरावपतनं मंत्रं जपति । तत्र यदि कुमार उत्पद्येत
रूप५ तदामात्यपूर्णाभ्युदयिके विधाय अच्छिन्ने नाले मेधाजननायुष्ये करोति । तत्र मेधाजननं य
था । अनामिकयांगुल्या सुवर्णेनान्तर्हितया मधुघृते मेलयित्वा केवलं घृतं वा कुमारं भूस्त्वयि
दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीत्यनेन मंत्रेण सकृत्प्रा
शयति । अथायुष्यं करोति । तद्यथा । कुमारस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायु

= ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मंतं करोमि।
ष्मानित्यादिकान् समुद्र आयुष्मानित्यन्तान् अष्टौ मंत्रान् त्रिर्जपति। अग्निरायुष्मान्स वनस्पती
भिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वायुषायु
ष्मंतं करोमि। देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। ऋषय आयुष्म
न्तस्ते व्रतैरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्त
स्तेन त्वायुषायुष्मंतं करोमि। यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन त्वायुषायुष्मंतं करो
मि। समुद्र आयुष्मान्स स्रवन्तीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमीति ततस्त्र्यायुषं ज
मदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषं मंत्रं त्रिर्जपति। स पिता
यदि कामयेत अयं कुमारः सर्वमायुरियादिति तदा कुमारं दिवस्परीत्यारभ्य उशिग्नो
विश्वबुरित्यन्तेन वात्सप्रसंज्ञकेनानुवाकेनाभिमृशेत्। अथ कुमारस्य पूर्वादिषु चतसृ
षु दिक्षु चतुरो ब्राह्मणान् एकं मध्ये अवस्थाप्य इममनुप्राणितेति तान्ब्रूयात्। ततः पू

६३॥

63

र्ध्वेदिक्स्थितो ब्राह्मणः कुमारं लक्षीकृत्य प्राण इति। दक्षिणो व्यान इति। पश्चिमस्थोऽपान इति
। उत्तरः उदान इति। पंचमः समान इति। उपरिष्टादवेक्षमाणः ब्रूयात्। अविद्यमानेषु ब्राह्मणे
षु स्वयमेव तस्यां तस्यां दिशि कुमाराभिमुखं स्थित्वा प्राणेत्यादि पूर्वोक्तं ब्रूयात्। अस्मिन्नर्थे
न प्रैषः। ततो यस्मिन्देशे कुमारो जातो भवति। तं देशं वेद ते भूमि हृदयं दिवि चंद्रमसि श्रितं
वेदाहं तन्मां तद्विद्यात्। पश्येम शरदः शतं जीवेम शरदः शतंऽ शृणुयाम शरदः शतं
इत्यनेन मंत्रेणाभिमंत्रयते। अथैनं कुमारं अश्मा भव परशुर्भव हिरण्यमस्रुतं भव। आत्मा
वै पुत्रनामासि स जीव शरदः शतमित्यनेन मंत्रेणाभिमृशति। अथास्य कुमारस्य मातरम
भिमंत्रयते। इडासि मैत्रावरुणी वीरे वीरमजीजनथाः। सा त्वं वीरवती भव यास्मान्वीरवत
करदित्यनेन मंत्रेण। अथास्य कुमारस्य मातुर्दक्षिणं स्तनं प्रक्षाल्य प्रयच्छति इमंऽ स्त

६४

64

नमित्यनयर्चा। ततउत्तरं वामं प्रक्षाल्य प्रयच्छति यस्तेस्तनश्शय ऽ स्तनमित्येताभ्यामृग्भ्याम्। त
तः कुमारस्य शिरःप्रदेशे उदपात्रं निदधाति स्थापयति। आपो देवेषु जाग्रथ यथा देवेषु जा
ग्रथ। एवमस्यां ऽ सूतिकायां ऽ सपुत्रिकायां जाग्रथेत्यनेन। तदुदपात्रं प्रागुत्थानात्स्था
पितमेव तिष्ठति। ततः सूतिकागृहस्य द्वारदेशे पंचभूसंस्कारान् कृत्वा सूतिकाग्निं स्था
पयित्वा सायंप्रातः संध्याद्वये फलीकरणमिश्रान्सर्षपान् तस्मिन्नग्नौ हस्तेन जुहोति या
सूतिकोत्थानं। कथं। शण्डामर्का उपवीरः शौण्डिकेय उलूखलः। मलिम्लुचो द्रोणासश्च्य
वनो नश्यतादितः स्वाहा इत्यनेन मंत्रेण प्रथमाहुतिं। आलिखन्ननिमिषः किंवदन्त उप
श्रुतिः। हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः
स्वाहा इत्यनेन द्वितीयां। यदि कुमारं बालग्रहो बालमुपद्रवेत्तदा तं बालं जालेनोत्तरीये
ण वा ब वस्त्रेण प्रच्छाद्य अङ्के गृहीत्वा पिता जपति। कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः। चे

द्येष्नुन कस्ट जनमस्ते अस्तु सीसरोलपे तापकरतत्सत्यं यन्ते देवा बरमदद्दुःस त्वं कुमारमे
वावृणीथाः। वेद्येष्नु नकस्ट जनमस्ते अस्तु सीसरोलपे लापकरतत्सत्यं यन्ते सरमाँ तासी
सरः पिताश्यामशबलौ भ्रातरौ। वेद्येष्नु नकस्ट जनमस्ते अस्तु सीसरोलपे ताँरे त्वग्निम्रश
तिन नामयतिनरुदतिनहृष्यतिन स्नायति यत्र वयं वदामो यत्र वाग्निम्रशामसी तन्नेनमं
त्रेणपिताकुमारमग्निम्रशति। दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति। प्रस
वदिनारभ्य दशम्यांतिथौ सूतिकागृहादुत्थाप्य नामकरणंगतया ब्राह्मणान्भोजयित्वा
भोजनं कारयित्वा पिता अपत्यस्य नामधेयं करोति। अत्र दशम्यामिति सूतकान्तोपलक्षणं।
ततश्च यस्य यावन्ति दिनानि सूतकं तावद्दिने सूतिकोत्थापनमित्यर्थः। अपरदिने च नामकरण
म्। तथा च गोभिलसूत्रम्। दशरात्रे व्युष्टे नामकरणमिति। याज्ञवल्क्यवचनं च। अहन्येका

वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः। घोषवन्तोन्ये इति कलापसू०

दशोनामेत्तिनामकरोतीत्युक्तम्। तत्कीदृशमित्यपेक्षायामाह। घ्यक्षरं चतुरक्षरं वा घोषवदाद्यं

तरं तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमाकारान्तं स्त्रियै तद्धितं। द्वे अक्ष

रे यस्य तद्व्यक्षरं। चत्वार्यक्षराणि यस्य तच्चतुरक्षरं। अनयोर्विकल्पः। किं च घोषवदादि। घो

षवदक्षरं आदौ यस्य नाम्नः तद्घोषवदादि। घोषवन्ति चाक्षराणि गघङ जझञ डढण दध

नं बभमहरलवेतानि। अन्तरन्तस्थं। अन्तस्थेत्यन्तस्था यस्य तदन्तरन्तस्थं। अन्तस्था यरलवाः

दीर्घाभिनिष्ठानं। दीर्घमह्रस्वं अभिनिष्ठानमवसानं यस्य तद्दीर्घाभिनिष्ठानं। कृतं कृत्प्र

त्ययान्तं कुमारस्य नामधेयं कुर्यात्। पक्षान्तरे कृतं पितामहादिनाम तत्कुर्यात्। न तद्धितं

न तद्धितप्रत्ययान्तं कुर्यात्। स्त्रिया नाम्नि विशेषमाह। अयुजाक्षरं। अयुजानि विषमाणि

त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तदयुजाक्षरं। आकारान्तं। आकारो अन्ते यस्य तदाकारान्तं

तद्धितं तद्धितप्रत्ययान्तं यस्त्रिये स्त्रिया नाम कुर्यादित्यनुषंगः॥ अपि च शर्म्मा ब्राह्मणस्य वर्म्म क्ष-
त्रियस्य गुप्तेति वैश्यस्य॥ ब्राह्मणस्य विप्रस्य पूर्वोक्तलक्षणनामान्ते शर्म्मेति। क्षत्रियस्य पूर्वोक्त
लक्षणनामान्ते वर्म्मेति। वैश्यस्य गुप्तेति पदं कुर्यात्॥ अथवा ब्राह्मणस्य नाम शर्म्म मंगलप्रति-
पादकं कुर्यात्॥ क्षत्रियस्य वर्म्म शौर्यरक्षाप्रतिपादकं वैश्यस्य धनवन्नाम प्रतिपादकं॥ शूद्रस्य
प्रेष्यत्वप्रतिपादकं॥ इति सूत्रार्थः॥ अथ प्रयोगः॥ सूतकान्ते द्वितीयदिने नामकरणनिमित्त-
कं मातृपूजापूर्वकं माभ्युदयिकं विधाय अन्यत्र ब्राह्मणत्रयं भोज॰यित्वा पिता कुमारस्य घ-
त्त रमित्यादिनोक्तलक्षणं नाम करोति यथाशिष्टाचा॰रादेवराजशर्म्मा इत्यादि। चतुर्थे मासि
निष्क्रमणिका॥ कुमारस्य जन्मतश्चतुर्थे मासि निष्क्रमणिका॥ गृहाद्बहिर्निष्क्रमणं करोति पि-
ता॥ सूर्यमुदीययति तच्चक्षुरिति॥ अथ तच्चक्षुर्देवहितमित्यादिना मंत्रेण पश्येम शरदः शतादित्य

त्तेन मंत्रेण श्रीसूर्यं भगवन्तं रश्मिमालिनं उदीक्षयति कुमारं प्रदर्शयति पिता इति सूत्रार्थः॥
॥ अथ प्रयोगः॥ चतुर्थे मासि शुभे दिने मातृपूजाभ्युदयिके विधाय माता अंके कृतं कुमारं
गृहाद्बहिरानीय तच्चक्षुर्द्देवहितं मंत्रेण शिशोः सूर्यस्य उदीक्षणं पिता कारयति॥ ॥
प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत्॥ प्रोष्य प्रवासादेत्य गृहान् गृहस्थितान् भार्यापुत्रादी
न् उपतिष्ठते। कथं पूर्ववत्। आहिताग्निप्रवासप्रकरणे तद्वत्। तद्यथा। गृहा मा बिभीते
त्यारभ्य उपहूता गृहेषु न इत्येतावत्पर्यन्तैस्त्रिभिर्मंत्रैः गृहानुपस्थाय क्षेमाय तः इत्यादि
ना शंयोरित्यन्तेन मंत्रेण गृहं प्रविशेत्। केचित्तु सूत्रकारेण गृहोपस्थानमात्रविधानात्
मंत्रवत्प्रवेशं नेच्छन्ति। पुत्रं दृष्ट्वा जपत्यंगादंगात्संभवसि हृदयादधिजायसे। आत्मा वै पु
त्रनामासि स जीव शरदः शतमिति। पुत्रं आत्मजं दृष्ट्वा विलोक्य अंगादंगादित्यादिकं मंत्रं ज
पति। अथास्य मूर्द्धानमवजिघ्रति। अथैयानन्तरं अस्य पुत्रस्य मूर्द्धानं शिरः अवजिघ्रति अ

वाचीनं घ्राति। केन मंत्रेण प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषाऽमुक शर्म्मन् जी
व शरदः शतमित्यनेन सकृत् । गवां त्वा हिंकारेणेति च त्रिः । पुनर्गवां त्वा हिंकारेणावजिघ्रामि
सहस्रायुषाऽमुकशर्म्मन् जीव शरदः शतमिति मंत्रेण सकृन्मूर्द्धानमवघ्राय द्विस्तूष्णीमव
जिघ्रति। दक्षिणेऽस्य कर्णे जपति। अस्य पुत्रस्य दक्षिणे श्रवणे अस्मे प्रयन्धि मघवन्नृजीषिन्नि
न्द्रायो विश्ववारस्य भूरेः । अस्मे शतं शरदो जीवसे धा अस्मे वीरां छश्वत इन्द्र शिप्रिन्निति मं
त्रं जपति। अथ सव्ये वामकर्णे। इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नामित्यनेन मंत्रं जपति। स्त्रियै
तु मूर्द्धानमेवावजिघ्रति तूष्णीं । स्त्रियाः पुत्रिकायाः मूर्द्धानमेव अवजिघ्रति तूष्णीं विना मंत्रे
ण एवकारेण दर्शन जपकर्णजपयोर्निवृत्तिः ॥ ॥ षष्ठे मासेन्नप्राशनं । जन्मतः षष्ठे मा
से कुमारस्य अन्नप्राशनं कर्म्म कुर्यात् स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुती जुहो

६७॥

67

स्था०प

ति। अन्नप्राशनस्य इति कर्त्तव्यता विशेषमाह। स्थालीपाकं चरुं यथाश्रपयित्वा आघारावा
ज्यभागौ हुत्वा द्वे आहुती जुहोति। देवीं वाचमित्यादि वाजो नो अद्येति च द्वितीयां इत्यंतस्य
त्रा। आद्येन देवीं वाचमित्यादिकया ऋचा एकामाहुतिं जुहुयात्। इदं वाचे इति त्यागं विधा
य। चकारात् पुनर्देवीं वाचमित्येतस्यान्ते वाजो नः। यथा देवीं वाचमिति वाजो नो अद्येति
च द्वाभ्यां ऋग्भ्यां द्वितीयामाहुतिं हुत्वा इदं वाचे वाजायेति त्यागं कुर्यात्। स्थालीपाकस्य
च रोः प्राणेनान्नमशीय [illegible] त्यादिभिश्चतुर्भिर्मन्त्रैः चतस्रश्चाहुतीर्जुहोति। ततः स्वि
ष्टकृदादि प्राशनान्तं विधाय। सर्वांश्च रसान् सर्वमन्नमेकतोद्धृत्याथैनं प्राशयेत् तूष्णीं॰
हन्तेति वा हन्तकारं मनुष्या इति श्रुतेः। सर्वान् मधुरादीन् रसान् सर्वमन्नं भक्ष्यभोज्यले
ह्यपेयचोष्यादि एकतोद्धृत्य एकतोद्धृत्येत्यत्र विसर्जनीयलोपेपि [illegible] पुनः संधिरार्षः। एक
तः एकस्मिन् पात्रे उद्धृत्य कृत्वा अथानन्तरं एनं कुमारं प्राशयेत्। तूष्णीं मंत्ररहितं हन्तेति

वामंत्रेण। मंत्रंकुतः हन्तकारं मनुष्या इति श्रुतेः। हन्तकारं मनुष्या उपजीवन्ति इति श्रवणात्। भार
द्वाज्या मांसेन वाक्प्रसारकामस्य कपिंजलमांसेनान्नाद्यकामस्य मत्स्यैर्जवनकामस्य कृ
कषाया आयुष्कामस्याद्या ब्रह्मवर्चसकामस्य सर्वैः सर्वकामस्यान्नपर्याय वा अत्र गुणफ
लमाह। भारद्वाज्याः पक्षिण्याः मांसेन कुमारस्य प्राशनं कारयितव्यम् भवति। कस्य पितुः कथं
भूतस्य वाक्प्रसारकामस्य वाचः प्रसारो बहुत्वं कुमारस्य कामयते इति वाक्प्रसारकामः।
तस्य एवमन्नाद्यकामस्य कपिंजलमांसेन एवमुत्तरत्र। अयमर्थः। यदि कुमारस्य अयं वाग्मी स्या
दिति कामयेत तदा भारद्वाज्या मांसं प्राशयेत्। यदि कुमारोन्नादः स्यादिति कामयेत तदा कपिं
जलमांसं प्राशयेत्। कपिंजलः करंडु वा मैरिवा मधूरो वा केचित् तितिरो वेति। यदि कुमारो जवनः
शीघ्रगामी स्यात् न दाय यासं भवं मत्स्यान् प्राशयेत्। यदि कुमारो दीर्घायुः स्यादिति कामयेत

६८॥

तदा हृकषायामांसं प्राशयेत्। यदि कुमारो ब्रह्मवर्चसी स्यादिति कामयेत। तदा आघामां
संप्राशयेत्। यदि वाकृकलारादीनि ब्रह्मवर्चसान्यानि कुमारस्य भवंत्विति कामयेत। तदा भार
द्वाज्यादीनामार्थत्तानां सर्वेषां मांसानि क्रमेण प्राशयेत्। अन्नपर्यायवा। अन्नपरिवर्त्या वा
अन्नवदेकीकृत्य प्राशयेदित्यर्थः। अन्नपर्यायेति अविभक्तिकमार्षपदं। ततो ब्राह्मणभोज
नं मातृ तत्कर्मसमाप्तौ एकस्य ब्राह्मणस्य भोजनं कारयितव्यं। अत्र काण्डपारसमाप्तौ द्विरु
क्तिः॥ यथा कात्यायनसूत्रे अध्यायपरिसमाप्तौ उपस्पृशेदप उपस्पृशेदप इति सूत्रार्थः॥
अथ प्रयोगः॥ कुमारस्य षष्ठमासे चंद्रतारानुकूले शुभे दिने मातृपूर्वकं नांदीमुखं श्राद्धं
विधाय पंचभूसंस्कारान् कृत्वा लौकिकाग्निं स्थापयित्वा ब्रह्मोपवेशना द्याज्यभागांतं वि
दध्यात्। तत्र आज्येन देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सेनो मंद्रे

यमूर्ज्जं दुहाना धेनुर्वागस्मानुपसुष्टु तैतु स्वाहेति प्रथमां। इदं वाचे। इति त्यागं विधाय पुन

र्द्देवीं वाचमित्येतस्यान्ने वाजो नोऽद्य। प्रसुवाति दानं वाजो देवाँ२॥ ऋतुभिः कल्पयाति। वाजो

हि मा सर्व्ववीरं जजान विश्वा आशा वाजपतिर्ज्जयेयꣳ स्वाहेति द्वितीयां। इदं वाचे वाजाय चेति

त्यागं कुर्यीत। अथ स्थालीपाकेन व्रतस्य आहुतीर्जुहोति। तद्यथा। प्राणेनान्नमशीय स्वाहा

इदं प्राणाय। अपानेन गंधानशीय स्वाहा। इदमपानाय। चक्षुषा रूपाण्यशीय स्वाहा। इदं च

क्षुषे। श्रोत्रेण यशोशीय स्वाहा। इदं श्रोत्राय। ततः स्थालीपाकेन स्विष्टकृतं हुत्वा महाव्याहृ

त्यादि प्राजापत्यान्तान् नवाहुतीराज्येन हुत्वा संस्रवप्राशनं दक्षिणादानान्तं कृत्वा। सर्व्वान्नरसा

न्सर्व्वेचान्नं एकस्मिन्पात्रे समुद्धृत्य सकृदेव कुमारं तूष्णीं प्राशयेत्। हंतेति वा मंत्रेण। स यदि कु

मारस्य वाक्प्रसित्वमिच्छेत् तदा भारद्वाज्या मांसं प्राशयेत्। यद्यन्नाद्यत्वं कामयेत तदा कपिंजलमांसं

६८॥

।यदि जवनत्वं तदा मत्स्यमांसं यदि दीर्घायुत्वं तदा कृकषायाः मांसं।यदि ब्रह्मवर्चसं तदा आ
टामांसं।यदि सर्वकामस्तदा सर्वमांसानि क्रमेण प्राशयेत्।एकीकृत्य वा।अस्य कर्म्मणः समृद्ध्य
र्थं ब्राह्मणमेकं भोजयिष्ये इति संकल्प्य ब्राह्मणं भोजयेत्।इत्यन्नप्राशनम्॥ ॥इति त्र्यग्निहोत्री
हरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ प्रथमः काण्डः समा
प्तः॥ ॥अथ चूडाकरणकेशान्तौ तन्त्रेण सूत्रयति॥सांवत्सरिकस्य चूडाकरणं तृतीये वाऽप्रतिह
ते।संवत्सरं अहं अतिक्रान्तः सांवत्सरिकः तस्य कुमारस्य चूडाकरणं चूडाकर्म्म कुर्यात्॥तृ
तीये वा संवत्सरे अप्रतिहते अल्पावशिष्टे।यथामंगलं वा सर्वेषाम्।यद्वा यथामंगलं यथा
कुलाचारं एतदुक्तं भवति।यस्य कुले सांवत्सरिकस्य चूडाकर्म्म क्रियते तस्य सांवत्सरिकस्य।
यस्य तृतीये तस्य तदा।इति व्यवस्थया।यस्य कुले नास्ति नियमः तस्य यदृच्छया विकल्पः।अ

न्ये तु यथामंगलशब्देन धर्म्मशास्त्रान्तरविहितकालान्तरोपलक्षमाहुः। अतश्च सर्व्वेषां तुल्य विकल्पः
षोडशवर्षस्य केशान्तः। षोडशवर्षाण्यतीतानि यस्य असौ षोडशवर्षः तस्य सप्तदशवर्षे केशान्ते
केशान्ताख्यः संस्कारो भवति॥ अत्र यद्यपि सूत्रक्रमोन्यथा तथापि केशान्तस्य कालविकल्पाभा
वात् चूडाकरण एव कालविकल्प इति हेतोः यथामंगलं वा सर्व्वेषां इति सूत्रं पूर्व्वं व्याख्यातं पा
ठक्रमादर्थक्रमो वलीयानिति न्यायात्॥ ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते
वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति। एवं कालमभिधाय कर्म्माभिधत्ते। चूडाक
रणांगतया त्रीन् ब्राह्मणान् भोजयित्वा माता जननी कुमारं पुत्रं चूडाकरणार्हं आदाय गृही
त्वा आप्लाव्य स्नापयित्वा अहते नवे सदशे धौते वाससी द्वे वस्त्रे परिधाप्य परिहिते कारयित्वा
अन्तरीयोत्तरीयत्वेन अंके उत्संगे आधाय स्थापयित्वा पश्चादग्नेः अग्नेः पश्चिमतः उपविश

७०

ति आस्ते। अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिंचति। ततः अन्वारब्धः ब्र
ह्मणा उपस्पृष्टः आज्याहुतीः आघारादिस्विष्टकृदन्ता चतुर्दश हुत्वा संस्रवप्राशनान्ते
शीतासु अप्सु उष्णा अप आसिंचति प्रक्षिपति वक्ष्यमाणमंत्रेण। अन्वारब्धग्रहणेन नित्या
ज्याहुति होमो नियम्यते। उष्णेन वाय उदकेनेत्यादिना केशान्वपति केशश्मश्रूणि छिनत्ति च केशान्ते। के
शान्ते पुनः उष्णेन वाय उदकेनेत्यादिना केशश्मश्रु वपति विशेषः। अथात्र नवनीतपिंडं
घृतपिंडं दध्नो वा प्राश्यति। अथ उष्णोदकसेचनानंतरं अन्वारब्ध आस्वप्सु नवनीतपिंडं घृत
पिंडं दध्नो वा पिंडं प्राश्यति अप्सु तत्पणे प्रक्षिपति। ततः आदाय दक्षिणं गोदानमुंदति स
वित्रा प्रसूता इति। तातस्ताभ्यः अद्भिः चुलुकेनैकदेशमादाय दक्षिणं गोदानं शिरसो
दक्षिणप्रदेशस्थं गोदानं शेसमूहं उंदति क्लेदयति। आर्द्रं करोतीत्यर्थः॥ केन मंत्रेण सवि
त्रा प्रसूतेत्यादिना दीर्घायुत्वाय वर्चसे रयत्ने नाज्येष्या शलल्या विनीय त्रीणि कुशतरुणा

ति२

न्यन्न ईक्षत्योषध इति। त्र्येण्या त्रिश्वेतया शलल्या शल्यककंटकेन विनीय पृथक् पृथक् कृत्य
पूर्वेद्युर्दिनाधिवासितां केशलतिकां तस्याश्च त्रनर्मध्ये कुन्तरा[illegible]त्रीणि त्रिसंख्याकानि कुशत
रुणानि दर्भपत्राणि दधाति धारयति ओषधे त्रायस्वैतिमंत्रेण। शिवो नामेति लोहक्षुरमाद
यनिवर्त्तयामीति प्रवपति। ततः शिवो नामेत्यनेन मंत्रेण लोहक्षुरं ताम्रपरिस्कृतमायसं क्षु
रं आदाय गृहीत्वा दक्षिणकरेण निवर्त्तयामीत्यनेन मंत्रेण प्रवपति तं क्षुरं कुशतरुणान्य
भिनिदधाति। उपसर्गेण [illegible] धात्वर्थो बलादन्यत्र नीयत इति न्यायात् धातूनामनेकार्थत्वा
चेत्यत्र प्रपूर्वो वपतिरभिनिधानार्थः। छेदनार्थत्वे तु उत्तरसूत्रविहितप्रछेदनानर्थक्यं
प्रसज्येत। येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्या
युष्यं जरदष्टिर्यथासदिति सकेशानि प्रछिद्य आनडुहे गोमयपिंडे प्रास्यत्युत्तरतो ध्रियमा

७१॥

ण। येनावपदिति मंत्रेण केशसहितानि कुशतरुणानि प्रच्छिद्य खंडयित्वाग्नेरुत्तरतो भूभागे
ध्रियमाणे स्थाप्यमाने आनडुहेऽर्षभे गोमयपिंडे गोप्रशस्तपिंडे प्रास्यति प्रक्षिपति। एवं द्विर
परं तूष्णीं। एवमुक्तेन प्रकारेण द्विः द्विवारं उंदनादि गोमयपिंडनिधानान्तं तूष्णीं मंत्ररहितं।
कुर्यात्। इतरयोश्चोंदनादि। इतरयोः पश्चिमोत्तरयोः गोदानयोः उंदनादिच्छेदनप्रभृति
कर्म च कारात्सकृन्मंत्रकं द्विरमंत्रकं भवति। अथ पश्चात् त्र्यायुषमिति। अथ दक्षिणगोदान
स्य त्रिरुंदनादि प्रच्छेदनानंतरं पश्चाद्गोदाने विशेषमाह। त्र्यायुषमिति। त्र्यायुषं जम
दग्नेरित्यादिना मंत्रेण सकेशानि कुशतरुणानि सकृत्प्रच्छिद्य तूष्णीं द्विः प्रच्छिद्य गोमय
पिंडे प्रास्यति। अथोत्तरतः। अथानन्तरं उत्तरतगोदाने उंदनादि गोमयपिंडनिधाना
न्ते विशेषमाह। येन भूरिश्चेति स्वस्तय इत्यन्तेन मंत्रेण सकृत्सकेशानां कुशतरुणानां प्र

71

छेदनंत्रिःक्षुरेणशिरःप्रदक्षिणंपरिहरतिसमुखंकेशान्ते।त्रिःत्रीन्वारान्क्षुरेणशिरःमूर्द्धानं
प्रदक्षिणंयथाभवतितथापरिहरति।शिरसःसमन्तात्प्रदक्षिणंक्षुरंभ्रामयतीत्यर्थः४॥तत्र
मंत्रमाह।येनक्षुरेणेत्यादिमास्यायुःप्रमोषीरित्यन्तं।केशान्तेचमुखमितिपदंप्रक्षिपेन्मंत्रेआव
पतां।ताभिरद्भिःशिरःसमुंद्यनापितायक्षुरंप्रयच्छ[ति]त्यक्षुण्वंपरिवपेति।ताभिःशीतोष्णाभि
रद्भिःकुमारस्यशिरःसमुंद्यआर्द्रंविधायनापितायक्षौरकर्त्रेजातिविशेषायक्षुरंअक्षुण्वंपरि
वपेत्यनेनमंत्रेणप्रयच्छति।यथामंगलंकेशशेषकरणंकेशानांशेषकरणंशिखास्थापनंके
शशेषकरणं।यथामंगलंकुलाचारव्यवस्थामनतिक्रम्यभवति।कुलाचाराश्चबहुधा।तद्यथा।
लौगाक्षिःतृतीयस्यवर्षस्यभूयिष्ठेगतेचूडांकारयेत्।दक्षिणतःकंबुजावसिष्ठानांउभयतोऽत्रि
कश्यपानां।मुंडाभृगवः।पंचचूडाआंगिरसःवाजसनेयिनामेकांमंगलार्थेशिखिनोऽन्येइति।

२२ नौ२

२२ २४

कंबुजानां वसिष्ठानां दक्षिणतः कौरयः शिखाम्। द्विमार्गेत्रिकश्यपानां मुंडा भृग्वगवामताः पंचचूडा अंगिरसः। एकाबात्तसनेयिनां मंगलार्थं शिखिनो न्य इति। अनुगुप्तमेतं सकेशं गोमयपिंडं निधाय गोष्ठे पल्वल उदकान्ते वा। अनुगुप्तमावृतं एतं गोमयपिंडं सकेशं केशैः सहितं निधाय स्थापयित्वा गोष्ठे गवां व्रजे पल्वले अल्पोदके सरसि उदकान्ते वा उदकस्य समीपे वा। आचार्याय वरं ददाति। स्वकीयाय आचार्याय वरं आचार्याभिलषितद्रव्यं ददाति कर्मकर्त्ता पित्रादिः। गां केशान्ते। केशान्ते कर्मणि संस्कार्यस्य आचार्याय गां ददाति। संवत्सरं ब्रह्मचर्यं केशान्तात् कर्मानन्तरं संवत्सरं यावत् ब्रह्मचर्यं भवेत्। द्वादशरात्रं षड्रात्रं त्रिरात्रं वा ततः। अवपनं केशान्ते। केशान्तानन्तरं यावज्जीवं अवपनं वा विहितवपनव्यतिरेकेणाविहितवपनं चार्ग गौयां भास्कर क्षेत्रे मातापित्रोर्गुरौ मृते। आधाने सोमपाने च वपनं सप्तसु स्मृतं। तथा वपनं चानुभाविनां प्रतवनीयसां वपनं। तथा मुंडनं चोपवासं च सर्वेषु तीर्थेष्वयं विधिः॥ वर्जयित्वा कुरुक्षेत्रं विशालं वि

रजंगयां। नैमिषं पुष्करं गयामिति पाठान्तरं। प्रयागे वपनं कुर्याद्गयायां पिंडपातनं। दानं दद्यात्कु
रुक्षेत्रे वाराणस्यां तु नुं त्यजेदित्यादिवचननिचयात्प्रतिपादितनिमित्तेषु पुत्रजगर्भाधानादिषु
विवाहपर्यंतेषु संस्कारकर्मसु मुख्यत्वेनापि तेव कर्त्ता। तदभावे सन्निहितोन्यः। तथा च स्मरणं॥
स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु। पिंडानोद्वहनात्तेषां तस्याभावे पितृक्रमात्। एतान्यु
क्तानि नामकरणादीनि चूडाकरणान्तानि मंत्ररहितानि दुहितॄणामपि कुर्यात्। यथाह याज्ञव
ल्क्यः। तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रकः इति। तथा शूद्रस्य। यथाह यमः। शूद्रोप्ये
वंविधः कार्यो विना मंत्रेण संस्कृतः। न केनचित्समसृजच्छंदसा तं प्रजापतिः। एवंविधः गर्भाधा
नादिचूडाकरणान्तैः संस्कारैर्बैजिकगार्भिकपापशून्यः विना मंत्रेण तूष्णीं यतस्तं शूद्रं एकत
मेनापि छंदसा वेदेन समसृजन्न समयोजयत्। तथा ब्रह्मपुराणे। विवाहमात्रं संस्कारं शू
न१

द्रोपिलमतां सदा। मात्रशब्देन विहितेतरसंस्कारनिवृत्तिश्च। एवं ब्रह्मपुराणवचनाच्छूद्र
स्य गर्भाधानपुंसवनसीमन्तजातकर्म्मनामधेयनिष्क्रमणान्नप्राशनचूडाकरणविवाहाः
नव संस्काराविहितास्ते च तूष्णीं इतरेषां निवृत्तिः। प्रसंगादनुपनीतधर्म्मा लिख्यंते। मनुः।
नास्मिन्युज्यते कर्म्म किंचिदामौंजिबंधनात्। नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते। शूद्रेण
हि समस्तावद्यावद्वेदे न जायते। शंखशातातपः। प्राक्चूडाकरणाद्बालः प्रागन्नप्राशना
च्छिशुः। कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनम्। शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृ
तम्। रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारकैः। गौतमः। प्रागुपनयनात्कामचारवादभक्षाः।
नित्यं मद्यं ब्राह्मणोनुपनीतोपि वर्जयेत्। उच्छिष्टादावप्रयता न स्युः। महापातकवर्ज्जं ब्रा
ह्म्ये। मातृपित्रोरथोच्छिष्टं बालो भुंजन्नवैत्सुखी। संस्कारप्रयोजनं वक्ष्यत्युत्तरे तं। यथा
ह याज्ञवल्क्यः। एवमेनः शमं याति बीजगर्भसमुद्भवं। अंगिराः। चित्रकर्म्म यथानेकै

रागे नुन्मीलते शनैः ब्राह्मण्यमर्पितं तस्यात्संस्कारैर्विधिपूर्वकैः मनुः गर्भैर्होमैर्जातकर्मचौ
लमौंजीनिबंधनैः वैजिकं गार्भिकं चैवो द्विजानामपमृज्यते हारीतः गर्भाधानवदुपेतो ब्रह्म
गर्भं संदधाति पुंसवनात्पुंसीकरोति फलस्नानात्पितृजं पाप्मानमपोहति जातकर्मणा
प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नानेन पंचमम्
एतै रष्टभिर्गर्भसंस्कारैर्गर्भोपघातात्पूतो भवति उपनयनाद्यैर[illegible]दभिरनुव्रतैश्चाष्टभिः
स्वछंदसमितो ब्राह्मणः परं पात्रं देवपितॄणां भवति छंदसामायतनं सुमन्तुः तत्र ब्राह्मण
क्षत्रियवैश्यानां वृत्तिर्गर्भाधानपुंसवनसीमन्तोन्नयनं जातकर्म्मनामकरणनिष्क्रमणान्न
प्राशनचूडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणी संयोगः पंचानां यज्ञानाम
नुष्ठानं देवपितृमनुष्यभूतब्रह्मयज्ञानामेतेषां चाष्टकाः पार्वणश्राद्धं श्रावण्याग्रहाय

णीं चैत्र्याश्वयुजीति पाकयज्ञसंस्थाः॥ अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्याग्र
यणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः॥ अग्निष्टोमोत्यग्निष्टोम उक्थ्य षोड
शी वाजपेयोतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था एते चत्वारिंशत्संस्काराः॥ हारीतः॥ द्वि
विध एव संस्कारो भवति। ब्राह्मो दैवश्च। गर्भाधानादिः स्मार्तो ब्राह्मः। पाकयज्ञहविर्यज्ञ
सौम्याश्चेति दैवः॥ ब्राह्मसंस्कारसंस्कृतस्त्रऋषीणां समानतां समानलोकतां सायुज्यं गच्छति
। दैवेनोत्तरेण संस्कारेणानुसंस्कृतो देवानां समानलोकतां सायुज्यतां गच्छतीत्यलमति
प्रसंगेन इति सूत्रार्थः॥ अथ प्रयोगः॥ ॥ तत्र सांवत्सरिकस्य तृतीये वाब्दे वृधिष्ठे गते कुमा
रस्य चूडाकरणं स्वं कर्म कुर्यात्। कुलधर्मव्यवस्थया वा दैवयोगाद्वि[illegible]ते कालालाभे
स्मृत्यन्तरोक्तान्यतमकाले मातृपूजामाभ्युदयिकं च कृत्वा ब्राह्मणत्रयं भोजयित्वा बहिःशा

लायांपरिसमूहनादिभिर्भुवंसंस्कृत्यलौकिकाग्निंस्थापयेत्। अथमाताकुमारमादायस्नाप
यित्वावाससीयुगंपरिधाप्यउत्संगेनिधायअग्नेःपश्चिमतउपविशति। ततोब्रह्मोपवेशनादिआ
ज्यभागान्तेविशेषः। तंडुलवर्जमासादनं। उपकल्पनीयानिचशीतोदकमुष्णोदकंनवनीतंदधि
तदाघपिंडानामेकतमं त्रयेणीशललीत्रीणिकुशतरुणानिपृथक्बद्धानिनव। तान्परिस्तृ
तआयसःक्षुरः। गोमयपिंडंनापितश्चेति। ततःपवित्रकरणादिपर्युक्षणान्तेआघारादिस्विष्ट
कृदंतंचतुर्दशाहुतिहोमंविधायसंस्रवान्आज्यशेषंपूर्णपात्रंचवरयोरन्यतरंब्रह्मणेदद्यात्।
ततःशीतास्वप्सुउष्णाअपआसिंच्यउष्णेनवायउदकेनेध्यदितिकेशान्वपेत्यनेनमंत्रेण।
अत्रउष्णोदकमिश्रितशीतोदके उपकल्पितंनवनीताद्यन्यतमंपिंडंप्रक्षिपति। तदुदकमा
दायसवितासूतानादेव्याआपउंदन्तुतेतनूंदीर्घायुत्वायवर्चसेरत्यनेनमंत्रेणदक्षिणंगोदा

७५॥

75

नं३

नमुंदति। ततस्त्रेण्या शलल्या केशान्विनीयनुं षधे त्रायस्वैति मंत्रेण कुशतरुणमन्तर्द्धी
यशिवोनामासि स्वधितिस्ते पिता नमस्तेअस्तु मामाहिंसीरि त्युपकल्पितं क्षुरमादाय
कुशतरुणान्तर्हितेषु केशेषु निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सु
वीर्याय इत्यनेन मंत्रेण क्षुरमभिनिदधाति। येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य
विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासदित्यनेन मंत्रेण सकेशानि कुशत
रुणानि प्रछिद्य आनडुहे गोमयपिंडे उत्तरतो ध्रियमाणे प्रक्षिपति। एवमेवापरं वारद्वयं उ
दन केशविनयन कुशतरुणान्तर्द्धान क्षुराभिनिधान सकेशकुशतरुणप्रछेदन गोमयपिंडु
प्रासनानि तूष्णीं कुर्यात्। तथा पश्चिमोत्तरयोर्गोदानयोः एवमेव सरुत्संत्र कं हित्तरूष्णीं क
रोस्येतावान्विशेषः। पश्चिमगोदाने आयुषं जमदग्नेः कश्यपस्य आयुषं यद्देवेषु आयुषमि

तिछेदनम्। उत्तरगोदाने। येनभूरिश्चरादिवंज्योक्चपश्चाद्धिसूर्यंतेनतेवपामिब्रह्मणाजी
वातवेजीवनायसुश्लोक्यायस्वस्तयेइत्यनेनमंत्रेण छेदनं। अन्यस्यसर्वंमुंदनादिगोमयपिंड
प्रासनांतंसमानम्। ततोयंक्षुरेणमज्जयतासुपेशसावस्नावावपतिकेशांछिंधिशिरोमा
स्यायुःप्रमोषीरित्यनेनमंत्रेणशिरसःसमन्तात्दक्षिणंक्षुरंभ्रामयतिसक्षुरंमंत्रेणक्षु
स्त्रहीम्रा। ततःतत्तेनैवोदकेनसमस्तांशिरआर्द्रीमापाघअक्षत्वंपरिवपेत्यनेनमंत्रेणना
पितायक्षुरंसमर्प्पयति। सचनापितःकेशवपनंकुर्वन्नरयथोक्तंकेशशेषकरणंकरोति।
ततःसकेशंगोमयपिंडंअनुगुप्तंपल्वलेगोष्ठेवाउदकान्तेवानिधापयात्। चूडाकरणकर्त्तास्वा
चार्यायवरंददाति। केशान्तेपिषोडशवर्षस्यसप्तदशवर्षेइयमेवचूडाकरणेक्रियाइतिक
र्त्तव्यता॥ एतावांस्तुविशेषः॥ उष्णोदकासेकमंत्रेउष्णेनवायउदकेनएधादितेकेशश्मश्रु

वपातथाप्युरपरिहरणेमुखसहितंशिरःपरिहर्तिता।परिहरणमंत्रेचवर्यहेतुरणामज्ञायिते
त्यादिमास्यायुःप्रमोक्षीर्मुखम।तथायस्यकेशान्तःसःस्वाचार्यायगांददाति।संवत्सरंवा
द्वादशरात्रंषड्रात्रंत्रिरात्रंवाब्रह्मचर्यंकरोति।८शान्त्यपेन्द्रयाविकल्पः।तथाकेशान्ता
दूर्ध्वंशास्त्रीयवपनव्यतिरेकेणयावज्जीवमवपनं।शास्त्रीयवपनंवोक्तं॥ ॥अष्टव
र्षंब्राह्मणमुपनयेद्गर्भाष्टमेवा।अष्टौवर्षाणिअतीतानियस्यअसौअष्टवर्षस्तं।ब्रा
ह्मणंद्विजोत्तमंउपनयेत्उपनयनाख्येनसंस्कारेणसंस्कुर्यात।गर्भाष्टमेषुवा।गर्भः
अष्टमोयेषांतानिगर्भाष्टमानितेषुवाउपनयेत्।ततश्चजन्मतोनवमेष्टमेवाउपनयेदि
त्यर्थः।एकादशवर्षंराजन्यं।एकादशवर्षाण्यतीतानियस्यअसौएकादशवर्षस्तं
जन्मतोद्वादशेत्यर्थः॥राजन्यंक्षत्रियंउपनयेदित्यनुषज्यते।द्वादशवर्षंवैश्यं।द्वादश

वर्षाण्यतीतानि यस्य सत थातं जन्मतस्त्रयोदशे मुपनयेत। यथा मंगलं वा सर्वेषां। पक्षान्तर

माह। अथवा सर्वेषां ब्राह्मणक्षत्रियविशां यथा मंगलं यथा कुलधर्म्मा यद्वा यथा मंगलशब्देन स्म

त्यन्तरोक्त पंचवर्षादिकालसंग्रहः। यथाह मनुः। ब्रह्मवर्च्चसकामस्य कार्यं विप्रस्य पंचमे। रा

ज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे। आपस्तंबोपि। अथ काम्यानि। सप्तमे ब्रह्मवर्च्चस

कामं। अष्टमे आयुःकामं नवमे तेजस्कामं दशमे अन्नाद्यकामं एकादशे इंद्रियकामं द्वाद

शे पशुकाममुपनयेत। तथा च वसंते ब्राह्मणमुपनयीत। ग्रीष्मे राजन्यं। शरदि वैश्यं। गर्भाष्टमे

वर्षे वसन्ते ब्राह्मण आत्मानमुपनयेत। एकादशे क्षत्रियो ग्रीष्मे। द्वादशे वैश्यो वर्षासु। वर्षाश

ब्देन शरदेवाभिधीयते। ऋतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति यास्कवचनात्। वर्षास्वन्तर्भ

वति शरत्। एवमुपनयकालमभिधायेदानीं कर्म्माह। ब्राह्मणान्भोजयेत्तं च। त्रीन्ब्राह्मणा

न्भोजयेत्। आशयेत्। तं च कुमारं वपनानन्तरं आशयेत्। इति चकारेणानुषज्यते। पपुद्वशि

नैर

कृ

११॥ रसमलंकृतमानयन्ति। परिसर्वतः उप्तं मुंडितं शिरो यस्य स पर्युप्तशिरास्तं पर्युप्तं अलंकृतं य
थासंभवं रत्नसुवर्णनिर्मितैः कुंडलाद्यलंकरणैः आनयंति। आचार्यपुरुषाः। आचार्यसमीपं
आचार्यलक्षणं यमेनोक्तम्। सत्यवाग्धृतिमान्दक्षः सर्वभूतदयापरः। आस्तिको वेदनिरतः
११ शुचिराचार्य उच्यते॥ वेदाध्ययनसंपन्नो वृत्तिमान्विजितेंद्रियः। नयाजयेद्वृत्तिहीनं वृणुया
च्च न तं गुरुम्। पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति। तत आचार्यः माणवकंअ
ग्नेः पश्चिमत आत्मनो दक्षिणतः अवस्थाप्य अवस्थितं कृत्वा। ब्रह्मचर्यमागामिति ब्रूहीति प्रे
षमुक्त्वा माणवकं ब्रह्मचर्यमागामिति वाचयति। ब्रह्मचार्यसानीति च। ब्रह्मचार्यसानीत्याँर्को
माणवकं प्रेषयति प्रेषितश्च माणवकः ब्रह्मचार्यसानीति वदेत्। अथैनं वासः परिधापयति ये
नेंद्राय बृहस्पतिरित्यादि वर्द्धसे त्यन्तं। अथ वाचनानन्तरं एनं कुमारं आचार्यः वक्ष्यमाणलक्षणं
शाणादिवासः परिधापयति परिहितं कारयति। येनेंद्रायेति मंत्रं पठित्वा। मेखलां बध्नीते। ततः मे

६२

खलां मौंज्यादिकां बध्यमाणलक्षणां बध्नीत। कटिप्रदेशे त्रिवृतां प्रवरसंख्यग्रंथियुतां प्रादक्षिण्ये
न परिवेष्टयति। इयं दुरुक्तं इत्यादिना मेखलेयमित्यनेन मंत्रेण माणवकपठितेन। युवा सुवासा
इत्यादि देवयन्त इत्यनेन वा मंत्रेण। तूष्णीं वा। तूष्णीं वा मेखलां बध्नीत। अत्र यद्यपि सूत्रकारेण य
ज्ञोपवीतधारणं न सूत्रितं। तथापि एवं वक्ष्याः प्राचीनावीति न इति प्रेतोदकदाने प्राचीनावीति
त्वविधानात्। दंडाजिनोपवीतानि मेखलां चैव धारयेत् इति याज्ञवल्क्येन ब्रह्मचारिणः उपवी
तं वि... शिखो व्युपवीतश्च यत्करोति न तत्कृतमिति छंदोगपरिशिष्टे कात्यायनेन सामान्यतः
सर्वाश्रमिणां सदा यज्ञोपवीतधारणस्मरणाच्च। यज्ञोपवीतधारणं तावदुपनयनप्रभृति प्रा
प्तं तच्च कुत्र कर्तव्यमित्यवसरापेक्षायां औचित्यान्मेखलाबंधनानन्तरं युज्यते। एतदेव कर्कोपा
ध्यायवासुदेवदीक्षितरेणुदीक्षितप्रभृतयः स्वस्वग्रंथे यज्ञोपवीतधारणमेत्रावसरे लिखितवन्तः

धारण स्मरणात्तु तथा सदोपवीताभावं सदा बद्धशिखेन च ४+

तत्र सर्वकर्माङ्गार्हत्वान्मंत्रवद्घुष्यत इति मंत्रमपि लिखितवन्तः। ततो यज्ञोपवीतं परमं प
वित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेज इति
माणवकः पठितेन मंत्रेण उपवीतं परिधापयति॥ आचामयति च। अथ तूष्णीं मैणेयमजिनमुत्तरीयं क
रोति दण्डं प्रयच्छति। तं प्रतिगृह्णाति यो मे दंड इति। आचार्यो माणवकाय वक्ष्यमाणलक्षणं दंडं प्रयच्छति
माणवकश्च तं दंडं यो मे दंड इत्यादिना ब्रह्मवर्चसाय इत्यन्तेन मंत्रेण प्रतिगृह्णाति। दीक्षावदेके
दीर्घसत्रमुपैतीति वचनात्। एके आचार्याः दीक्षावत् दीक्षायां यथा दंडप्रदानं सोमे तथेच्छंति।
तत्र उच्छ्रयस्व वनस्पत इत्यादिना यज्ञस्योदृच इत्यन्तेन मंत्रेण यजमानो दंडं उच्छ्रयति। तद्वदत्र ब्र
ह्मचारी केन हेतुना। दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैतीत्यारभ्य ब्रह्मचर्यस्य दीर्घस
त्रसंपत्प्रतिपादनात्। अथास्याद्भिरंजलिनांजलिं पूरयत्यापो हि ष्ठेति तिसृभिः। अथ दंडप्रदा
नानन्तरं आचार्यः अस्य माणवकस्य अंजलिं स्वकीयांजलिस्थाभिरद्भिः आपो हि ष्ठेत्यादिका

भिरस्निस्त्वेँकाग्निः पूरयति। अथैनं सूर्यमुदीक्षयति तच्चक्षुरिति। अथानंतरं एनं माणवकं सूर्यमु
दीक्षस्वेत्येवं प्रेष्य सूर्यमादित्यं उदीक्षयति अवलोकनं कारयति। स च प्रेषितः तच्चक्षुरित्यादिना भू
यश्च शरदः शतादित्यन्तेन मंत्रेण सूर्यमुदीक्षते। अथास्य दक्षिणांसमधि हृदयमालभते मम व्र
तेत इति [illegible]। अथ सूर्यदर्शनानंतरं आचार्यो स्य माणवकस्य दक्षिणांसमधि दक्षिणस्कंध
स्योपरि स्वं दक्षिणहस्तं नीत्वा हृदयं बध्नः मम व्रते ते इत्यादिना बृहस्पतिष्ट्वा नियुनक्तु मह्यमि
त्यन्तेन मंत्रेण आलभते स्पृशति। अथास्य दक्षिणं हस्तं गृहीत्वाह को नामासीति। अथ हृदयालं
भनानंतरं आचार्यः अस्य माणवकस्य स्वकीयेन दक्षिणहस्तेन दक्षिणं हस्तं गृहीत्वा ष्ट्वा को ना
मा[illegible]सि इत्याह ब्रवीति। असावहं भो ३ इति प्रत्याह। एवं पृष्टो माणवकः असौ अमुकशर्म्माहं भोः
३ इति प्रत्याह। प्रतिवचनं दद्यात्। अथैनमाह कस्य ब्रह्मचार्यसीति भवत इत्युच्यमाने इन्द्रस्य
ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविति। अथ प्रतिवचनानंतरं आचार्य एनं माणवक

ग्र५

७७॥ कस्यब्रह्मचार्यसीत्याह पृच्छति।भवतइतिमाणवकेनोच्यमाने।इन्द्रस्यब्रह्मचार्यस्यग्निराचा
र्यस्तवाहमाचार्यस्तवामुकशर्मन्निति पठति।अथैनंभूतेभ्यःपरिददाति।अथानन्तरमेनं
कुमारमाचार्यःभूतेभ्यःप्रजापतिप्रभृतिभ्यःपरिरक्षितुंददाति अर्पयति।तत्रमन्त्रःप्रजा
पतयेत्वेत्यादिरिष्या इत्यन्तः॥प्रदक्षिणमग्निंपरीत्योपविशति।एवंवस्त्रादानादिभिराचार्ये
णसंस्कृतोमाणवकअग्निंप्रदक्षिणंयथाभवतितथापरीत्यपरिक्रम्यपश्चादग्नेराचार्यस्यो
त्तरतःउपविशति आस्ते।अन्वारब्धआज्याहुतीर्हुत्वाप्राशनान्ते।ततःब्रह्मणान्वारब्धआचा
र्यः।आघारादिस्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वासंस्रवप्राशनान्ते।अत्रपुनरन्वारम्भानुवा
दःचतुर्दशाहुतिहोमव्यतिरिक्तःहोमप्रतिषेधार्थः॥अथैनंसंशास्तिब्रह्मचार्यस्यपो
शानकर्म्मकुरुमादिवासुषुप्थावाचंयच्छसमिधमाधेह्यपोशानेति।अथानन्तरमाचार्यःएनं
माणवकंसंशास्तिशिक्षयति।कथंब्रह्मचारी।असिभवामीतिमाणवकेनप्रत्युक्तः॥अपःअशा

नपिवइति। अशानीतिप्रत्युक्तः। मादिवादिवसेसुषुप्थाः मैस्वाप्सीः इति। नस्वपिमीति प्रत्युक्तः।
वाचंगिरंयच्छ नियमयायच्छानीतिप्रत्युक्तः। कर्म्मस्नानादिकं स्ववर्णाश्रमविहितं कुर्व ब्रूहि
।करवाणीतिप्रत्युक्तः। स मिधं वक्ष्यमाणप्रकारेण आधेहि अग्नौ प्रक्षिपेति। अपोशानीतिप्र
र्द्वेवता। अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय
समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वैके पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तय
न्। अथ शासनानन्तरं अस्मै ब्रह्मचारिणे सावित्रीं सवितृदेवत्यां गायत्रीछन्दस्कां विश्वामित्र
दृष्टां एवं उपदिशति। कथंभूतां प्रत्यङ्मुखाय पुनः कथंभूतौ उविष्टाय अग्नेरुत्तरस्यां दिशि
तथा उपसन्नाय पादोपसंग्रहणादिना भजमानाय तथा समीक्षमाणाय सम्यक् आचार्यम
वलोकयते। तथा आचार्येण सम्यगवलोकिताय। पश्चान्तरमाह। दक्षिणतः अग्ने र्दक्षिणस्यां

ताय२

प३

८०॥

दिशि तिष्ठते ऊर्द्ध्वाय ऊर्द्ध्वं स्थिताय वा। आसीनाय उपविष्टाय इत्येके आचार्याः सावित्रीप्रदाने
मन्यन्ते। कथमन्वाह। पच्छः वा दं पादं। अर्द्धर्चशः। तदनु अर्द्धर्चमर्द्धर्चम्। तदनु च सर्वां त्वतो
येनवारेण सह मिलित्वा आवर्त्तयेत्। संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे ष
डहे त्र्यहे वा सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः त्रिष्टुभं राज
न्यस्य जगतीं वैश्यस्य सर्वेषां वा गायत्रीम्। सावित्रीप्रदानस्य कालविकल्पानाह। संवत्स
रे उपनयनमारभ्य पूर्णे वर्षे षण्मास्ये षडेव मासाः षण्मास्यं स्वार्थे तद्धितश्छान्दसो वृद्धिलो
पः। छन्दोवत्सूत्राणि भवन्तीति वचनात्। तस्मिन् षण्मास्ये। चतुर्विंशत्यहे। चतुर्विंशत्या
अहोभिरुपलक्षितः कालः चतुर्विंशत्यहस्तस्मिन्। द्वादशाहे। द्वादशभिरहोभिरुप
लक्षितः कालो द्वादशाहस्तस्मिन्। षडहे षड्भिरहोभिरुपलक्षितः कालः षडहस्तस्मिन्।
त्र्यहे। त्रिभिरहोभिरुपलक्षितः कालस्त्र्यहस्तस्मिन्। वाशब्दः सर्वेषु संवत्सरादिषु संबध्यते॥

एते कालविकल्पाः आचार्यस्य शुश्रूषादिशिष्यगुणतारतम्यापेक्षाः। एवं सामान्येन सावित्रीप्र
दानस्य कालविकल्पानभिधायाधुना ब्राह्मणस्य विशेषमाह। तु शब्दः पक्षव्यावर्तको। ब्रा
ह्मणस्य नैते कालविकल्पाः। किं तु क्षत्रियवैश्ययोः। ब्राह्मणस्य सद्य एव गायत्रीमनुब्रूयात्। त
कथयेत्। आग्नेयो वै ब्राह्मण इति श्रुतेः। आग्नेयो अग्निदेवत्यः ब्राह्मण इति वेदवचनात्। त्रि
ष्टुभं राजन्यस्य जगतीं वैश्यस्य सर्वेषां वा गायत्री। राजन्यस्य क्षत्रियस्य त्रिष्टुभं त्रिष्टुप्छन्दो
यस्यां सा त्रिष्टुप् तां सावित्रीं त्रिष्टुभम्। जगतीछन्दो यस्यां ऋचः सा जगती तां जगतीं सावित्रीं वै
श्यस्य विशः सावित्रीमनुब्रूयादित्यनुषज्यते। सर्वेषां वा गायत्रीमित्ययं पक्षः सर्वेषां ब्राह्मणक्षत्रि
यवैश्यानां गायत्रीमेव गायत्रीछन्दस्कामेव सावित्रीं सावितृदेवताकां तत्सवितुरिति सकलवे
दशाखाम्नातां ऋचमनुब्रूयात्। अत्र तत्राभि दाधानां अत्र सावित्रीप्रदानोत्तरकाले समिधं

कुतः ४

म२

आधानं प्रक्षेपः ब्रह्मचारिणो भवति। अत्र गावितिभाष्यकारः। अवसरस्य पाठादेव सिद्धः।
तत्र पाणिनाग्निमपरिसमूहति। पाणिना दक्षिणहस्तेन अग्निं प्रकृतहोमाधिकरणं परिसमूह
ति संधुक्षति। इंधनप्रक्षेपेण वक्ष्यमाणैः पंचभिर्मंत्रैः। यथा। अग्ने सुश्रवः सुश्रवसम्मा कुरु। य
था त्वमग्ने सुश्रवः सुश्रवा असि। एवं मां सुश्रवः सौश्रवसं कुरु। यथा त्वमग्ने देवानां यज्ञ
स्य निधिपा असि। एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्। केचित्परिसमूहने त्रीन्मंत्रा
न्मन्यन्ते। तद्यथा। अग्ने सुश्रव इत्यारभ्य सम्मा कुरु इत्येकं। यथा त्वमग्न इत्यादि सं कुरु इत्ये
वं द्वितीयं। यथा त्वमग्ने देवानामित्यादि भूयासमित्यन्तं तृतीयमिति प्रदक्षिणमग्निं पर्युक्ष्यो
त्थाय समिधमादधात्यग्नये समिधमिति। ततः प्रदक्षिणं यथा भवति तथाग्निं पर्युक्ष्य दक्षि
ण हस्तगृहीतेनोदकेन परिषिच्य उत्थाय ऊर्ध्वीभूय प्राङ्मुखस्तिष्ठन्नासमिधं। समिद्ध्यतदीप्य

रव१

तेऽग्निरनयेतिसमित। तांसमिधंआदधातिप्रज्ज्वलिते। समिल्लक्षणंछेदोगपरिशिष्टेनांगुष्ठाद
धिकाकार्यासमित्स्थूलनयाच्छिता। नवियुक्तात्वचाचैवनसकीटानपाटिता। प्रादेशान्नाधि
कान्न्यूनानतथास्याद्विशाखिका। नसपर्णानर्निर्वीर्याहोमेषुस्वविजानता। ब्रह्मपुराणे। पला
शाश्वत्थन्यग्रोधप्लक्षवैकंकतोद्भवाः। अश्वत्थोदुंबरौबिल्वश्चंदनःसरलस्तथा। शालश्चदेवदा
रुश्चखादिरश्चेतियाज्ञिकाः। मरीचिः। विशीर्णाविदलाह्रस्वावक्राःससुषिराःकृशाः। दीर्घाः
स्थूलाघुणैर्जुष्टाःकर्मसिद्धिविनाशिकाः। पूर्वंश्लोकं। प्रागग्राःसमिधोदेयास्ताश्चकाम्य
घपाटिताः। काम्येषुचसशल्काद्याविपरीताजिघांसतः। इत्येकेनमंत्रेण। अग्नयेसमिधमा
हार्षंबृहतेजातवेदसे। यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चसाप्रजा
या पशुभिर्ब्रह्मवर्चसेनसमिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी

८२॥

तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहेत्यनेन मंत्रेण। एवं द्वितीयां तथा तृतीयामेषा त
इति वा समुच्चयो वा। एवं अनेनैव मंत्रेण द्वितीयां समिधमादधाति तथानेनैव मंत्रेण तृ
तीयां मंत्रविकल्पमाह। एषा ते अग्ने समिदित्यादि आचार्या सोषीमहीत्यन्तेन मंत्रेण वा अ
थवा अग्नये समिधमित्येषा त इति द्वयो मंत्रयोः समिदाधाने समुच्चयः एकं ततश्च मंत्र
द्वयान्ते समिन्धस्व देवः इति यो मंत्रविकल्पः पूर्ववत्परिसमूहनपर्युक्षणे पूर्ववत् अग्ने सुश्र
वः सुश्रव इत्यादिभिः पंचभिर्मन्त्रैः परिसमूहनं पर्युक्षणमपि पूर्ववत्कुर्यात् पाणी प्रतप्य मुखं
विमृष्टात् तनूपा अग्नेसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे
देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृणेति मेधां मे देवः सविता मेधां देवी सरस्वती मेधाम
श्विनौ देवावाधत्तां पुष्करस्रजाविति। पाणी ह स्तो प्रतप्य तूष्णीं अग्नौ तापयित्वा तनूपा अ
ग्नेसीत्यादिभिः सप्तभिर्मंत्रैः प्रतिमंत्रं पाणिभ्यां मुखं विमृष्टे। ललाटादि चिबुकान्तं प्रोंछेत्

अंगानि च म आप्यायंतां वाक् प्राणश्चक्षुः श्रोत्रं यशो बलमिति। अंगानि च म इत्यनेन मंत्रेण शि
रः प्रभृतीनि पादान्तानि अंगान्यालभेत। एवं वाक् इत्यनेन मुखं। प्राण इत्यनेन नासिके। च
क्षु रित्यनेन चक्षुषी। श्रोत्रमित्यनेन श्रवणे। यशो बलमित्यस्य पाठमात्रं। त्र्यायुषाणि
कुरुते भस्मना ललाट ग्रीवा यां दक्षिणांसे हृदि च त्र्यायुषमिति प्रतिमंत्रम्। त्र्यायुषमित्येते श्च
त्र्यायुषाणि कुरुते। अत्र त्र्यायुष करणं सूत्रकारानुक्तमपि प्रसिद्धत्वात् शिष्टपरंपराचरि
तत्वात् क्रियते। ततो ब्रह्मचारी संध्यामुपास्याग्निकार्यं कृत्वा गुरुरुपसंग्रहणं वृद्धतरेष
भिवादनं वृद्धेषु नमस्कारं कुर्यात्। अत्र स्मृत्यन्तरोक्तमभिवादनं लिख्यते। ततोभिव
दये हृद्यानसाव हमिस्मुवमां इति याज्ञवल्क्यादिस्मृति प्रोक्तं तस्याभिवादनप्रयोगो

यथा। उपसंग्रहणं नाम अमुकगोत्रो अमुक अमुक। अमुकेत्येतावत्प्रवरः अमुकशर्म्मा
हं भो३ श्रीहरिहरशर्म्मन् त्वामभिवादये। इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां द
क्षिणपाणिना गुरोर्दक्षिणपादं सव्येन सव्यं गृह्णीयात्। शिरोवनमनं। अभिवादने पाणिग्रह
णं। अन्यदा नास्ति। पादस्पर्शनं कार्यं न वा। आयुष्मान्भव सौम्य अमुक इति प्लुतान्तमुक्त्वा
अमुकशर्म्मन् इति प्रत्यभिवादः कार्यः। आयुष्मान्भव सौम्येति वा प्रत्यभिवादः। अत्र गु
रवो माता तत्स्वधात्री च पिता पितामहः प्रपितामहो मातामहाश्चान्नदाता भयत्राता चा
र्य्यश्चोपनेता च मंत्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसंग्राह्याः। समावृत्तेन च बलात्समव
यस्के वाऽध्यापके गुरुस्वद्येरेतः। मातुलाश्च पितृव्याः श्वश्रूश्वशुरौ यवीयसं यस्तोपि प्रत्यु
त्थायाभिवाद्याः। उपाध्यायाऋत्विग्ज्येष्ठभ्रातरश्च सर्वेषां पत्न्यश्च मातृष्वसा च सवर्णा
वं१

भ्रातृभार्याचनित्यमभिवाद्याः।विप्रोष्यतूपसंग्राह्या ज्ञातिसंबंधियोषितः।विप्रोष्यविप्रं
कुशलंपृच्छेत्क्षत्रमनामयंवैश्यंक्षेमंसमागम्यशूद्रमारोग्यमेवच।नवाच्योदीक्षितोनाम्ना
यवीयानपिसर्वथा।पूज्यैःसमभिभाषेतभोभवत्कर्मनामभिः।परपत्नीमसंबंधंभगिनीति च
तिभाषयेत।त्रिवर्षपूर्वैःश्रोत्रियोभिवाद्यः।अत्रवर्षाःसंबंधिनश्चस्वल्पेनापिस्वयोनिजः।अ
श्री५ न्येचज्ञानवृद्धाःसदाचारोभिवाद्याः।उदक्यांसूतिकांनारींभर्तृघ्नींगर्भपातिनीं।पाषंडप
तितंव्रात्यंमहापातकिनंशवंनास्तिकंकितवंस्तेनंकृतघ्नंनाभिवादयेत।मत्तंप्रमत्तमुन्म
त्तंधावन्तमशुचिंनरं।वमंतंजृंभमाणंचकुर्वंतंदन्तधावनं।अभ्यक्तंशिरसिस्नानंकुर्वंतं
नाभिवादयेत।जपयज्ञजलस्थंचसमित्पुष्पकुशानलान्।उदपात्रार्घ्यभैक्षान्नंवहंतं
नाभिवादयेत।अभिवाद्यद्विजश्रेष्ठानहोरात्रेणशुध्यति।क्षत्रवैश्याभिवादनेविप्रस्यैवं

शूद्राभिवादने त्रिरात्रं। कार्यं तु रजादिषु। चांडालादिषु चांद्रं स्यादिति संग्रहकृत्स्मृतम्
देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदंडिनं। नमस्कारं न कुर्याच्चेदुपवासेन सिध्यति। सद्वैवा
पि नमस्कार्याः सर्वावस्थासु सर्वदा। अभिवादो नमस्कारस्तथा प्रत्यभिवादनं। आशी
र्वाद्या नमस्कार्यैर्विपर्यस्यस्तु पुनर्नमेत्। स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः॥
अथ भिक्षाचर्याचरणं। अथावसरे भिक्षाचर्यानुष्ठानं। तद्यथा। भवत्पूर्वां ब्राह्मणो भि
क्षेत भवन्मध्यां तु राजन्यो भवदन्त्यां वैश्यः। भवत्पूर्वां भवच्छब्दः पूर्वो यस्याः सा भवत्पू
र्वा तां भिक्षां ब्राह्मणः द्विजोत्तमः भिक्षेत याचेत। तथैव भवच्छब्दो मध्ये यस्याः सा भवन्म
ध्या तां राजन्यः क्षत्रियः भिक्षेतेत्यनुषंगः। भवच्छब्दोऽन्त्ये यस्याः सा भवदन्त्या तां वैश्यः तृ
तीयो वर्णः भिक्षां भिक्षेतेत्यनुवर्तते। तिस्रोऽप्रत्याख्यायिन्यः षड्द्वादश वा परिमिता वा मा

तरं प्रथमामेव। भिक्षेर्द्धातोर्द्विकर्म्मकत्वात्। द्वितीयं कर्म्माह। तिस्रः। तिस्रो भिक्षां भिक्षेत।
कथंभूताः। अप्रत्याख्यायिन्यः। प्रत्याख्यातुं निराकर्तुं शीलं यासां ताः प्रत्याख्यायिन्यः। न
प्रत्याख्यायिन्यः। अप्रत्याख्यायिन्यस्ताः। अप्रत्याख्यायिनीः। अत्र द्वितीयार्थे प्रथमा। भिक्षे
तेति कर्तृप्रत्ययान्तस्याख्यातस्य कर्म्मकारकापे[क्षि]तत्वात्। षड्द्वादशापरिमिता वा।
षड्वा स्त्रियः। द्वादश वा। अपरिमिता वा। असंख्याता वा। भिक्षेतेति सर्वत्रानुषंगः ॥ ४॥ एते
भिक्षाविकल्पा आहारपर्याप्त्यपेक्षया। एके आचार्याः मातरं जननीं प्रथमां भिक्षां भि
क्षेतेत्याहुः। आचार्याय भैक्षं मया लब्धेति। वाग्यतो मौनी अहः शेषं भिक्षान्निवेदनान्त
रतो यावदस्तमयं तिष्ठेत्। नोपविशेन्न वशायीत रागत इत्येके सूत्रकाराः। वर्णयंति।
वयं तु अनियमं मन्यामहे। ततश्च विकल्पः। अहिंसन्नरण्यात् समिध आहृत्य तस्मिन्न
ग्नौ

ग्नौ पूर्ववद्वाधाय वाचं विसृजते। अहिंसनमछिंदनं स्वयंमग्राइत्यर्थः। अरण्या
न्नग्रामात्। समिधः शुष्कोक्तिलक्षणा आहृत्य आनीय तस्मिन्नग्नौ यत्र उपनयनांगहो
मः कृतस्तस्मिन्पूर्ववत्परिसमूहनादि आयुषकरणं यावत् आधाय हुत्वा वाचं
विसृजते मौनं त्यजति। वाग्यमं पद्ये। अधःशाय्यक्षारालवणाशी स्यात् दंडधारणम
ग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्ता
दानानि वर्जयेत्। अत ऊर्द्ध्वं ब्रह्मचारिणो यमनियमानाह। अधःशायितुं शीलमस्या
असावधःशायी स्यात्। तथा अक्षारं अलवणं चाश्नाती त्येवंशीलोऽक्षारालवणा
शी भवेत्। दंडधारणं। दंडस्य स्ववर्णविहितस्य धारणं कुर्यात्। दंडाजिनोपवीताभि
मेखलां चैव धारयेत्सदा लिंगं चिह्नरूपं कुर्यात्। अग्नेः परिचरणं सायंप्रातः परिस

ग्रहणपूर्वं आयुषकरणेन तेन समिदाधानं। गुरुशुश्रूषा। गुरोः शुश्रूषा परिचर्या तां कुर्यात्। भिक्षा
र्थं चर्या भिक्षाचर्या भैक्षचरणमिति यावत्। मधुक्षौद्रं। मांसं पललं। मज्जनं नद्यादावाप्लव
नं। स्नानं तच्छृतोदकेन। उपरिखट्वादौ आसनं उपवेशनं। आसनस्योपरि मसूरिकाद्यासनं
वा। स्त्रीगमनं स्त्रीणां मध्ये अवस्थानं। अनृतं असत्यवचनं। अदत्तानां परद्रव्याणां आदानं ग्र
हणं स्तेयमित्यर्थः। एतानि मध्वादीनि वर्जयेत्। अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मच
र्यं चरेत्। अष्टाभिरधिकानि चत्वारिंशत्। अष्टाचत्वारिंशत्तानि अष्टाचत्वारिंशद्व
र्षाणि अष्टानि वेदब्रह्मचर्यं वेदग्रहणार्थं ब्रह्मचर्यं उक्तलक्षणं चरेत् अनुतिष्ठेत्। अस्मिन्न
पक्षे चतुर्णामपि वेदानां एक एव व्रतादेशः ४ सर्ववेदाहुतिहोमश्च। द्वादश द्वादश वा प्रति
वेदं यावद्ग्रहणं वा। अनुकल्पमाह। वा तदशक्तौ द्वादश द्वादश वर्षाणि प्रतिवेदं वेदे वेदे ब्र

ह्मचर्यं चरेदित्यनुवर्त्तते। तत्राप्यशक्तौ। यावद्ग्रहणं यावत् वेदस्य वेदयोर्वेदानां वा ग्रहणं आचा
र्यात् पाठतोऽर्थतश्च स्वीकरणं। तावद्वा ब्रह्मचर्यं चरेत्। वर्णव्यवस्थया वासः प्रभृतीनि व्य
वस्थितानाह। वासांसि शणक्षौमाविकानि। ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां यथासं
ख्यं शाणक्षौमाविकानि वस्त्राणि परिधेयानि भवन्ति। तत्र शाणमयं शाणं। क्षौमं क्षुमा अतसी
तद्विकारमयं क्षौमं। आविकं। अवेर्मेषस्य विकारं आविकं ऊर्णामयमित्यर्थः। ऐणेयम
जिनमुत्तरीयं ब्राह्मणस्य। एणी हरिणी तस्या इदं ऐणेयं अजिनं कृत्तिः उत्तरीयं भवति ब्रा
ह्मणस्य ब्रह्मचारिणः। रौरवं। राजन्यस्य। रुरुर्मृगविशेषः चित्रमृग इति प्रसिद्धः तस्ये
दं अजिनं रौरवं। राजन्यस्य क्षत्रियस्योत्तरीयं भवति। आजं गव्यं वा वैश्यस्य। अजस्य बस्तस्य
इदं आजं अजिनं कृत्तिः वैश्यस्योत्तरीयं भवति। वा गव्यं गोः इदं गव्यं अजिनं वैश्यस्य उत्तरी
यं भवति। सर्वेषां वा गव्यमसति प्रधानत्वात्। पक्षान्तरमाह। सर्वेषां ब्राह्मणक्षत्रियविशां ग

ध्यंगव्यमजिनेवा उत्तरीयंभवति।कदाचसतिमुख्येअविद्यमानेकुतःप्रधानत्वात्त्वागव्यंहि
अजिनानांप्रधानंवर्णत्याजिनप्रकृतीनांप्रण्यादीनांगोःप्राधान्यंयतः।यद्वागव्यस्यब्रह्म
णःपुरुषसंबंधित्वेनप्रधानत्वात्।तथाचश्रुतिःतेवद्धायपुरुषंगव्येतात्वचमदधुरिति।मौंजी
रशनाब्राह्मणस्यधनुर्ज्याराजन्यस्य मौर्वीवैश्यस्यमुंजाभावेकुशाश्मन्तकबल्वजानां
।मौंजीमुंजःशरःतन्मयीमौंजीरशनामेखलाब्राह्मणस्य ब्रह्मचारिणोभवति।धनु
र्ज्याचापस्यगुणःरशनाराजन्यस्यब्रह्मचारिणः।मौर्वीमुर्वीतृणविशेषस्तन्मयीरशना
स्य३ वैश्यस्यभवति।मुंजस्यअभावेअलाभेब्राह्मणस्यशानांकुशमयीरशनाभवति।धनुर्ज्याभावे
क्षत्रियस्यअश्मन्तकमयी।मौर्व्याभावेबाल्वजीवैश्यस्य।मुंजाभावेशद्वित्रधनुर्ज्यामौर्व्यभा
वापलक्षणार्थः।पालाशोब्राह्मणस्यदंडोवैल्वोराजन्यस्यौदुंबरोवैश्यस्य।पालाशःपला

शा वृक्षोद्भवः ब्राह्मणस्य ब्रह्मचारिणो दंडो भवति स च केशसंमितः पादादिकेशमूलावधि
प्रमाणकः। बैल्वः बिल्ववृक्षोद्भवः क्षत्रियस्य ललाटसंमितः ललाटावधि परिमाणः। भ्रूमध्या
वधिरित्यर्थः। औदुंबरः उदुंबरवृक्षोद्भवः वैश्यस्य ब्रह्मचारिणः मुखसंमितः ओष्ठपुटा
वधिर्दंडः। सर्वे वा सर्वेषाम्। यद्वा सर्वेषां ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां सर्वे पालाश
बैल्वौदुंबराः अनियमेन दंडा भवन्ति। नियमो नास्ति मुख्याभावे यथालाभमुपादेयं। आचा
र्येण हूत उत्थाय प्रतिशृणुयात्। आचार्येण गुरुणा आहूतः आकारितः उत्थाय ऊर्ध्वीभूत्वा
प्रतिशृणुयात् प्रतिवचनं दद्याद् ब्रह्मचारी। शयानं चेदासीनः। चेद्यदि शयानं स्वपन्तं ब्रह्म
चारिणं गुरुराह्वयति। तदा आसीनः उपविष्टः सन् प्रतिवचनं दद्यात्। आसीनं चेत्तिष्ठन्।
आसीनं उपविष्टं चेदाह्वयति। तदा तिष्ठन्नुत्थितः। तिष्ठन्तं चेदभिक्रामन्। यदि तिष्ठन्तं मुत्थि।
तमाह्वयति तदा अभिक्रामन् गुरुमभिमुखं गच्छन् प्रतिशृणुयात्। अभिक्रामन्तं चेदभिधा

वत्। अग्निक्रामन्तं आग्निमुख्येन गच्छन्तं आचार्यः यदि आह्वयति तदा ब्रह्मचारी अग्निधावन्
अग्निमुखं धावन् स न प्रतिशृणुयात्। स एवं वर्त्तमानो मुत्राघवसत्यमुत्राघवसति। स ब्रह्म
चारी एवमुक्तेन मार्गेण ब्रह्मचर्ये वर्त्तमानस्तिष्ठन् अमुत्र स्वर्गाख्ये ग्रहे वसत्य तः बसति तिष्ठ
तिर्द्विरुक्तिस्तुल्यर्था। तस्य स्नातस्य कीर्त्तिर्भवति। तस्य ब्रह्मचारिणः स्नातस्य समावर्त्तस्य की
र्त्तिर्यशो भवति। इति यथोक्तधर्म्मानुष्ठान ब्रह्मचारिणः फलकथनं। त्रयः स्नातका भवन्ति विद्या
स्नातको व्रतस्नातको विद्याव्रतस्नातक इति। त्रयः त्रिःप्रकाराः स्नातकाः भवन्ति। कथं एको विद्या
स्नातकः। अपरो व्रतस्नातकः। अन्यो विद्याव्रतस्नातकः। एतेषां लक्षणमाह। समाप्य वेदम समाप्य
व्रतं यः समावर्त्तते स विद्यास्नातकः। समाप्य व्रतम समाप्य वेदं सः समावर्त्तते स व्रतस्नातकः। उभय
ं समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति। समाप्य समाप्तिं प्राप्तो ऽर्थतश्च अवसानं नीत्वा
वेदं वेदस्य मंत्रब्राह्मणात्मिकां एकां शाखां यः समावर्त्तते स्नाति स ब्रह्मचारी विद्यास्नातको भवति।

स्व५ स्व८

८८॥

एवं समाप्य व्रतं द्वादशवार्षिकादिकं ब्रह्मचर्यं असमाप्य च असंपूर्णमधीत्य वेदं एकां शाखां यो ब्र
ह्मचारी समावर्त्तते स्नानं करोति स व्रतस्नातको भवति। उभयं वेदं ब्रह्मचर्यं समाप्य च व्रतं नीत्वा
यः स्नाति स विद्याव्रतस्नातको भवति। आषोडशाद्वर्षात् ब्राह्मणस्यानतीतः कालो भवत्याद्वावि
ंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्य। उपनयनकालस्य परमवधिमाह। आषोडशात् षोडशा
द्वर्षात्सर्वाक् ब्राह्मणे विप्रस्य अनतीतः न अतीतः उपनयनस्य कालः समयो भवति। आ द्वाविंश
त। द्वाविंशाद्वर्षात्सर्वाक् क्षत्रियस्य। आचतुर्विंशाद्वर्षात् चतुर्विंशाद्वर्षादर्वाक् वैश्य उपन
यनस्य कालः अनतीतो भवति। भवतीति सर्वत्र संबध्यते। अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति। अतः
पंचदशात् एकविंशात्त्रयोविंशाद्वर्षात् ऊर्द्ध्वं अनुपनीताः ब्राह्मणक्षत्रियवैश्याः यथासं
ख्यं पतितसावित्रीकाः पतिताः स्खलिताः अधिकाराभावान्निवृत्ता सावित्री गायत्री येभ्यः ते पतित
सावित्रीका भवंति। संपद्यंते। नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः। एतानप

तितसावित्रीकान्न तउपनयेयुः उपनयनसंस्कारेणनसंस्कुर्युःशिष्टाः। कैश्चिदतिक्रान्तनिषेधैरु
पनीतानपिनअध्यापयेयुः नवेदंपाठयेयुः। तथानयाजयेयुः। कैश्चिदतिक्रान्तनिषेधैर्वेदमध्यापि
तानपितान्ननयाजयेयुःनयज्ञंकारयेयुश्च एभिःपतितसावित्रीकैरनुपनीतैर्वासहनव्यवहरेयुः
स्नानासनशयनभोजनविवाहादिभिःकर्मभिर्नव्यवहारंकुर्युः। कालातिक्रमनियतवत्। गर्भाधा
नादीनिउपनयनान्तानिकर्माणिनियतकालान्यभिहितानि। यदिदैवासुरुषापराधाद्वात
षांनियतस्यकालस्यअतिक्रमोभवति। तदाकिंकर्त्तव्यमितिसंदेहेनिर्णयमाह। कालातिक्रम
यस्यसंस्कारकर्मणःशास्त्रेणनियमितोयःकालःतस्यअतिक्रमेलंघनेनियतवत्। नित्यश्रौत
कल्पेनित्येषुयद्विहितंतद्वत्अनादिष्टंप्रायश्चित्तंभवति। ततःकृतप्रायश्चित्तस्यअतिक्रान्त
कालेसंस्कारकर्मण्यधिकारःसंपद्यते। अनादिष्टप्रायश्चित्तेतिकर्त्तव्यताचप्रयोगेवक्ष्यते।

तु २

अत्र कालातिक्रमइत्युपलक्षणं। अतः अन्येषामपि कर्म्मणां नाशे इदमनादिष्टमेव सर्व्वप्रायश्चि-
त्तं [illegible]गृह्यकारेण प्रायश्चित्तान्तरस्य अनुपदिष्टत्वात्। किं श्रौतानामतिदेशो प्राप्ते। अवि-
ज्ञाते प्रतिमहाव्याहृतिभिः सर्व्वाभिश्चतुर्थं ८॥ सर्व्वप्रायश्चित्तं वेत्यस्यैव कालातिक्रमे नियतव-
दित्यनेनातिदेशः कृतः ततः उपदेशो न कृतो गृह्यकारेण। तत्राविज्ञातमप्रत्यक्षश्रुतिमूलं।
किमिदं [illegible]मार्ग्वेदिकं याजुर्वैदिकं सामवेदिकं चेत्यनिश्चितं स्मार्त्तं कर्म्म। तस्यैवैष श्रौतकल्पे
व्याहृतिचतुष्टयं पंचवारुणहोमं प्रायश्चित्तमुद्दिश्यात्र गृह्यसूत्रे गृह्योक्तकर्म्मणामपि स्मा-
र्त्तत्वात् तद्वेषे तस्यैवातिदेशो युक्तः। न पुनः अज्ञवेदमूलकर्म्मभेषोपदिष्टानाम्। इदानीं पति-
तसावित्रीकविषये संस्कारप्रतिप्रसवमाह। त्रिपुरुषं पतितसावित्रीकाणामपत्यसंस्कारो नाध्या-
पनं च तेषां। त्रिपुरुषं त्रीन् पुरुषान् यावत् ये पतितसावित्रीकाः पितृपुत्रपौत्राः तेषामपत्ये पु-
त्रे संस्कारः उपनयनं भवति न पुंश्चतुर्थादीनां। तेषां च [illegible] उपनीतानामपि अध्यापनं न भवति।

न्न

यी

। निषिद्धस्य न पुनरनुज्ञापनं प्रति प्रसव इति। तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीरन्व्य
वहार्या भवन्तीति वचनात्। तेषां पतितसावित्रीकाणां मध्ये यः संस्कारेप्सुः आत्मानं संस्कारयि
तुकामः स व्रात्यस्तोमेन यज्ञविशेषेण इष्ट्वा व्रात्यस्तोमं यज्ञं कृत्वा व्यवहार्यो भवति। उपनय
नादिसंस्कारयोग्यो भवति। तस्मात्कामं इच्छया व्रात्यस्तोमेनेष्ट्वा अधीयीरन्वेदं पठेयुः। व्यवहा
र्याः लोके शिष्टानां अध्यापनादिषु कर्म्मसु इति वचनात्। श्रुतेः। असंस्कार्यप्रसंगात्। स्फुटत्वमन्त
रोक्ता। अपि असंस्कार्या लिख्यन्ते। षंढान्धबधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्त्त
शुष्कांगिविकलांगिषु। मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिं[द्रि]ये। ध्वस्तपुंस्त्वेपि चैतेषु संस्कारा
स्युर्यथोचितं। मूकोन्मत्तौ न संस्कार्याविति केचित्। कर्म्मस्वनधिकारात्। पातित्यं नास्ति। तदपत्यं सं
स्कार्यं ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवेति श्रुतेः। [illegible] अन्येपि संस्कार्या वित्याहुः। होमंताव

ए०॥

दाचार्यः कुरोति। उपनयनं च विधिनाऽऽचार्यसमीपनयनं अग्निसमीपनयनं वा। सावित्रीवाच
नं वा। अन्यदंगं यथाशक्ति कार्यं विवाहश्च कन्यास्वीकारोऽन्यदंगमिति। औरसक्षेत्रजयोश्चैषां
संस्कार्यो भागहारिणः। औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा। कानीनश्च पुनर्भूजो दत्तः
क्रीतश्च कृत्रिमः। दत्तात्मा च सहोढो जातस्त्वपविद्धसुतस्तुत ॥ पिंडदोंशहरश्चैषां पूर्वाभावे
परः परः। एते द्वादश पुत्राश्च संस्कार्याः स्युर्हि जातयः। केचिदाकुर्द्विजैर्जातौ संस्कार्यौ कुंडगो
लकौ। अमृते च मृते पत्यौ जारजौ कुंडगोलकौ। शंखलिखितौ। नोन्मत्तमूकान्संस्कुर्यात् ॥ ष
स्युः। नापरीक्षितं याजयेत् नाध्यापयेन्नोपनयेत्। आपस्तंबः। शूद्राणामदुष्टकर्मणामुपनय
नं पतञ्चरथकारविषयं। तस्य मातामहीद्वारकं शूद्रत्वम्। अदुष्टकर्मणां मापघपानरहि
तानामिति कल्पतरुकारः ॥ इति सूत्रार्थः ॥ ॥ अथ प्रयोगः ॥ ॥ तत्र ब्राह्मणस्याष्टवार्षिक
स्य गर्भाष्टवार्षिकस्य वा। क्षत्रियस्यैकादशवार्षिकस्य वैश्यस्य द्वादशवार्षिकस्य गर्भाष्टवार्षि

गर्भाष्टवार्षिकस्य वा

कस्य वा। क्षत्रियस्यैकादशवार्षिकस्य वैश्यस्य द्वादशवार्षिकस्योपनयनं कुर्यात्। यथामंगलं स
र्वेषां। सर्वेषामुपनयनं। अथोदगयने शुक्लपक्षे पुण्येहनि मातृपूजापूर्वकं आभ्युदयिकं श्राद्धं
कुर्यात्। कुमारस्य वपनं कारयित्वा ब्राह्मणत्रयस्य भोजनं दत्वा कुमारं च भोजयित्वा बहिःशाला
यां पंचभूसंस्कारान् विधाय लौकिकाग्निं स्थापयित्वा पर्युक्षितशिरसमलंकृतं कुमारं आचार्यपुरु
षाः आचार्यसमीपं आनयन्ति। तत आचार्य आनीतं कुमारं पश्चादग्नेः स्वस्य दक्षिणतः अवस्था
प्य ब्रह्मचर्यमागामिति ब्रूहीति कुमारं प्रतिवदति। ब्रह्मचर्यमागामिति कुमारः प्रतिब्रूयात्।
ब्रह्मचर्यसानीति ब्रूहीत्याचार्येणोक्ते। ब्रह्मचर्यसानीति माणवको ब्रूयात्। अथाचार्यो माणवकं
येनेंद्राय बृहस्पतिर्वासः पर्यदधादमृतं। तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे सउ
त्यनेन मंत्रेण यथोक्तं वासः परिधापयति। तत आचार्यो माणवकस्य कटिप्रदेशे मेखलां बध्नाति। इयं दु

मा २

ते२

॥१॥ रुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्। प्राणापानाभ्यां बलमादधाना स्वसा देवी सु

॥७॥ भगा मेखलेयमिति मंत्रं पठित्वा। युवा सुवासाः परिवीत आगात् स उ श्रेयान्भवति जायमानः। तं धी

रासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वा मंत्रं। तूष्णीं मंत्रवर्ज्जं वा। ततः यज्ञोपवीतं प

९। रमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेज इ

ति मंत्रं पठितवतो माणकस्य दक्षिणं बाहुमुद्धृत्य वामस्कंधे यज्ञोपवीतं निवेशयति। यज्ञोप

वीतलक्षणं तु छंदोगपरिशिष्टे। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं। त्रिवृतं चोपवीतं स्या

त्तस्यैको ग्रंथिरिष्यते। वामावर्त्तं त्रिगुणं कृत्वा प्रदक्षिणावृतं नवगुणं विधाय तदेव त्रिसरं कृ

त्वा ग्रंथिमेकं विदध्यात्। तथा। पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिम्॥ तद्धार्यमुपवीतं स्या

न्नातिलंबं न चोच्छ्रितं। वामस्कंधे धृतं नाभिपृष्ठवंशयोर्धृतं यथा कटिपर्यन्तं प्राप्नोति एतावत्प

रिमाणं कर्त्तव्यमित्यर्थः। कार्प्पासक्षौमगोबालशालवल्कतृणादिकं। सदासंभवतो धार्यमुप
वीतं द्विजातिभिः। शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके। आवेष्ट्य षण्णवत्या तत्त्रिगुणीकृत्य
यत्नतः। २। अब्लिंगकैस्त्रिभिः सम्यक् प्रक्षाल्योर्द्ध्ववृतं च तत्। अप्रदक्षिणमावृत्तं सावित्र्या त्रि
गुणीकृतं। ३। अधः प्रदक्षिणावृत्तं समं स्यान्नवसूत्रकं। त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्स्
मरेत्। ४। यज्ञोपवीतं परममिति मंत्रेण धारयेत्। सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम्
। सावित्र्या दशकृत्वोऽद्भिर्मंत्रिताभिस्तदुक्षयेत्। विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृ
जेत्। ६। स्तनादूर्द्ध्वमधो नाभेर्न धार्यं तत्कथंचन। ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहू
नि वा। ७। तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते। ब्रह्मसूत्रेऽपसव्ये शोऽस्थिते यज्ञोपवीति
ता। ८। प्राचीनावीतिता सव्ये कंठस्थे उपवीतिता। वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्म्मसु

कुशमुंजबाल्वतंतु रज्जोवा सर्व्वजातिषु ॥ ९ ॥ ततस्तथैव त्रलीं माणवकस्य यथोक्तमजिनमुत्तरी
यं कारयति । तथाचार्यो माणवकाय दंडं ददाति । माणवकश्च योमे दंडः परापतद्वैहायसो
धिमूर्ध्यां । तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्च्चसायेत्यनेन मंत्रेण तं प्रतिगृह्णाति । दीक्षा
वह्वा दंडं ददाति प्रतिगृह्णाति वा । अथाचार्यः स्वकीयमंजलिं जलेन पूरयित्वा तेन जलेनां
जलिस्थेन माणवकस्यांजलिं पूरयति । आपोहिष्ठेति ऋचेन । ततो गुरुर्म्माणवकं प्रेषयति सू
र्य्यमुदीक्षस्वेति माणवकश्च प्रेषितस्तच्चक्षुरिति मंत्रेण सूर्यमुदीक्षते । अथाचार्यो माणवकस्य
दक्षिणांसस्योपरि स्वं दक्षिणं हस्तं नीत्वा हृदयमालभते । मम व्रते ते हृदयं दधामि मम चित्तमनु
चित्तं ते अस्तु । मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति मंत्रेण । अथाचार्यो
माणवकस्य दक्षिणं हस्तं गृहीत्वा को नामासीत्याह । एवं पृष्टः कुमारः अमुकशर्म्माहं भो ३ इति
प्रत्याह । पुनराचार्यो माणवकं पृच्छति कस्य ब्रह्मचार्य्य[illegible]सीति । भवत इति माणवकेनोक्ते माना

इंद्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवाहमुकशर्म्मन्न् इत्याचार्यः पठेत्॥ अथैनं कुमा
रं भूतेभ्यः परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि इत्याचार्यः प्रजापतये त्वा परिददामि देवाय
त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिद[दा]दामि विश्वेभ्य
स्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै इत्यनेन मंत्रेण॥ अथ कुमार अग्नि
प्रदक्षिणीकृत्य आचार्यस्योत्तरत उपविशति॥ आचार्यस्तु ब्रह्मोपवेशनादि पर्युक्षणान्तं कृत्वा आ
घारा घाः स्विष्टकृदन्ताश्चतुर्दश [...] हुतीर्ब्रह्मान्वारब्धो हुत्वा हुतशेषं प्राश्य पूर्णपात्रं वरं वा
ब्रह्मणे दद्यात्॥ अनंतरं एनं ब्रह्मचारिणं संशास्ति कथं ब्रह्मचार्य्यसीत्याचार्यो वदति भवामीति
ब्रह्मचारी॥ अपोऽशानेत्याचार्यः अश्नामीति ब्रह्मचारी कर्म्म कुर्वित्याचार्यः करवाणीति ब्रह्मचारी॥
मा दिवा सुषुप्था इत्याचार्यः न स्वपिमीति ब्रह्मचारी वाचं यच्छेत्याचार्यः यच्छामीति ब्रह्मचारी स

१

ऐ३॥

93

य२

मिधमाचरहीत्याचार्येणोक्ते बाढमिति ब्रह्मचारी। अपोऽशानेत्याचार्यः अशानीति ब्रह्मचारी। अथा
स्मै एवं शासिताय ब्रह्मचारिणे आचार्यः सावित्रीमन्वाह। कीदृशाय उत्तरतोऽग्नेः प्रत्यङ्मुखाय
उपविष्टाय पादोपसंग्रहपूर्वकमुपसन्नाय आचार्यं समीक्षमाणाय स्वयमथाचार्येण समीक्षिता
य। कथमन्वाह। ॐकारव्याहृतिपूर्वकं प्रथमं पच्छ एकैकं पादं। तथा द्वितीयमर्द्धर्चशः। तथैव तृती
यं सर्वां स्वयं च ब्रह्मचारिणा सह पठेत्। केषांचित्पक्षे दक्षिणतोऽग्नेस्तिष्ठते आसीनाय वा आचार्यः
उक्तप्रकारेण सावित्रीमन्वाह। संवत्सरे वा षण्मास्ये वा चतुर्विंशत्यहे वा द्वादशाहे वा षडहे वा त्र्य
हे वा काले क्षत्रियवैश्ययोर्ब्रह्मचारिणः आचार्यः सावित्रीं ब्रूयात्। ब्राह्मणाय तु सद्य एव गायत्रीं।
सावित्रीं गायत्रीछंदस्कां सवितृदेवत्यां अवं विश्वामित्रदृष्टां सायमग्निहोत्रहोमान्तरं गार्हपत्या
ग्न्युपस्थाने विनियुक्तां तत्सवितुरिति सर्ववेदशाखाम्नातां ब्रह्मदृष्टगायत्रीछंदस्कपरमात्मदे
वतवेदारंभादौ विनियुक्तं प्रजापतिदृष्टाग्निवायुसूर्यदेवतगायत्र्युष्णिगनुष्टुप्छंदस्का

अग्निपरिचरणम् । गुरुशुश्रूषाभिक्षाचर्या सायंप्रातर्भोजनार्थं संनिधानेवा रद्वयं वा भैक्षचर
णमभिं घे ब्राह्मणगृहे भैक्ष्यं गुर्वनुज्ञया याचित्वा भोजनं विधिना भुंजानः । मधुमांसमज्जनो
पस्पर्शासनस्त्रीगमनानृतादत्तादानानि वर्जयेत् । अस्य तैरेतु मधुमांसांजनोच्छिष्टं सुक्त
स्त्रीप्राणिहिंसनम् । भास्करावलोकनाश्लीलपरिवादादि वर्जयेत् । आदिशब्देन पर्युषित
तांबूलदंतधावनावसक्थिकादिवास्वापछत्रपादुकागंधमाल्योद्वर्तनानुलेपनजलक्री
डाद्यूतनृत्यगीतवाद्यालापादीन्यन्यान्यपि वर्जनीयानि स्मृतानि । तथा । धार्यास्त्वेतां
सदा धार्यं कौपीनं कटिसूत्रकं । कौपीनमहतं धार्यं खंडं वा वस्त्रपार्श्वयुक् । यज्ञोपवीतम
जिनं मौंजीं दंडं च धारयेत् । नष्टे भ्रष्टे नवं मंत्रान्कृत्वा भ्रष्टं जले क्षिपेत् । अष्टाचत्वारि
७ शतं वर्षाणीत्यादि व्यवहार्यो भवतीति वचनादित्यनुक्तार्थम् । कालातिक्रमनिय

९६॥

तवदित्यस्यार्थ उक्त इति कर्त्तव्यतात्र लिख्यते। पूर्णाहुतिवदाज्यं संस्कृत्य अनादिष्टप्राय
श्चित्तहोमं कुर्यात्। पूर्णाहुतिर्यथा कात्यायनसूत्रे पूर्णाहुतिं जुहोतीति निरूप्याज्यमधिश्रि
त्य स्रुक्स्रुवं च संमृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वान्वारब्ध एव ८ सर्वत्राग्रेत्र एवं प्रयोगः
। यदावसाथिकस्य अनादिष्टं प्राप्नोति तदाग्निः संस्कृत एव। यदि निरग्निस्तदा शुद्धायां
भूमौ पंचभूसंस्कारान्कृत्वा लौकिकमग्निं स्थापयित्वा स्थाल्यामाज्यं तूष्णीं निरूप्याग्नावधि
श्रित्य स्रुवं दर्भैः संमृज्याज्यमुद्वास्य कुशातरुणाभ्यामुत्पूयावेक्ष्य स्रुवेण दायोपारिस
मिधं निधायोत्थाय स्रुवं सव्ये कृत्वा दक्षिणेनाग्नौ तिष्ठन्समिधमाधायोपविश्य दक्षिणं
जान्वच्य भूः स्वाहेति स्रुवस्थेनाज्येनैकामाहुतिं हुत्वा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः
स्वाहेति चतस्रः। त्वन्नो अग्न इत्यादिभिः पंचभिः पंच स्रुवेणावदायावदायाज्याहुतीर्जुहोति।
इदं नवाहुतिहोमात्मकं यत्र प्रायश्चित्तानादेशः कर्म्मणां नियतकालातिक्रमे वानादिष्ट

न१

संज्ञकं प्रायश्चित्तं बोद्धव्यं। यदा तु कस्मिंश्चित् स्थालीपाकादिकर्म्मप्रयोगे वर्त्तमाने अनादि
ष्टं प्रायश्चित्तमापद्यते। तदा तत्कर्म्माङ्गभूतमेवाग्नौ तत्कृत्वा अनादिष्टं दत्वा उपरितनं प्रयो
गं कुर्य्यात्। यदा तु बहूनि निमित्तानि भवन्ति। तदा प्रतिनिमित्तं नैमित्तिकमावर्त्तेत इति न्या
यात्। यावन्ति निमित्तानि तावत्कृत्वः प्रायश्चित्तमावर्त्तेत यथा तन्त्रम्॥ इत्युपनयनपद्धतिः॥ ॥
अत्र बेदब्रह्मचर्य्यं चरेदित्यनेन बेदाध्ययनांगतया ब्रह्मचर्य्याचरणमुक्तं॥ बेदाध्ययनारंभ
स्य कालः इतिकर्त्तव्यता च नोक्ता॥ केवलं समावर्त्तनकर्म्मसूत्रकारेण स्ववेदं समाप्य स्ना
यादिति। तत्र बेदस्य आरंभं बिना समाप्तिः कर्त्तुमशक्येति। उपनयनानन्तरमेव बेदारंभ
स्य समय इत्यवगम्यते। इतिकर्त्तव्यता च पुनः एतदेव ब्रतादेशनविसर्गेष्विति उपाकर्म्म
होमातिदेशाद्ब्रतादेशने बेदारंभे प्राप्नोति॥ अतश्च उपनीय गुरुः शिष्यं महाव्याहृति

७॥

पूर्वकं। वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेदिति गुरोः उपनयनानन्तरं वेदाध्यापन
विधानाद्य। उपनयनानन्तरकालं पुण्येहनि मातृपूजापूर्वकं वेदारंभनिमित्तमाभ्युदयि
कं श्राद्धमाचार्यो विधाय पंचभूसंस्कारपूर्वकं लौकिकाग्निं स्थापयित्वा ब्रह्मचारिणमा
हूय अग्नेः पश्चात्स्वस्योत्तरत उपवेश्य ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा यद्यृग्वेदमा
रभ्यते तदा पृथिव्यै स्वाहा अग्नये स्वाहेति द्वावाहुती हुत्वा ब्रह्मणे छंदोभ्य इत्याद्यानवा
हुतीर्हुत्वा शेषं समापयेत्। यदि यजुर्वेदं तदाज्यभागान्तरं अन्तरिक्षाय स्वाहा वायवे स्वाहेति
विशेषः। यदा सामवेदं तदाज्यभागान्ते दिवे स्वाहा सूर्याय स्वाहेति विशेषः। यदाथर्ववेदं तदा
ज्यभागान्ते दिग्भ्यः स्वाहा चंद्रमसे स्वाहेति विशेषः॥ यद्येकदा सर्ववेदारंभस्तदाज्यभागा
न्तरं प्रतिवेदं वेदाहुति द्वयं द्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्याहुति द्वयं च हुत्वा प्रजापतय इत्या
द्याः सप्ततंत्रेण जुहुयात्। अनंतरं महाव्याहृत्या स्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वा प्राश

नंविधायपूर्णपात्रवरयोरन्यतरंब्रह्मणेदत्त्वाब्रह्मचारिणेयथाविधिवेदमध्यापयितुमा
रभतइतिव्रतादेशप्रयोगः॥ ॥ अथसमावर्त्तनमारभ्यते॥ वेदंसमाप्यस्नायाद्ब्रह्मच
र्यंवा।वेदंमंत्रब्राह्मणात्मकंसमाप्यसम्यक्पाठतःअर्थतश्चअन्तंनीं स्नायाद्वक्ष्यमाणेन
विधिनास्नानंकुर्यात्।अथवाब्रह्मचर्यव्रतंअष्टाचत्वारिंशकं।अष्टाचत्वारिंशद्व
र्षनिर्द्दिष्टसमाप्यअवसानंप्राप्यगुरुणानुमतःस्नायादितिगतेनसंबंधः। द्वादशकेप्ये
के। एकेस्त्वेवकाराः द्वादशकेपि द्वादशवर्षंसमाप्येतिव्रतेवारतेस्नायादितिमन्यन्ते।त
त्रापिगुरुणानुज्ञातः।अत्रास्त्वाश्रितमपिउभयंवेदंव्रतंचसमाप्यवास्नायादित्यनुषज्यते।
यतःपूर्व्वस्नातकस्यत्रैविध्यमुक्तं।विधिर्व्विधेयस्तर्कश्चवेदः।वेदंसमाप्येत्युक्तं।तत्रापिक्रि
यान्विदइत्यपेक्षायामाह।विधिःविधत्तइतिविधिःअग्नीनादधीतअग्निहोत्रंजुहुयात्।

श्र२

१८

ज्योतिष्टोमेन यजेत इत्यादि। विधायकं ब्राह्मणवाक्यं विधेयः विधीयते विनियुज्यते ब्राह्म
णवाक्येन कर्म्मांगत्वेनेति विधेयो मंत्रः इषेत्वादिः। तत्कोऽर्थवादः इति कर्त्तोपाध्यायः। य
था उक्तः शर्करा उपदधाति इति विधिः श्रूयते। तत्रांजनसाधनं घृतं तैलं वा तन्मध्ये केना
क्ता इति संशयते तेजो वै घृतमिति अर्थवादात् घृतेनाक्ता इति निर्णीयते। अतस्तत्कोऽर्थ
वादः। तत्कोमीमांसेति कल्पतरुकारः॥ चकारात्रापत्तधेयभाग संग्रहः। यतो वेदो विध्य
र्थवादमंत्रनामधेयभेदैश्च तुद्वीमीमांसकैर्विचार्यते। यथा अग्निहोत्रं। आघारो यागभे
दो। उद्भिद्बलभिदिति नामधेयानि। षडंगमेके। एकेस्तत्रकाराः षडंगं वेदं समाप्य स्नाना
यादित्याहुः षड् शिक्षा कल्प व्याकरण निरुक्त ज्योतिष छंदांसि अंगानि यस्य वेदस्य सः
षडंगः षडंगं। न कल्पमात्रं। कल्पमात्रं ग्रंथमात्रं। मंत्रं वा ब्राह्मणं वा अधीते न स्नानमिच्छं
ति। कल्पमात्राध्ययनस्य अनुष्ठानायोग्यत्वात्। अतः येयथातो धिकारः। अथातो धर्म्मजि

धर्म

ज्ञासा। अथातो ब्रह्मजिज्ञासेत्यादिभिरधिकारसूत्रैः अधीतसकलवेदस्याग्निहोत्रादिकर्म
स्वधिकार इत्याचार्यैर्व्याख्येते। कामं तु याज्ञिकस्यानुशब्दः पक्षव्यावृत्तौ। कामं इच्छया याज्ञिक
स्य श्राद्धयैवादियज्ञविद्याकर्म्मकुशलस्य स्नानमिच्छन्ति। अयमर्थः। मंत्रब्राह्मणात्मकं वे
दमधीत्य अववुद्ध्य च स्नायादित्येकः पक्षः। सांगं वेदमधीत्यावबुध्य स्नायादित्यपरः। ग्रंथमात्र
मप्यधीत्य यज्ञविद्यां वाभ्यस्य स्नायादिति तृतीयः। यज्ञविद्याविरहेण ग्रंथमात्रं अधीतेन स्ना
यादिति निषेधः। यतो वेदाध्ययनं वेदविहिताग्निहोत्रादिकर्म्माद्यनुष्ठानप्रयोजनम्। उपसं
नै३ ग्रह्य गुरुं सन्निधौ न्याधाय परिक्षितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वा प्रा नामु
दकुंभानां येष्वन्तरं यः प्रविष्टा गोह्य उपगोह्यामपूषामनोहा स्वलोविरनुत्तनुदुषुरिद्धि
हातान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिंचते। स्नायादि
सुक्तं। कथं स्नायादित्यपेक्षिते आह। उपसंगृह्य। उपसंग्रहणविधिनाऽरण्यकं गुरुं आये

२ मऽग्नो आधाय प्रक्षिप्य अत्र समिधोऽभ्याधायेत्युक्तं। तत्समिदाधानं किं वेदाहुत्या
दि समावर्त्तनहोमात्पूर्वं उत पश्चात् वेदाहुतिहोमस्य त्रुटिः

९९

समिधः पूर्वोक्तलक्षणास्तिस्रः परिसमूहनादि आयुष्यकरणान्तेन विधिना आचार्यो नि
वर्त्तितसमावर्त्तनांगहोमः कुतः प्राप्तः इति चेत्। एतदेवव्रतादेशनविसर्गेष्विष्यति दे
शात् तर्हि पूर्वमेव तु उपसंगृह्य गुरुं ऽ समिधोऽभ्याधायेति पाठात्। समिदाधानानन्तरं
वेदाहुतीनामवसर इ[illegible] तिगम्यते। नैतदेवं। अत्यादि वेदाहुतीनां अवसरः समिदाधा
नात्पूर्वं समिदाधानं च स्नानात्पूर्वमिति क्रमस्य ज्ञापितत्वात्। कथं। स्यामपयन् समि
धमादधाति सा प्रथमा याज्याऽ स्नास्यत्सो दयनीयेति श्रुतेः तस्मात् समावर्त्तनहोमान्ते
उपसंग्रहणादि। परिशिष्टितस्य परिवेष्टितस्य सर्वतः प्रच्छादितस्य समावर्त्तनांगहोमसा
धनाग्निस्थापनप्रदेशस्य। उत्तरतः उत्तरस्मिन्भागे कुशेषु प्राक्कूलेषु प्रागग्रेषु आस्तीर्णेषु
पुरस्तात्प्राच्यां दिशि केषां अष्टानामुदकुंभानां दक्षिणोत्तरायतानां अष्टसंख्याकानां
अमलजलपूर्णानां। आम्रादिशुभपल्लवमुखानां स्थितानां स्थितिं कृत्वा ऊर्द्ध्वीभूय तस्य थे ४।

येप्स्वन्तरग्नयः इत्यादिना मंत्रेण तमिह गृह्णामीत्यन्तेन एकस्मात्प्रथमातिक्रमे कारणेना-
वादिति न्यायेन प्रथमात्प्राच्युदंविवाकर्म्मणीत्यनेन न्यायेन दक्षिणस्य प्रथमत्वं। अपः जलं
दक्षिणहस्तेन गृहीत्वा तेन जलेन अभिषिंचति। अभ्युक्षति शिरतः स्नानकर्त्तात्मानं तत्र मंत्रः
तेन मामभिषिंचामीत्यादि ब्रह्मवर्च्चसायेत्यन्तः। येन श्रियमकृणुतां येनावमृशतां सुरां
येनाक्ष्यावभ्यषिंचतां यद्वान्तः दश्विना यश इत्यापोहिष्ठेति च प्रत्यृचं त्रिभिस्तृचीभिमितरैः। एवं
एकोदकुंभजलसाध्यस्नानमभिधाय इतरसप्तकुंभोदकजलसाधनस्नानमात्रे मंत्रविशेषा-
भिधानात् येप्स्व- न्तरग्नय इत्ययमेव सर्वोदकुंभजलग्रहणे साधारणो मंत्र इति प्रतीयते। ततः
सर्वेभ्यो द्वितीयादिकुंभेभ्यः प्रत्येकं येप्स्वन्तरिति मंत्रेण जलमादायादाय वक्ष्यमाणैर्म्मंत्रैर्यथा-
क्रममभिषिंचेत्। तद्यथा। येन श्रियमिति द्वितीयं आपोहिष्ठेति तृतीयं यो वः शिवतम इति च-
तुर्थं। तस्मा अरंगमामवं पंचमं। तृचीभितराणि स्नानानि। उदुत्तममिति मेखलामुन्मुच्यानिधा-

ति १

१००

यवासोन्यत्परिधायादित्यमुपतिष्ठते। उदुत्तममितिमंत्रेणमेखलांरशनांउन्मुच्यउद्वृ
सामर्थ्यात्शिरोमार्गेणनिःसार्यनिधायमूमौनिक्षिप्यअन्यद्वस्त्रंपरिधायआदित्यंसूर्यं
उद्यन्नद्यत्यादिभिर्मंत्रैः उपतिष्ठतेस्नातिति। दाधितिलान्वाप्राश्यजटालोमनखानि
सं हृत्यौदुंबरेणदंतान्धावयेत। ततोदधितिलानामन्यतरंप्राश्यअशिलाजटाश्चलोमानि
चनखानिचजटालोमनखानि। तानिसंहृत्यसंहार्यवायधिलेत्यर्थः। अत्रसंहृत्येतिणिचोलो
पश्छांदसः। स्वयंसंहर्तुमशक्यत्वात्। औदुंबरेणद्वादशांगुलेनकनिष्ठिकाग्रवत्स्थूलेनउदुं
बरकाष्ठेन। अन्नाद्यायव्यूहध्वमितिमंत्रेणदंतान्धावयेत्। प्रक्षालयेद्ब्राह्मणः। दशां
गुलेनराजन्यः। अष्टांगुलेनवैश्यः। इतिविशेषः। अत्रजटालोमनखवपनान्निमित्तादुत्त
रत्रपुनःस्नात्वेतिपुनःशब्दसामर्थ्याद्वस्नानमापद्यते। अतोवपनानंतरंस्नानाचमनेविधा
यदन्तान्प्रक्षालयेदितिसिद्धम्। उत्सायपुनःस्नात्वानुलेपनंनासिकयोर्मुखस्यचोपज्ञ

क्लीतो। उपेत्साद्यसुगंधिनाद्रव्येण शरीरमुद्वर्त्य पुनःभूयःस्नात्वा शिरःप्रभृतीन्यंगानि प्र
क्षाल्य अनुलेपनं चंदनादि मुखनासिकयोः उप[illegible]र क्लीतो। मुखं नासिकां च अनुलिंपति प्रा
णापानौ मे तर्प्पयेत्यादिना श्रोत्रं मे तर्प्पयेत्यन्तेना पितरः शुंधध्वमिति पाण्योरवनेजनं दक्षि
णानुषिच्यानुलिप्य जपेत्। ततः पाण्योरव[illegible]नेजन हस्तयोः प्रक्षालनमुदकं पितरः शुंधध्वमि
त्यनेन मंत्रेण प्राचीनावीती दक्षिणामुखो भूत्वा दक्षिणस्यां दिशि निषिच्य यज्ञोपवीती भूत्वा
पितृकर्मकरणनिमित्तकं उदकस्पर्शं विधाय चंदनादिना सुगंधद्रव्येण गात्राण्यनुलिप्य सु
चक्षा अहमित्यादि भूयासमित्यन्तं मंत्रं जपेत्। अहतं वासो धौतं वा मंत्रेण छादयीत परि
धास्याइति। ततः अहतं नवं सदशं सपवित्रं वासः वसनं आच्छादयीत परिदधीत। तदला
भे अमोत्रेण अरजकेन धौतं क्षालितं परिधास्याइत्यादिना अभिसंव्ययिष्य इत्यन्तेन मंत्रेण।
अथोत्तरीयं यशसा मेति। अथ अन्तरीपरिधानानन्तरं तादृशमेवोत्तरीयं वासो यशसा मे

१०१

त्यादिना यशोमा प्रतिपद्यतामित्यनेन मंत्रेण। आच्छादयीतेति गतेनाख्यातेनसंबंधः।
एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत। द्वे यदि एकमेव वासो भवति तदापूर्वस्यैव। प
रिधानीयस्य वाससउत्तरवर्गेण उत्तरभागेन प्रच्छादयीत यशसा मामेति मंत्रेणेत्तरीयं कु
र्यादित्यर्थः। सुमनसः प्रतिगृह्णाति याआहरदिति। सुमनसः पुष्पाणि प्रतिगृह्णाति अन्ये
न दत्तानि आदत्ते याआहरदित्यादिना यशसा च भगेन चेत्यनेन मंत्रेण। अथावबध्नीते
यद्यशइति। अथ प्रतिगृह्य स्रजमवबध्नीते शिरसि बध्नाति यद्यशोप्सरसामित्यादिना यशो
मयीत्यनेन मंत्रेण। उष्णीषेण शिरो वेष्टयते युवा सुवासा इति। उष्णीषेण पूर्वोक्तेलक्षणे
नततीयेन वाससा शिरोमूर्द्धानं वेष्टयते। युवासुवासा इत्यादिकां यो देवयन्त इत्यन्तया
र्चा। अलंकरणमसि भूयोलंकरणं भूयादिति कर्णवेष्टकौ। अलंकरणमसीति मंत्रे
ण दक्षिणोत्तरयोः कर्णवेष्टकौ प्रतिमंत्रं प्रतिमुंचते परिधत्ते। वृत्रस्य त्वेत्यक्षिणी। वृत्रस्य

३१

४ = न्तर्द्देहीति। छत्रंआतपत्रं बृहस्पतेः छदिरसीत्यादिनायशसोमाम न्तर्द्दे ४

त्यादिना च तुर्म्मिदेहीत्यन्तेन मंत्रेण यथाक्रमं दक्षिणवामे। मंत्रावृत्त्या ग्रहे॥ सौवीराघ

न्तेनेनसंस्करोति। रोचिस्णुरसीत्यात्मानमादर्शे प्रेक्षते। रोचिस्णुरसीत्यनेन मंत्रेण आत्मा

नंमुखप्रभृशरीरं आदर्शे दर्प्पणे प्रेक्ष्यते पश्यति। छत्रं प्रतिगृह्णाति। बृहस्पतेः छदिरसि

पाप्मनोमामंन्तर्द्धेहि तेजसोयशसोमामंन्तर्द्देहीत्यंतेन मंत्रेण प्रतिगृह्णाति। प्रतिग्रहशब्द

सामर्थ्यात्। अन्यत आदत्ते। प्रतिष्ठस्थो विश्वतोमापातमित्युपानहौ प्रतिमुंचते। मंत्रस्य द्वि

वचनात्वात्परिधातुंशक्यत्वाद्वा। प्रतिष्ठेस्थ इति द्विवचनंस्थ इति च युगपत्पादयोः प

रिधत्ते। विश्वाभ्योमानाष्ट्राभ्यस्परिपाहि सर्वत इति वै। एवं दंडमादत्ते विश्वाभ्योमेत्यादि

ना मंत्रेणवैणवं बशमयं दंडं यष्टिं आदत्ते गृह्णाति। इदं अभिषेकप्रभृति दंडग्रहणान्तं क

र्म ज्ञातंस्नानकर्त्तांकरोति नाचार्यः। दन्तप्रक्षालनादीनि नित्यमपि वासस्त्रांपानहश्चा

चै२ नू

१०२॥ पूर्वाणि चेन्मंत्राः। दंतप्रक्षालनमादौ येषां पुष्पादीनां तानि दन्तप्रक्षालनादीनि नित्य
मपि सर्वदा मंत्रवन्ति स्नातकस्य भवन्ति। वाससी च छत्रं च उपानहौ च वासश्छत्रोपानहः।
चकाराद् दंडोपि। एतानि ग्रहणादि अपूर्वाणि निर्मितानि धार्यन्ते यस्य तदा मंत्रो भवतीति
ग्रहणे। स्नातस्य यमान्वक्ष्यामः। स्नातस्य ब्रह्मचर्यात्समावृत्तस्य द्विजातेः यमान्व्रतानि
तद् वक्ष्यामः। कथयिष्यामहे। कामादितरौ। कामात् इच्छया इतरः द्विजातेरन्यः शूद्रो इत्यादि
यावत्। यमेषु अस्नातोपि अधिक्रियते। नृत्तगीतवादित्राणि न कुर्यान्न च गच्छेत् नृत्तं
लास्यादिभेदभिन्नं गीतं षड्जादिस्वरैर्ध्रुवादिरूपकविशेषैर्निबद्धं वादित्रं तत्त्वा
दिभेदेन चतुर्विधं नृत्तं च गीतं च वादित्रं च नृत्तगीतवादित्राणि तानि स्वयं न कुर्यान्न
न च गच्छेत्। नृत्तादीनि अन्यैः प्रक्रियमाणानि न गच्छेत्। द्रष्टुं श्रोतुं चकारः करोतिग
च्छति क्रियासमुच्चयार्थः ४। कामं तु गीतं गायति वैव गीते वारमत इति स्मृतेः हि। अत्र गा

स१ सुरवितं३

तेप्रतिष्ठं वमाहा तुपुनः कामं रक्षयागीतंगानं स्वयं कुर्यात्। परैः क्रियमाणं चगच्छेत् श्रोतुं कुतः
हियस्मात् गायतिस्वयंगानंकरोतिगीतं वाअन्यैः क्रियमाणेगाने रमते रतिं प्राप्नोतिइति श्रु
तिर्वेदवचनं कः यः सद्यः सद्यः मन्यते आत्मानं संपूर्णं मन्यते सस्वयंगायतिगीतं चशृणुया
अपरं सूत्रं अपर मिथिगायेत् गीतं च शृणुयात् उत्येतदर्थे त्ता पक्वं वदे लिंगमस्ति यया श्वमेध
श्रूयते दिवाब्राह्मणोगायतिन क्तं राजन्य इति अनेन ब्राह्मणराजन्ययोः स्वयंगानेऽधिकारो
स्तीति ज्ञायते तो च अश्वमेधयाजिनं यजमानं राजन्यं श्रावयितुंगायतः तेन श्रावणेऽधिका
रोगम्यते द्वेमनन्तं ग्रामान्तरं नगच्छेत् द्वे मे सति श्राद्धमावसतिन क्तं रात्रौ ग्रामान्तरं अन्यग्रामं
नगच्छेत् अद्वेमेतुगच्छेत् नचधावेत् द्वेमेसति सनुषज्यते नचधावेत् शीघ्रं नगच्छेत्॥
उदपानावेक्षणं वृक्षारोहणं फलप्रपैतनं संधिसर्पणं बिवृतस्नानं विषमलंघनं सुक्तं वदन

भि१ द१ वे२

संध्यादित्यप्रेक्षणमैक्षणानि न कुर्यात्। उदपानस्य कूपस्य अवेक्षणं उपरिस्थित्वा अधोमुखी

१०३।।
103

भूयावलोकनं। वृक्षे आरोहणं उपरिगमनं। आम्रादानां प्रपतनं त्रोटनं। संधौ संध्या[illegible]स

मये [illegible] सर्पणं अध्वगमनं। संधिना अपमार्गेण वा सर्पणं। विवस्त्रेन नग्नेन स्नानं। विषँस्यप

म

र्द्धे तस्य गर्त्तादेः लंघनमतिक्रमणं। सुप्तस्य अश्लीलस्य वदनं भाषणं। अश्लीलं तु त्रिविधं

लज्जाकरं दुःखकरं अमंगलसूचकं च। संध्यासु आदित्यस्य सूर्यमंडलस्य रागतः प्रेक्षणं द

र्शनम्। उपरक्तस्य वारिप्रतिबिंबितस्य च नोप॰ रक्तं न वारिस्थमिति मनुस्मृतेः। नेक्षेता

त्य४

दित्यं नास्तं यंतं कदाचन। नोपरक्तं न वारिस्थं न मध्ये नभसो गतं। मिक्षणं मेहचर्यं। एता

नि उदपानावेक्षणादीनि भिक्षणान्तानि वर्जयेत्। न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जय

तीति श्रुतेः।। भिक्षणनिषेधे श्रुतिं प्रमाणत्वेनावतारयति। स्नात्वा समावर्त्त्यन॰ भिक्षेता। यतः

स्नात्वा भिक्षां अंजयति अपाकरोति। ह वै इति तिनिपातसमुदायः निश्चयार्थः इं वेदवचनात्

प१ ति।

वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदिति॥ देवे वर्षति अप्रावृतः अनाछादितः व्र
जेत्॥ गच्छेत्॥ अयम्मे वज्र इत्यनेन मंत्रेण॥ अप्स्वात्मानं नावेक्षेत॥ अप्सु जले आत्मानं स्वमु
खं नावेक्षेत न पश्येत्॥ अजातलोम्नीं विपुंश्चीं षंढं च नोपहसेत्॥ समयेन जातानि लोमानि
यस्याः सा न अजातलोम्नी तां अजातलोम्नीं नोपहसेत्॥ न च गच्छेत विपुंसीं च पुरुषाकारीं स्त्रियं
कूर्च्चादिविकारेण॥ षंढं नपुंसकं नोपहसेत् इत्यनुवर्त्तते॥ गर्भिणीं विजन्येति ब्रूयात्॥ गर्भिणीं
अन्तर्वत्नीं विजन्या इति नाम ब्रूयात्॥ इति वदेत्॥ सकुलमिति न कुलं भगालमिति कपालं [illegible]त्॥ म
णिधनुरिती इन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीत॥ सकुलमिति न कुलं ब्रूयात्॥ कपालं कर्परं भगा
लमिति ब्रूयात्॥ इंद्रधनुः मणिधनुरिति ब्रूयात्॥ परस्य गां सुरभिं धयन्तीं वत्सं पाययन्तीं पर
स्मै अन्यस्मै स्वामिने नाचक्षीत न कथयेत्॥ उद्धेरायामनन्तर्हितायां भूमावुत्सर्ग्गास्तिष्ठन्नम

त्रपुरीषंनकुर्यात्।उर्व्वरायांसस्यवत्यांभूमौपथिव्यांकेवलायांतृणैरनन्तर्हितायांमूत्रपुरीषं
मूत्रस्यपुरीषस्यवाउत्सर्गंनकुर्यात्।किंचतिष्ठन्‌ऊर्द्ध्वःनकुर्यात्।तथाउपसर्पन्‌उत्प्लव
मानःनकुर्यात्।स्वयंप्रशीर्णेनकाष्ठेनप्रमृज्जीत।स्वयंआत्मनाप्रयत्नंविनाप्रशीर्णेनछिन्नेन
पतितेनकाष्ठेनदारुशकलेनअयज्ञियेनप्रमृज्जीतओंछयेत्।पुरीषोत्सर्गसन्निधानात्।
गुदमित्यध्याहारः।विकृतंवासोनाछादयीत।विकृतंमंजिष्ठादिरागेणविकारमापादितं
वासोवस्त्रंनपरिदधीत।नील्यादिरक्तंविकृतं।कषायरक्तंतुननिषिध्यतेकिंतुप्रशस्यत
इतिभाष्यकारः।दृढव्रतोवधत्रःस्यात्सर्व्वेषांमित्रमिव।दृढंस्थिरंव्रतंआरब्धंकर्म्मयस्यस
दृढव्रतःस्यात्‌भवेत्।किंचवधात्‌घातात्त्रायतेरक्षतीतिवधत्रःस्यात्।किंचसर्व्वेषांस्वे
षांपरेषांचमित्रमिवसखेव॥सुहृदिवहितकारीवदित्यर्थः॥४॥मैत्रोब्राह्मणउच्यतेइति
स्मरणात्।अत्रयोदृष्टार्थविषयःप्रतिषेधःतत्रदृष्टार्थोवदेवनिवृत्तिप्राप्तोप्रतिषेधसाम

र्थो ददृष्टमव्यनुमीयते। अत एव प्रायश्चित्तस्मरणं स्नातकव्रतलोपे तु एकरात्रमभोज
नं। इति स्मरणात्। तिस्रो रात्रीर्व्रतं चरेत्। एवं स्नातकस्य समावर्तनप्रभृति यावद्गार्हस्थ्यं
कर्तव्यत्वेन वर्जनीयत्वेन च मनुगीतादीन्यभिधाय। अधुना तस्यैव समावर्तनदिनमा
रभ्य त्रिरात्रव्रतचर्यामाह। तिस्रः त्रिसंख्याः [illegible] रात्रीः अहोरात्राणि। व्रतं वक्ष्यमाणं चरेत्। अनु
तिष्ठेत्। अमांसाशी मृन्मयपायी। मांसमश्नातीत्येवं शीलो मांसाशी तद्विपरीतः अमांसाशी
[illegible]। मृन्मयेन मृदादिनिर्मितेन पात्रेणापिबतीति मृन्मयपायी तद्विपरीतः अ
मृन्मयपायी। स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषणं च तैः। स्त्री नारी। शूद्रश्च
तुर्थो वर्णः। शवः मृतशरीरं। कृष्णशकुनिः काकः। श्वा कुक्कुरः। एतेषां अदर्शनं अवलोकना
भावः। तैः स्त्रीशूद्रादिभिश्च सह संभाषणं न संभाषा असंभाषा। शवशूद्रसूतकान्नानि च नाद्या

२०५।।

त्। नाद्यान्नमश्नीयेत्। शकानि। शवोत्सूतकं। तस्मिन् जाते सति क्रीत्वा लब्ध्वा वयत् ज्ञातिभिर
घृते। शूद्रस्य अवरवर्णस्य नाभिपितादेर्मात्यान्नस्यादि पिसूतके प्रसवाशौचे संतिय ज्ञात
ज्ञातीनाम न्नं तत्सूतकान्नं। तानि शवशूद्रसूतकान्नानि। चकारः स्त्रियादि घदर्शनादि
समुच्चयार्थः। मूत्रपुरीषे ष्ठीवनं चातपेन कुर्यात्। मूत्रं च पुरीषं च मूत्रपुरीषे आतपे धर्मे
न कुर्यात्। नोत्सृजेत्। तथा ष्ठीवनं च श्लेष्ममुखाल्लालादिनिस्रावः। सूर्याच्चात्मानं ना
तर्द्धीत। सूर्यात् आदित्यात् आत्मानं स्वं छत्रादिना अन्तर्हितं न कुर्यात्। तप्तेनोद
कार्थान् कुर्वीत। तप्तेन जलेन उदकार्थान् उदकसाध्याः शौचाचमनादिकाः क्रियाः कुर्वी
त विदध्यात्। अवज्योत्य रात्रौ भोजनं। अशनं कुर्वीत। सत्यवदनमेव वा। वा यद्वा सत्यवद
नमेव सत्यवाक्योच्चारणमेव कुर्यात्। न अध्यस्तनादि आमांसाशनादीनि।। कीर्त्तिएतोप्या
तपादीनि कुर्यात्। त्र्यवर्ग्यवां श्चोदिति। वेघदिदीक्षितः सोमयागार्थ स्वीकृत दीक्षः। प्रवर्ग्य

आतपेमूत्रपुरीषोत्सर्गष्ठीवनादीनि १

वानप्रवर्ग्यो महावीरः अस्यास्तीति प्रवर्ग्यवान् । तदा आतपादीनि अवश्योत्यरात्रिभोज
नांतानि कुर्यात् । वासस्त्ववदनमेव । अत्र सूत्रकारेण यावन्ति स्नातकव्रतान्युक्तानि नतान
न्येवानुतिष्ठेत् । अपितु मन्वादिस्मृतिप्रणीतान्यपि इति सूत्रार्थः ॥ ॥ अथ प्रयोगः ॥ ॥
वेदमुक्तलक्षणं व्रतं च । उभयं वा समाप्य गुर्वनुज्ञातो ब्रह्मचारी स्नायात् । तत्र आचार्यो मातृ
पूजापूर्वकं आभ्युदयिकं श्राद्धं कृत्वा ब्रह्मचारिणा आचार्य अहं स्नास्ये इत्युनुज्ञादानं प्रार्थि
तः स्नाहीत्यनुज्ञां दत्वा ब्रह्मचारिणा परिश्रिते पंचभूसंस्कारान्कृत्वा लौकिकाग्निं विधाय ब्रह्मो
पवेशनादिआज्यभागांतं कर्म निर्वर्त्य वेदारंभवत् वेदाहुतिहोमं विधाय महाव्याहृत्यादि
स्विष्टकृदंतं वा संस्रवं प्राश्य पूर्णपात्रं वरयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात् । तद्यथा । त
त्राज्यभागांतं कृत्वा यदि ऋग्वेदमधीत्य स्नानं करोति तदा पृथिव्यै स्वाहा अग्नये स्वाहेति द्वे
आहुती हुत्वा ब्रह्मणे दे ? द्वे दोग्धव्यानवाहुती हुत्वा यदि यजुर्वेदं तदा आज्यभागानंत

दे॰ २

स्ना॰ १

स्था

२०६

106

रं अन्तरिक्षाय स्वाहा वायवे स्वाहेति द्वे आज्याहुती हुत्वा ब्रह्मणे छंदोभ्य इत्याघानवाहुती
हुत्वा महाव्याहृत्यादि स्विष्टकृदन्ता दशाहुतीर्हुत्वा दक्षिणां दत्वा समापयेत्॥ यदा सामवेदं
तदाज्यभागान्ते दिवे स्वाहा सूर्याय स्वाहेति हुत्वा ब्रह्मणे छंदोभ्य इत्याघानुमत्यन्तानवाहु
तीर्जुहोति॥ यदाथर्ववेदं तदाज्यभागान्ते दिशः स्वाहा चंद्रमसे स्वाहेति आहुती द्वयं हुत्वा ब्र
ह्मण इत्याघानुहोति॥ यद्येकदा वेदचतुष्टयमधीत्य स्नानं करोति तदाज्यभागान्ते रं
स्थातिवेदं वेदाहुति द्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्याहुति द्वयं च हुत्वा प्रजापतय इत्याघाः
सप्ततंत्रेण जुहुयात् प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये नुमतय इति
एवं वेदद्वयत्रयाध्ययनेपि योज्या॥ अनन्तरं महाव्याहृत्यादि स्विष्टकृदन्ता दशाहुती हुत्वा
प्राशनं विधाय दक्षिणादानान्तं कुर्यात्॥ अथ ब्रह्मचारी उपसंग्रहणपूर्वकं गुरुं नमस्कृ
त्य परिसमूहनादि आयुषकरणान्तं तस्मिन्नग्नौ समिदाधानं कुर्यात्॥ ततआचार्यपुर

षेः परिश्रितस्योत्तरभागे स्थापितानां दक्षिणोत्तरायतानां अष्टानां जलपूर्णकलशानां पू-
र्वभागे आस्तृतेषु प्रागग्रेषु कुशेषु उदङ्मुखः स्थित्वा येप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगो-
ह्यो मयूखो मनोहास्खलो विरुजस्तनूदूषुरिंद्रियहतान्विजहामि यो रोचनस्तमिह गृह्णा-
मीति मंत्रेण प्रथमात्कलशात् दक्षिणचुलुकेन उदकमादाय । तेन मामभिषिंचामि
श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति मंत्रेण एकैकस्माज्जलमादायादाय । येन स्त्रियमकृ-
णुतं येनावमृशतां सुरां । येनाक्षावभ्यषिंचतां यद्वां तदश्विना यश इति । आपो हिष्ठा
मयोभुवः । यो वः शिवतमो रसः । तस्मा अरं गमाम वः । इत्येतैश्च तृभिर्मंत्रैः प्रतिमंत्रमात्मा-
नमभिषिच्य त्रिस्तूष्णीमभिषिंचते । तत उदुत्तममिति मंत्रेण मेखलां शिरोमार्गेण निःसार्य

भि३

तां मेखलां भूमौ निधाय अन्यद्वासः परिधायाचम्य आदित्यमुपतिष्ठेत । उद्यन्भ्राजभृ-
ष्णुरिंद्रो मरुद्भिरित्येतेन मंत्रेण । उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थाद्दिवा यावभिरस्था-

१०७॥

छत

छतसनिरसि सं हं स्वे सन्निमं कुर्वीत दध्नाग मयेत्यादित्योपस्थानमंत्रः॥ ततो दधिवा
तिलान्वा दक्षिणहस्तमध्यगतसोमतीर्थेण आश्य। जटालोमनखानि वापयित्वा स्नात्वा
चम्योत्कलक्षालनोदुंबरकाष्ठेन अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्स मे मुखं प्र
माक्ष्यते यशसा च भगेन चेत्यनेन मंत्रेण दन्तान् क्षालयित्वाचम्य सुगंधिद्रव्यमिश्रितेन
यवादिचूर्णेन तैलसक्तां तेन शरीरमुद्वर्त्य पुनः सशिरस्कं स्नात्वाचम्या चंदनाद्यनु
लेपनं पाणिभ्यां गृहीत्वा मुखं नासिकां च प्राणापानौ मे तर्प्पय चक्षुर्मे तर्प्पय श्रोत्रं मे त
र्प्पयेत्यनेन मंत्रेणालभेत। ततः पाणी प्रक्षाल्य तदुदकमंजलिना दायापसव्यं कृत्वा
दक्षिणामुखो भूत्वा दक्षिणस्यां दिशि पितरः शुंधध्वमित्यनेन मंत्रेण भूमौ निषिंचेत्पितृ
तीर्थेन। अथ यज्ञोपवीती भूत्वोदकमुपस्पृश्य चंदनादिना सुचक्षा अहमक्षीभ्यां भूया
सं सुवर्चो मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति मंत्रेण आत्मानमनुलिप्य। परिधास्येय

श्रोधास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरीची रायस्पोषमभिसंव्यय
ष्य इति मंत्रेण अ॰ अहतं धौतं वा यथा॰ लाभं वासः परिधाय धारये है॰ णे वीवष्टिंसो दण्डं च क
मंडलुं यज्ञोपवीतं च वेदं च शुभे रौक्मे च कुण्डले इति बचैना ब्रह्मचर्यप्राप्तस्य यज्ञोपवी
तधारणस्य स्नातकस्य पुनर्द्विधाना त्वद्वितीय यज्ञोपवीतधारणं प्रा॰ तां तच्च पूर्वं यतेस
ति न संभवति। अतः तदुत्तार्य जले प्रक्षिप्य। परिनवं उत्कलत्वेन मुपवीतं त्रिसरद्वयं य
ज्ञोपवीतमित्यादिना मंत्रेण परिधाय। यज्ञोपवीतस्यैकदेशविनाशे ऽपि यातयामत्वं
अतो न तस्य नवेन संयोगः। एवं देशविनाशेऽपि मंत्रादिसंस्कारस्य विनष्टत्वात्। यशसा मा
द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च माविदद्यशो मा प्रतिपद्यतामिति मंत्रेण
उत्तरीयं वासः आच्छाद्य द्वितीय वस्त्रालाभे पूर्वस्यैवोत्तरभागेण॰ अनेनैवोत्तरीयं विधा
या। या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च

त्ति पुष्पाणि अन्यतः प्रतिगृह्य यशो प्सरसामि इन्द्रश्चकार विपुलं पृथु। तेन संग्रथिताः सु
मनस आबध्नामि यशो मयीति मंत्रेण शिरसि बध्नाति। युवा सुवासा इत्यनयर्चो उष्णीषेण
शिरो वेष्टयित्वा अलंकरणमसि भूयोलंकरणं भूयादिति मंत्रेण दक्षिणकर्णे कुण्डलं कृत्वा
नेनैव वामकर्णे परिधाय। वृत्रस्यासि कनीकश्चक्षुर्दा असि चक्षुर्मे देहीति मंत्रेण दक्षि
णमक्षि सौवीरांजनेनांक्त्वा तेनैव वामं च। रोचिष्णुरसीत्यादर्शमुखं विलोक्य। वृहस्पतेः
छदि रसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मामन्तर्धेहीत्यन्यस्माच्छत्रं प्रतिगृ
ह्य। प्रतिष्ठे स्थो विश्वतो मा पातमित्युपानहौ युगपत्पादयोः प्रतिमुच्य। विश्वाभ्यो मा ना
ष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दंडमादत्ते। अत्र मातृपूजादि ब्राह्मणे दक्षिणादाना
न्तं आचार्यकृत्यम्। कलशाभिषेकादि दंडग्रहणान्तं स्नानकर्तुः। वासश्छत्रोपानद्ग्रह
णव्यतिरिक्तानि दत्त्वा प्रक्षालनादीनि मंत्रवर्जिसदानवर्जिता। वासः प्रभृतीनि तु नूत
नान्येव। तत आचार्यः स्नातकस्य यमानस्यावयेत। त्रिरात्रव्रतानि च। स्नातकस्य तानिय

म्र

लिं दद्यात्। मध्ये त्रीन्॥ ब्रह्मणेऽन्तरिक्षाय सूर्याय मध्ये प्रतिदिशं दत्तानां बलीनाम
न्तराले त्रीन् बलीन् दद्यात्। कथं ब्रह्मणे नमः। अन्तरिक्षाय नमः। सूर्याय नमः। विश्वे
भ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः। तेषां ब्रह्मादीनां त्रयाणां बलीनां उत्तर
तः उत्तरत्रै देशे विश्वेभ्यो देवेभ्यो नमः। विश्वेभ्यो भूतेभ्यो नमः। इति द्वौ बली दद्यात्।
उषसे भूतानां च पतये परम्। परं तयोरुत्तरतः उषसे नमः। भूतानां पतये नमः। भूतानां
च वा इति बलिद्वयं दद्यात्। केचित्तु विश्वेभ्यश्च भूतेभ्यः। भूतानां पतय इत्यत्र चकारं
मंत्रान्तर्गतमाहुः। पितृभ्यः स्वधा नम इति दक्षिणतः। एषामेव ब्रह्मादिबलीनां दक्षि
णतः दक्षिणप्रदेशे पितृकर्मत्वात् प्राचीनावीती दक्षिणामुखः पितृभ्यः स्वधा नम इ
ति मंत्रेणैकं बलिं पात्रे अवशिष्टेनान्नेन दद्यात्। पात्रं निर्णिज्योत्तरापरस्यां दिशि नि
नयेद् यक्ष्मैतत्त इति॥ उद्धरणपात्रं निर्णिज्य प्रक्षाल्य निर्णेजनजलं तेषां ब्रह्मादिब

लीनां उत्तरापरस्यां वायव्यां दिशि निनयेत्। उत्सृजेत्। कथं यक्ष्मैतत्ते निर्णेजनं नम इ
ति मंत्रेण। उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धृततत इति। वैश्वदेवादन्नादुद्धृत्य अव
दायाग्रं ग्रासचतुष्टयपर्याप्तं अन्नं ब्राह्मणाय विप्राय न क्षत्रियवैश्याभ्यां अवनेज्य
अवनेजनं दत्वा हन्तत इत्यनेन मंत्रेण दद्यात्। अत्र पंचमहायज्ञाय इत्युपक्रम्य च
तुर्णां क्रमेणानुष्ठानमुक्तं। पंचमस्य ब्रह्मयज्ञस्य पंचमहायज्ञा इत्यनेनानुष्ठान
स्य तत्त्वेनुपक्रान्तत्वात्। तदनुष्ठानं सावसरं वक्तव्यं नोक्तं न। अतो विचार्यते। ब्रह्म
यज्ञस्य स्मृत्यन्तरे त्रयः कालाः उक्ताः। यथाह कात्यायनः। यश्च श्रुतिजपः प्रोक्तो ब्रह्म
यज्ञस्तु स स्मृतः। स चार्वाक् तर्प्पणात्कार्यः पश्चाद्वा प्रातराहुतेः। वैश्वदेवावसाने वा
नान्यत्र तैन्यनिमित्तकान्। इति स्नानविधावपि उपविश्य दर्भेषु दर्भपाणिः स्वाध्या
यं च यथाशक्त्यादावारभ्य वदेदिति। तेनात्रोपक्रम्यापि ब्रह्मयज्ञविधेः तर्प्पण

स २

त्याकुर्यात्तेनोक्त्वा तत्रास्य व्रतस्याकरणं न दोषः। अत्र यदि क्रियते तदा तेनैव विधिना कर्त्तव्यः

तत्र चैकस्मिन् तदा त्र न कर्त्तव्यः। विकल्पेन हि कालः स्मर्यते। अतो न मुख्यः। किंच न

हं तं न च होमं च स्वाध्यायं पितृतर्पणं। नैकस्मिन् द्वयं कुर्यात्समाने हनि कुत्रचि

त्। इत्यनेन समुच्चयनिषेधात्। तस्मात्प्रातर्होमानन्तरं तर्पणात्पूर्वं वैश्वदेवात्तेवा

सत्कर्मेत्यर्थं कुर्यादिति सिद्धम्। एतावद्व शिष्यते। वैश्वदेवावसाने यदा क्रि

यते तदा को वसरः। चतुर्णामन्तरितिवेत्तानहन्तेकारादेर्न्दयन्तस्य राज्ञावपिस्मर

णात्। नास्यानश्नन्नगृहे वसेत्। इत्यादिना तस्मादनिर्दिष्टकालोपि ब्रह्मयज्ञो

मनुष्ययज्ञात्पूर्वं कर्त्तव्यः। यथा हि भिक्षुकानतिथीश्च संभजेरन्। यथा हि योपद

हितितदनतिक्रम्य। यथा हि भिक्षुकाः। परिव्राजक ब्रह्मचारिणः स्मृता। तत्र उप

कुर्वाणक ब्रह्मचारिणं अन्नाराल वर्णान् इतरेषां च यथोचितं। अतिथीन्नश्च ह्यनो।

१११

तांश्चसंभजेरन्नभिन्नाभोजनादिदानेनतोषयेरन्गृहमेधिनः॥ बालज्येष्ठागृहा
यथार्हमश्नीयुः॥ बालोज्येष्ठः प्रथमोयेषांगृह्याणांतेबालज्येष्ठागृह्याःगृहेभा
र्वःपुत्रादयः॥ यथार्हंयथायोग्यंअश्नीयुःभुंजीरन्॥ पश्चाद्गृहपतिःपत्नीचापश्चाद्गृहे
षु पूर्वंभाशितेषुपश्चाद्गृहपतिःस्वामीपत्नीचभार्याअश्नीयातान्॥ पूर्वोवागृहप
तिः॥ बाअथवागृहपतिःस्वामीपत्न्याःपूर्वोश्नीयात्॥ कुतःतस्मात्स्वादिष्टंगृहप
तिःपूर्वोतिथिभ्योश्नीयादितिश्रुतेः॥ तस्मात्स्वातंत्र्यात्यत्इष्टंतदन्नंगृह
पतिः॥ पत्न्याःपूर्वःअतिथिभ्यआशितेभ्यइतिश्रुतेःवेदवचनात्॥ अहरहःस्वाहा
कुर्यादन्नाभावेकेनचिदाकाष्ठाद्देवेभ्यःपितृभ्योमनुष्येभ्यःहन्तकारं॥ एवंपंचमहा
यज्ञानांअहरहर्नित्यत्वेनकर्तव्यतावगम्यते॥ इतिसूत्रार्थः॥ अथपद्धतिः॥ ततः
पंचमहायज्ञनिमित्तंमातृपूजापूर्वकमाभ्युदयिकंश्राद्धंकृत्वावैश्वदेवार्थपाकं
केनचिद्द्रव्येण को ... न नास्ति ... स्वाहा कुर्यादन्नेनास्ति तदभावेपि नकेनचिद्द्रव्ये
णोदपात्रपर्यन्तेन॥ एवमनुष्येभ्यइदंनुः

विधायसमुद्धृत्याग्नेर्घार्य पश्चादग्नेः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य म
णिकोदकेनाग्निं पर्युक्ष्य हस्तेन द्वादशपर्वपूरकमोदनमादाय ब्रह्मणे स्वाहा। इ
दं ब्रह्मणे। प्रजापतये स्वाहा। इदं प्रजापतये। गृह्याभ्यः स्वाहा। इदं गृह्याभ्यः। कश्य
पाय स्वाहा। इदं कश्यपाय। अनुमतये स्वाहा। इदमनुमतये। इति देवयज्ञः। इति पं
चाहुतिर्हुत्वा मणिके त्रीन्। मणिक समीपे सामीप्यसप्तमी। मणिकसमीपे प्राक्संस्थं वा
हुतशेषेणान्नेन बलित्रयं दद्यात्। तद्यथा पर्जन्याय नमः। इदं पर्जन्याय। अद्भ्यो नमः
इदमद्भ्यः। पृथिव्यै नमः। इदं पृथिव्यै। द्वारशाखयोर्दक्षिणोत्तरयोर्यथाक्रमं धात्रे न
मः। इदं धात्रे। विधात्रे नमः। इदं विधात्रे। प्रतिदिशं वायवे नमः। इदं वायवे। दिशां च
प्राच्यै दिशे नमः दक्षिणायै दिशे नमः। प्रतीच्यै दिशे नमः। उदीच्यै नमः। इदं प्राच्यै।
इदं दक्षिणायै इत्यादि। इति दिग्भ्यश्च बलिं दद्यात्। दत्तानां बलीनामन्तराले ब्र

वी५ च४

११२

णे नमः। इदं ब्रह्मणे। अन्तरिक्षाय नमः। इदमन्तरिक्षाय। सूर्याय नमः। इदं सूर्या
य। ब्रह्मादीनां बलित्रयाणामुत्तरप्रदेशे। विश्वेभ्यो देवेभ्यो नमः। इदं विश्वेभ्यो देवे
भ्यः। विश्वेभ्यो भूतेभ्यो नमः। इदं विश्वेभ्यो भूतेभ्यः। इति द्वौ बली दद्यात्। तयोरुत्तर
तः। उषसे नमः। इदमुषसे। भूतानां च पतये नमः। इदं भूतानां पतये। इति भूतयज्ञः।
बलिद्वयं दद्यात्। ब्रह्मादीनां बलीनां दक्षिणप्रदेशे प्राचीनावीती दक्षिणामुखः। पितृ
भ्यः स्वधा नम इति मंत्रेणैकं बलिं पात्रे अवशिष्टान्नेन दद्यात्। इति पितृयज्ञः। पा
त्रं प्रक्षाल्य निर्णेजनजलं ब्रह्मादिबलीनां वायव्यां दिश्युत्सृजेत्। यक्ष्मैतत्ते नि
र्णेजनं नमः। इदं यक्ष्मणे। ततः काकादिबलीन् बहिर्दद्यात्। ऐंद्रवारुणवायव्याः
सौम्या वै नैर्ऋतास्तथा। वायसाः प्रतिगृह्णन्तु [illegible] भूमौ पिंडं मयार्पितं। इदं वा
यसेभ्यः। श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ। ताभ्यां पिंडं प्रदास्यामि स्याता

वा॰ २ ना ५

मेतावहिंसकोऽदं दंश्वभ्यां देवामनुष्याःपशवोवयांसिसिद्धाश्वयक्षोरगदैत्यसंघाः।
प्रेताःपिशाँस्तरवःसमस्तायेचान्नमिछंतिमयाप्रदत्तंइदं देवादिभ्यः।पिपीलिकाः
कीटपतंगकाद्याःभुंवुंक्षिताःकर्मनिबंद्धबद्धाः।तत्स्यर्थमन्नंहिमयाप्रदत्तंतेषामि
दंतेमुदिताभवंतु।इदंपिपीलिकादिभ्यः।पादौप्रक्षाल्याचम्यअतिथिप्राप्तोपाद
प्रक्षालनपूर्वकंगंधमाल्यादिभिरभ्यर्च्यअन्नंपरिवेष्य हत्तेन्नमिदंमनुष्याय
तिसंकल्प्यकस्मैचिद्ब्राह्मणायदद्यात्।मनुष्ययज्ञसिद्धये।ततोनित्यश्राद्धंकुर्या
त्।तद्यथा।स्वागतवचनेनयद्ब्राह्मणान्द्वौवाएकंवाभ्यर्च्यपादौप्रक्षाल्यआ
चम्यगृहंप्रवेश्यकुशांतर्हितेष्वासनेषूदङ्मुखानुपवेशयेत्।ततःस्वयंमाचम्यप्रा
ङ्मुखउपविश्यश्रीवासुदेवंसंस्मृत्यसावित्रींपठित्वाअद्येहेत्यादिदेशकालौस्मावी
नीवीतीदक्षिणामुखःसव्यंजान्वाच्यअमुकगोत्राणामस्मत्पितृपितामहप्रपिताम

कलिम्प्याकराडः

हां तां तथा मातामह प्रमातामह वृद्धप्रमातामहानां अमुकामुकशर्म्मणां नित्यश्राद्ध
महं करिष्य इति प्रतिज्ञाय नित्यश्राद्धं कुर्यात्॥ अथातोध्यायोपाकर्म्म॥ ॥ अथ पंच
महायज्ञानन्तरं अध्यायस्य अध्ययनस्य उपाकर्म्म। उपाकरणं व्याख्यास्यते। तथा
ग्निमतोऽध्यापन प्रवृत्तस्य भवति। छंदांस्युपाकृत्याधीयीतेति वचनात्। उपाकरण
स्य चावसथ्याग्निसाध्यत्वान्निरग्नेर्नाधिकारः तथा च छंदोगपरिशिष्टे। कात्याय
नः। नस्वेग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्। स्वागर्भसंस्क्रियार्थोश्चपाव
न्नासौ प्रजापत इति। स्वेन आत्मना आहितः आधानसंस्कृतोग्निः स्वः तस्मिन्स्वे।
अग्नौ अन्यस्य संबंधी संस्कारको होमः अन्य होमः न स्यात् न भवेत्। किंपर्युदा
सस्य एकां समिदाहुतिं। समिध आहुतिः समिदाहुतिः तां मुक्त्वा वर्जयित्वा। सा च
समिदाहुतिः उपाकर्म्मणि आचार्यस्याग्नौ शिष्यकर्तृका। तेनावसथ्याग्नावुपाकर्म्म

भवतीतिगम्यते। अतः अध्यापयतोपि निरग्नेः साग्नेरपि अनध्यापयतो नाधिकारः।
यत्तु लोके ब्रह्मचारिणं पुरस्कृत्य उपाकर्म्म प्रवर्त्तते। लौकिकाग्नौ तस्याचारं विर्हय
मूलं न दृश्यते। ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां ओषधीनामप
पामार्गादीनां प्रादुर्भावे उत्पत्तौ सत्यां श्रवणेनयुक्तायां श्रावण्यां पौर्णमास्यां श्रा
वणमासस्य शुक्लपंचदश्यां अत्र ओषधीप्रादुर्भावः। श्रावणश्च पौर्णमास्याप
कविशेषणं। तत्र तयोः प्रायशः संभवात्। एवं सति पौर्णमास्याः प्राधान्यात् तस्मा
द्विशेषणमात्रेपि पौर्णमास्यां भवति। श्रावणस्य पंचमी। हस्तेन वा ओषधिप्रादु
र्भावस्तु सर्वत्रापेक्षितः। श्रावणमासस्य पंचमी हस्तेन युक्ता वा प्राप्य भवति। त
त्रापि प्रायेण हस्तो भवति। अतः श्रावणी पूर्णिमा श्रावणपंचमी वा विशिष्टा अ
विशिष्टा वा उपाकर्मणः कालः। अन्ये तु कालचतुष्टयमाहुः। केयं। श्रवणेन वा श्रा

११४

वण्यां पौर्णमास्यां वा श्रावणस्य पंचमी हस्तेन भवति। ऋषिप्रादुर्भावेस्तु सर्वत्रापे
क्षितः। ऋषिप्रादुर्भावे सति। श्रवणेनेत्यादि। आज्यभागाविष्ट्वाज्याहुती र्जुहो
ति पृथिव्या अग्नय इत्यृग्वेदे। अन्तरिक्षाय वायव इति यजुर्वेदे। दिवे सूर्यायेति सामवे
दे। दिग्भ्यश्चंद्रमस इत्यथर्ववेदे। ब्रह्मणे छंदोभ्यश्चेति सर्वत्र। प्रजापतये देवेभ्य
ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतये च। आज्यभागाविष्ट्वा आज्यभागहो
मानन्तरं आज्याहुतीर्जुहोति। तत्र ऋग्वेदे अधीयमाने पृथिव्यै अग्नय इति द्वे
आहुती जुहोति। यजुर्वेदे अधीयमाने अन्तरिक्षाय वायव इति द्वे। सामवेदे अधी
यमाने दिवे सूर्यायेति द्वे। अथर्ववेदे अधीयमाने दिग्भ्यश्चंद्रमस इति द्वे। ब्रह्म
णे छंदोभ्यश्चेति द्वे आहुती सर्वत्र सर्वेषु वेदेषु अधीयमानेषु। तथा प्रजापतय इत्या
दिकाश्च सप्त च शब्दान् सर्वत्र एवमेकैकशो वेदाध्ययनोपाकरणपद्धो। यदा पुन

श्चतुर्णामपिवेदानां तंत्रेणोपाकरणकर्मतदाब्रह्मणे छंदोभ्यश्चेतिप्रतिवेदाहुतिद्वय मावर्त्तनेप्रजापतयेदेवेभ्य इत्याद्यास्तंत्रेणैव। एतदे वव्रतादेशनविसर्गेषुाइदंउपाकर्मणिविहितं द्रष्टव्यं इत्यादिअनुमतयइत्यंतंहोमकर्मव्रतादेशनं वेदारंभः विसर्गः समावर्त्तनः व्रतादेशनानिचविसर्गश्च तादे शनविसर्गाः तेषु। सदसस्पतिमित्य त्तत्प्रधानाः स्त्रिःसर्वेनुपठेयुर्हुत्वाहुत्वादुंवर्यस्तिस्रस्तस्रः समिधआद धुराद्राःस पलाशाघृताक्ताः सावित्र्यासदसस्पतिमित्यनेनमंत्रेणअव्रता प्रधानाश्चअव्रतक्षानाः ताःआचार्योनुहोतित्रिःत्रिवारं। सर्वेशिष्याः एतंमंत्रंअनुसहपठेयुः। तयाहुत्वाहुत्वाए कैकामाहुतिंदत्वाओदुंवर्यः उदुंवरवृक्षोद्भवाः तिस्रस्तिस्रआर्द्राःसरसाःसपलाशाः पत्रसहिताः घृताक्ताःआज्यलिप्ताःसमिधः सर्वेआचार्यप्रमुखाःशिष्याःआदध्युः अग्नौसावित्र्याप्रसिद्धयाक्षिपेयुः भेदेनयुगपत्। ब्रह्मचारिणस्त्रिः सर्वेकल्पेन।।

= प्राश्नीयुः। शन्नो भवंतु वाजिन इत्यनयर्चा अक्षतधाना अखादन्तः २
अत्र १

२५

तत्र ये ब्रह्मचारिणः शिष्याः ते पूर्वकल्पेन समिदाधानोक्तमंत्रेणाग्नेर्मेणांति स्वस्ति [illegible] स्व
इति [illegible] वीप्सा न समिद्विषणा किंतु आधात्पुरुषविषया तेन प्रत्याहुतिं एकैकामादद्युः। श
न्नो भवन्त्वित्यक्षतधाना अखादन्तः दन्तैरनवखं उयतः प्राश्नीयुः। भक्षयेयुः। दधिक्राव्ण इति
दधिभक्षयेयुः। दधिक्राव्णो अकारिषमित्यृचा दधि। सयावंतं गणमभिष्टेत्तावतस्तिलानाकर्ष
फलकेन जु[illegible] हुया[illegible]। यद्वा शुक्रज्योतिरि[illegible]त्यनुवाकेन जुहुयात्। गुणफलमेतत्। अतो
धानाभ्यः स्विष्टकृते हुत्वा व्याहृत्यादि नवाहुतीर्हुत्वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टे
भ्यः नुकारमुक्त्वा त्रिः एवं सावित्रीमध्यायादीन्प्रब्रूयात् ऋषिमुखानि बह्वृचानां पर्वाणि छं
दोगानां ७ सूक्तान्यथर्वणानां ८ संस्रव प्राशनानन्तरं प्रत्यङ्मुखेभ्य [illegible] आसीनेभ्यः शिष्येभ्यः
सामर्थ्यात्स्वयं प्राङ्मुख उपविष्टः ॐकारं प्रणवं उक्त्वा उच्चार्य तत्सवितुरित्यादिकां च सावि
त्रीं त्रिरुक्त्वा मंत्रब्राह्मणयोः अध्यायानामादीन् [illegible] प्रब्रूयात्। अध्यापयेन्ना। इति यजुर्वेदो

साधि
भुक्रे
तिरि
तुवा
नवा
आचार्य
नतंपा
लसंख्या
शाषा
गलं
२ है मि

छेत्ता तावत्संख्याकान् तिलान् आकर्षफलकेन गौदंबर्येण वा हुत्वा तेन सर्पः इति नासा विद्यास वित्वदेवतया गायत्र्यै
दस्कयाप्रासिद्धया जुहुयात्। इत्युचि

पाकरणे। ऋग्वेदोपाकरणे तु ऋषिमुखानि मंडलादीन् प्रब्रूयात्॥ बह्वृचानां। छंदोगानां सा
मगानां शिष्याणां सामोपाकरणे पर्वाणि पर्वाणि मादीन् प्रब्रूयात्॥ अथर्वणानां शिष्या
णां अथर्ववेदोपाकरणे सूक्तानि सूक्तादीन् प्रब्रूयात्॥ सर्वे जपन्ति सह नोस्तु सह नो वतु
सह न इदं वीर्यवदस्तु ब्रह्म। इंद्रस्तद्वेदयेन यथा न विद्विषाम हे इति। सर्वे आचार्याः
शिष्याश्च सह नोस्त्वित्यस्तु मंत्रं जपंति। त्रिरात्रं नाधीरन्। लोमनखानामनिकृंतनमेवप्रा
गुत्सर्गात्॥ उपाकर्मानन्तरं त्रिरात्रं नाधीयीरन् अध्ययनं न कुर्युः। त्रिरात्रमेव लोमनखा
नामनिकृंतनं प्रागुत्सर्गात् उत्सर्गकर्मतः अर्वाक् इछन्ति। उत्सर्गश्च अर्द्धषष्ठान्मासा
न् अधीत्योत्सृजेयुरित्येवमिति सूत्रार्थः॥ ॥ अथ पद्धतिः॥ ॥ श्रावण्यां पौर्णमास्यां श्र
वणयुक्तायाममयुक्तायां श्रावणस्य शुक्लपंचम्यां हस्तयुक्तायामयुक्तायां वा उपाकर्म अध्या
योपाकर्म भवति। तत्र अध्यापनं कुर्वतः औपासन [illegible] निकस्य प्रथमप्रयोगे विहितम्॥

११६॥

भ४

त्वपूजापूर्वकं आदेश आचार्यः अवसथ्याग्नौ ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषमनुतिष्ठे
त। तंडुलस्थाने अक्षतधाना आसादयेत्। प्रोक्षणकाले प्रोक्षेत्। तयोपकल्पयति। औदुं
बरीः समिधः दधि। आकर्षफलकं। तिलान्नमन्त्रार्थधानाः। ततआज्यभागान्ते वेदाकृत्यादी
नामनुमत्यन्तानां वेदानां वह्निहोमं विदध्यात्। एवं सर्ववेदोपाकरणे प्रतिवेदमाहुति
द्वयं कृत्वा ब्रह्मणेछंदोभ्यइत्याहुतिद्वयं पुनः पुनर्जुहुयात्। प्राजापत्याद्या अनुमत्यन्ताः

भि५

सप्ताहुतीः स्तंत्रेण। अथ सदसस्पतिं स्थनयर्चा आसादितान्निरुप्त धानाभिरेकामाहुतिं
आचार्यो जुहोति॥ इदं सदसस्पतये। शिष्या अपि मंत्रमनुपठन्ति। ततआचार्यः शिष्याश्च

त्री

सर्वे औदुंबरीमार्द्रां सपलाशां घृताक्तां एकैकां तत्सवितुरित्यादिकया सावित्र्या अग्ना
वादध्युः। ब्रह्मचारिण श्च शिष्या अग्निकार्यमंत्रेण तथैव समिधा आदध्युः। एवं द्विपरंध
नाहोमानंतरं एकैकां समिधमादध्युः। ततः आचार्यः शिष्याश्च उपकल्पितधानाभ्य

स्वस्ति स्वस्ति स्वस्त्यों व्रतधानानाअनवखंडयन्तोमन्त्रयेयुः शन्नोभवन्तुवाजिन इत्यन्तयर्चा ततः आ
चमनानन्तरं आचार्यो यावं तं शिष्यगणं कामयेत । तावतस्तिलानां कर्षफलकेनादाय सा
वित्र्या जुहुयात् । इदं सवित्रे । शुक्रज्योतिरि [illegible] त्यनेनानुवाकेन वा तिलान् जुहुयात् ।
तत्रेदं मरुद्भ्य इति त्यागः ॥ ततो हुतशेषधानाभ्यः स्विष्टकृते हुत्वा महाव्याहृत्यादि
प्राजापत्यन्तान्वाहुतीर्हुत्वा संस्रवप्राशनं ब्रह्मणे दक्षिणादानं यथोक्तं कुर्यात् । त
तः प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्य उपविष्ट ओंकारमुक्त्वा त्रिवारं
च सावित्रीमुक्त्वा इषे त्वोर्जे त्वेत्येवं मंत्रस्य अध्यायानामादीन् प्रतीकान् ब्रूयात् ।
तथा व्रतमुपैष्यन् । स वै कपालान्येवान्यतर उपदधातीत्येवं च ब्राह्मणस्य । ऋग्वेदि
नां मंडलादीन् छंदोगानां पर्वादीन् । अथर्वणानां सूक्तादीन् प्रब्रूयात् । ततः सर्वे
आचार्यः शिष्याश्च जपन्ति ॥ सह नोस्तु सह नोवतु सह नद्द वीर्यवदस्तु ब्रह्मा रुद्र

वि१

स्तद्द्वेदयेनयथा नेंद्विषामहरति अमुंमंत्रं तदनन्तरं त्रिरात्रमनध्यायं कुर्युः। लोमनखानांच निकृंतनं नकारयेयुः। त्रिरात्रमेव। प्रागुत्सर्गाद्वा लोमनखनिकृंतनं वर्जयेयुः। अतः मंत्रब्राह्मणयोः पुस्तकेऽप्युपदेशेऽपि निरंतरं मंत्रब्राह्मणं वरना आचार्येणाध्यायमानाः शिष्याः॥ इत्युपाकर्म॥ त्रिरात्रं नाधीयीरन् त्यनध्यायप्रसंगात्। अनध्यायानाह। वातेमावास्यायामिति सद्योनध्यायः॥ वाते वायौ चंडे वाति सति वातमात्रस्य सर्वदा विद्यमानत्वात् नानध्यायनिमित्तता। अमावास्यायां दर्शे च सद्योनध्यायः। सर्वेषु वेदेषु वेदांगेषु च अनध्यायेनध्ययननिवृत्तिः। मतान्तरेयहुरूमुखात् शिष्यते शिल्पं प्रमादितत्राप्यनध्यायः। यतः अधीयते श्रूयते वा शिष्यते वा तत्र सर्वत्रानध्यायः। सद्योनध्यायः गुरोः सकाशात् अनधीताध्ययने अध्यापकधर्मप्रकारान्। न गुणनेऽपि केचित्तु सर्वदेशस्य गुणनादिविषयतां मन्यन्ते।

तन्मतेनाप्रवृत्तोध्ययनं नाभीतस्याभ्यसनमिति। आह्वाशने चोल्कावस्फूर्जद्भूमिचलानामृतुष्वतेष्वृतुसंधिषु चाकालं। न केवलमर्मवास्यां आह्वान्न भोजनस्य अशने भक्षणे च। उल्का ज्वाला कृतिः पतन्ती तारका॥ अवस्फूर्जं तीव्रविद्योतमानाविद्युत्। भूमिः पृथिवी तस्याश्चलनं कंपः भूमिचलनं। आभिः प्रसिद्धः॥ उल्का च अवस्फूर्जं च भूमिचलनं च आभ्य उल्कावस्फूर्जद्भूमिचलनास्त्रयः। तेषां उत्पातः उत्पतनं तस्मिन्। ऋतुसंधिषु च ऋतूनां संधयः। अन्तरालानि ऋतुसंधयः तेषु स एवानध्यायः प्रत्यनुवर्तते॥ किंयावत् आकालं यस्मिन् काले यस्य निमित्तस्य उल्कादर्शनपतनं अपरादिने तावत्कालपर्यन्तं आकालं। केचित्तु आह्वाशने यावत्तन्नं जीर्यति तावदनध्यायमाहुः॥ ऋतुसंधिशब्देन एकस्य ऋतोः अन्तःपरस्य यावदप्रवृत्तिः स काल उच्यते। तत्राकालिकता नोपपद्यते। ततश्च पूर्वस्य ऋतोः अन्त्या रात्रिः उत्तरस्य आद्यमहः तावाननध्यायः। उत्सृष्टेषु मन्त्रदर्शने सर्वेष्वेव त्रिरात्रं।

त्रिसंध्यं वा॥ उत्सृष्टेषु छन्दस्सु वक्ष्यमाणे पुँनाक्षत्रसामुत्सर्गो कृते अनध्यायः। अत्रस्य
अतिशयितस्यमेघस्य दर्शने आविर्भावे विद्यु[illegible]दभ्रवायुवृष्टिगर्जितानां युगपत्
प्रवृत्तिः सर्वद्रूपं तस्मिन्नसर्वे रूपे च त्रिरात्रं त्रीण्यहोरात्राणि वा संध्यात्रयं अनध्याय
इति वकारेणानुगृह्यते। अन्येषां पक्षे अभ्रदर्शने त्रिसं[illegible]ध्यं सर्वे रूपे त्रिरात्रमिति व्य
वस्थितो विकल्पः। भुक्त्वार्द्रपाणिः। उदके निशायां। भुक्त्वाऽशित्वा यावदार्द्र पाणिस्ताव
दनध्याय इत्यनुषंगः। उदके यावत्तिष्ठति तावत्। निशायां। महानिशायां। महानिशा
च विज्ञेया मध्यस्य प्रहरद्वयमिति स्मरणात्। रात्रेः पूर्वोत्तरौ यामौ वेदाभ्यासेन तौ नये
दिति वचनेन रात्रेः पूर्वे च तुर्थयामयोर्वेदाभ्यासविधानात्। द्वितीयतृतीयप्रहरयो
रनध्याय इत्यर्थात् निशा लभ्यते। संधिवेलयोः। अहोरात्रयोः [illegible] संधिवेलयोः [illegible]
संध्याकालयोरित्यर्थः। अन्तःशवे ग्रामे। अन्तर्मध्ये शवः मृतशरीरं यस्य सः तस्मिन् ग्रामे

महा
२

तावदनध्यायः। अन्तर्द्दिवाकीर्त्त्यादिवा अन्तर्दिवाकीर्त्त्ये परतीयं यत्तु अवगर्त्यादितद्दिवाकीर्त्त्यं
। तस्मिन्दिवाकीर्त्ये। विषयेऽन्तर्ग्राममध्येऽनध्यायः। पद्मान्तरे तु अन्तःसन्निहितो दिवाकी
र्त्यश्चांडालः यत्र सदिवाकीर्त्यो देशः तत्रानध्यायः। धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु
च तत्कालं। शीघ्रंगच्छतः अभिशस्तः ब्रह्महत्यादिपापेनाभियुक्तः। पतितः ब्रह्महत्यादिनापा
पेन अभिशस्तश्च पतितश्च अभिशस्तपतितौ तयोर्द्दर्शनं। आश्चर्यमद्भुतं। अभ्युदयः पुत्रजन्म
मि ५ विवाहादि एतेषु धावनादिनिमित्तेषु तत्कालं यावन्निमित्तमनध्यायः। नीहारे वादित्रशब्द
आर्त्तस्वने ग्रामान्ते श्मशाने श्वगर्द्दभोलूकसृगालसामशब्देषु शिष्टाचरिते च तत्कालं। नी
मि हि हारे भूमिकायां। वादित्राणां मृदंगादीनां शब्दे। आर्त्तस्य स्वने शब्दे। ग्रामस्यान्ते सीम्नि श्म
शाने पितृभूमौ श्वा च गर्द्दभश्च उलूकश्च सृगालश्च साम च श्वगर्द्दभोलूकसृगालसामा
नि तेषां शब्दे श्रूयमाणे। शिष्टाचरिते शिष्टस्य श्रोत्रियस्य आचरिते आगमे तत्कालं याव

५३

११९

न्निमित्तं तावत्कालमनध्यायः। गुरौ प्रेते [illegible]ऽपोऽभ्यवेया[illegible]द्दशरात्रं चोपरमेत। गुरौ आचा
र्ये प्रेते मृते अपो जलं अभ्यवेयात् प्रविशेत्। स्नानपूर्वकमुदकदानाय। दशरात्रं दशाहा
नि अध्ययनादुपरमेत। सतानूनप्त्रिणि सब्रह्मचारिणि त्रिरात्रं। तानूनप्त्रं नाम सोम
यागे ऋत्विजां दीक्षितस्य च आज्याभिमर्शनलक्षणं कर्म समानं तानूनप्त्रं येनास्ति सः
सतानूनप्त्री तस्मिन् सतानूनप्त्रिणि प्रेते। समाने तुल्ये ब्रह्मणि वेदे चरति यः सः सब्रह्मचा
री तस्मिन् सहाध्यायिनि समानाचार्ये प्रेते त्रिरात्रमनध्यायः। एकरात्रमसब्रह्मचारिणि। न
सब्रह्मचारी असब्रह्मचारी तस्मिन् असब्रह्मचारिणि। भिन्नाचार्ये सहाध्यायिनि प्रेते एक
रात्रमनध्यायः। अर्द्धषष्ठान्मासानधीत्योत्सृजेयुः॥ अर्द्धो षष्ठो मासो येषां मासानां ते
अर्द्धषष्ठाः तान्मासान् अधीत्य पठित्वा उत्सृजेयुः। पूर्वे श्रावण्यादौ उपाकृतानि छं
दांसि। अर्द्धसप्तमान्वा। अर्द्धः सप्तमो येषां ते अर्द्धसप्तमाः तान् अर्द्धसप्तमान्मासान्वा॥

ध्या५

न्मा१

अधीत्य उत्सृजेयुरिति पूर्वेणैन संबंधः। अत्र छंदसामुत्सर्गोपि देशात् अंगाध्ययनमनुज्ञा
यते। अथेमामुत्सृजंति आचार्येण सह शिष्याः। उभा कवी युवा इतिमामुत्सृजंति। उभा कवी
युवानो धर्म्मः परापतत्। परिसंख्यानि धर्म्माणि विसंख्यानि विसृजामहे इति। त्रिरात्रं स
होष्य विप्रतिष्ठेरन्। त्रिरात्रं सह एकत्र उषित्वा विप्रतिष्ठेरन् विप्रवासं कुर्युः विशेषेण प्रवा
सं कुर्युरिति सूत्रार्थः॥ ॥ पौषस्य रोहिण्यां मध्यमायां वाष्टकायां मध्यमायामनुत्सृजेर
न्। पौषस्य मासस्य रोहिणीनक्षत्रे मध्यमायां पौष्याः कृष्णमष्टकायामष्टम्यां अध्याया
न्स्वाध्यायान् उत्सृजेरन् पूर्वमुपाकृतान्। पुनरुपाकरणं यावन्नाधीयीरन्नित्यर्थः। उ
दकांतं गत्वाद्भिर्देवांश्छंदांसि वेदान्ऋषीन्पुराणाचार्यान्गंधर्वानितराचार्यान्संव
त्सरं च सावयवं पितॄन्नाचार्यान्स्वांश्च तर्प्पयेयुः॥ कथमुत्सृजेरन्नित्युच्यते। उदकांतं नद्या
द्युदकसमीपे गत्वा उदकसमीपगमनात् अत्र स्नानं ल[illegible]क्ष्यते। ननु पदद्वयं श्रावणादि सर्वो

११०॥ नद्यो रजस्वलाः तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥ इति छंदोगपरिशिष्टे नदीस्ना नस्य निषेधात्कथं न द्याद्युच्यते। उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च वचं द्रसूर्योपरा गे च रजो दोषो न विद्यते। इत्यपवाद वचनात्। ततो यथाविधिस्नात्वा माध्याह्निकं कर्म्म देवाग तुविदइत्येतत्प्रा कृनिर्वर्त्त्य सप्तर्षिपूजा वंशानुप वनानन्तरं देवास्तृप्यन्तां छंदांसि तृप्य न्तामित्येवं आचार्यो तानयज्ञोपवीतिना तर्प्पयेयुः। आचार्यसहिताः शिष्याः। ततः प्राचीना वीतिनो दक्षिणामुखाः नामगोत्रोच्चारणपूर्वकं स्वांश्च पितृपितामहप्रपितामहान्तर्प्प येयुः। अनंतरं स्नानवस्त्रं निष्पीड्याचम्य देवागातुविदइत्यनयर्चा समापयेयुः॥ ततः सा वित्रीतत्सवितुरित्यादिकां चतुः कृत्वो ऽनुद्रुत्य पठित्वा विरतास्म इत्याचार्यप्रमुखाः शिष्याः सर्वेनुब्रूयुः॥ क्षपणं प्रवचनं च पूर्ववत्। क्षपणं अनध्ययनं। लोमनखानामनिकृंतनं च। प्रवचनं अध्यायादीनां पठनं पूर्ववत्। ततस्त्रिरात्रानंतरं शुक्लपक्षेषु

छंदांस्यधीरन्नकृष्णपक्षे ष्वंगानि। ततः पुनरर्द्धषष्ठान्मासानर्द्धसप्तमान्वा मासानधी
त्य एवमेवोत्सर्गं विधाय उभौ कवी युवेत्यादिकां ऋचं जपित्वा त्रिरात्रमेकरात्रं वा स्थाय यथ
थेष्टं विप्रतिष्ठेरन् पृथक् गृहेषु। ततः पुनरुपाकरणकाले उपाकृत्य अध्ययनं यावदुत्स
र्गं। ॥ ॥ पुण्याहे लांगलयोजनं। प्रथमं कृषिं वृत्तस्ये तत्कर्मोच्यते। पुण्याहे उदगयन शुक्ल
पक्षादिव्युदासेन चंद्रतारानुकूले दिवसे लांगलस्य हलस्य योजनं प्रवर्तनं। ज्येष्ठया चेंद्र
देवत्या पक्षान्तरमाह। यद्वा पुण्याहे पि ज्येष्ठया नक्षत्रेण लांगलयोजनं कुतः इंद्रदेवत्या
ज्येष्ठा यतः इंद्राय न्नावकाक्षिरिति एतद्ब्रमात्र पूजाभ्युदयिक श्राद्ध पूर्वकं इंद्रपर्जन्यम
श्विनौ मरुत उदलाकाश्यप ६ स्वातिकारी ७ सीतामनुमतिं च दध्ना तंडुलैरक्षतैरिष्टान
डुहोम ध्क घृते प्राशयेत्। तत्र इंद्रादीननुमत्यंतान् देवताविशेषान् दध्ना तंडुलैरक्षतैः
अक्षतायवाः इष्टान्नमीतैर्नाम मंत्रैर्बलिहरणेन संपूज्य अनडुहो वृषभान्मधु घृते

मिलितं प्राशयेत्। तद्यथा। दधितंडुलान्हुत्वान्नपात्रे कृत्वा। शुचिराचांतः प्राङ्मुखउपवि
श्य कृषिक्षेत्रैकदेशे गोमयोपलिप्ते हस्तेन गृहीत्वा इंद्राय नमः। पर्जन्याय नमः। अश्वि
भ्यां नमः मरुद्भ्यो नमः। उदलाकाश्यपाय नमः। स्वातिकार्यै नमः। सीतायै नमः। अनुमत्यै न
मः॥ इत्यष्टौ बलीन्प्राक्संस्थान्दद्यात्। ततो बलीवर्दान्नमक्षद्घृतेपात्रे कृत्वा प्रत्येकं
प्राशयेत्। लेहयेत्। सीरायुंजंतीति योजयेच्छुनं सुफाला इति कृषेत्फालं वालभेत। सी
तौ युंजन्नी त्यन यर्चा वृषभौ हले योजयेद्दक्षिणोत्तरक्रमेण। शुनं सुफाला इत्यनेनर्चा भू
मिं कृषेत्। यद्वा शुनं सुफाला इति फालमभिमृशेत्। तल्लिंगत्वान्मंत्रयोः। सीरा युंजंति
अतं नवा स्नुपदेशात्। नवा एतौ योजने कर्षणे मंत्रौ भवतः। कुतः। अग्नौ अग्निचयने एतयोः
उपदेशात्। नव। अग्निप्रकरणे आम्नातयोरत्रोपदेशः नवातिदेशः वपनानुषंगाद्वा इ
तोपि मंत्रौ भवतः। अग्निप्रकरणे बीजवपने मंत्रायर्नुषधीरि त्याद्या विनियुक्ताः तेषा

तो

मपि अत्रानुषंगः स्यात्। यदि लिंगमात्रेणोपदेशातिदेशाभावेपि विनियुज्यते तदावपनमंत्रा अपि तल्लिंगत्वाद्विनियोजनीया भवेयुः। न चैतदिष्यते। अग्न्यमभिषिच्य कृष्टं तदा कृषेयुः अग्न्यंश्रेष्ठं बलीवर्दं अभिषिच्य गंधमाल्यादिभिर्भूषयित्वा अकृष्टं अविलिखितं तद्दैवत्रं आकृषेयुः विलेखयेयुः। ततो ब्राह्मणभोजनं॥ इति सूत्रार्थः॥ ॥ स्थालीपाकस्य पूर्ववद्देवता यजेद्रुभयो व्रीहियवयोः प्रवपंत्सीतायज्ञे च ततो ब्राह्मणभोजनं॥ स्थालीपाकस्य वरोः पूर्ववल्लांगलयोजनोक्ता देवताः इंद्रादिकाः यजेत् किं कुर्वन् प्रवपन् उप्तिं कुर्वन् कयोः व्रीहियवयोः। व्रीहियवयोर्वपनकाले। अत्र स्थालीपाकस्य श्रवणेपदेशाभावात्तत्सिद्धस्योपादानं इति सूत्रार्थः॥ ॥ अथ प्रयमप्रयोगे मातृपूजाभ्युदयिकानंतरं आवसथ्याग्नौ ब्रह्मोपवेशनादि प्राशनान्ते तंडुलस्थाने पूर्वसिद्धं स्थालीपाकमासाद्य प्रोक्षणकाले प्रोक्षेत्। ततः आज्यभागानंतरं स्थालीपाकेन लांगलयोजनदेवताभ्यो जुहुयात्। तद्यथा। इंद्रा

२२२

यस्वाहा। इदमिंद्राय। तथा पर्जन्याय स्वाहा। इदं पर्जन्याय। अश्विभ्यां स्वाहा। इदमश्वि
भ्यां। मरुद्भ्यः स्वाहा। इदं मरुद्भ्यः। उद्दलाकाश्यपाय स्वाहा। इदमुद्दलाकाश्यपाय
स्वातिकार्यै स्वाहा। इदं स्वातिकार्यै। सीतायै स्वाहा। इदं सीतायै। अनुमत्यै स्वाहा। इदमनुम
त्यै। ततोऽग्नये स्विष्टकृते हुत्वा आज्येनैनवाहुतीश्च। प्राशनं। ब्रह्मणे दक्षिणादानं ब्राह्म
णभोजनानि कुर्यात्। इति व्रीहियववपनकर्म्म॥ सीतायज्ञेवप्तावदेवताः स्थालीपा
केन यजेत् इत्यतिदेशः॥ ॥ अथातः श्रवणाकर्म्म। अथेदानीं आवसथ्यसाध्यकर्म्मणां
प्रकृतत्वात् श्रवणाकर्म्मोच्यते॥ श्रावण्यां पौर्णमास्यां। तच्च श्रावणमासस्य शुक्लपंचद
श्यां कर्त्तव्यं भवति। स्थालीपाकं श्रपयित्वा व्रीहिधानाश्चैककपालं एकस्मिंकपाले श्रप्यत
इत्येककपालस्तं एक कपालं पुरोडाशं [illegible] श्रपयित्वेत्यनुषज्यते। अन्वयात इहोत
पादानं स्यात् अतश्च धानापुरोडाशयोः अप्राप्तौ देशौ तौ। भर्जनकपालयोरपि आसादन

प्रोक्षणीरनवतः ॥ अर्थवतां प्रोक्षणमविशेषेणोपदिश्यते । धानानां भूयसीः पिष्टाज्यभागाविष्ट्वा
ज्याहुतीर्जुहोत्यपश्वेतपदा जहि पूर्वेण बापरेण चासत्तच वारुणीरिमाः प्रजाः सर्वाश्च राजबांध
वैः स्वाहा । न वैश्वेतस्याभ्याचारेहि ददर्शकं चन । श्वेताय वैदर्व्याय नमः १ स्वाहेति । धानानां
मर्जितानां यां भूयसीः वद्धीः पिष्टा सक्तुलमापा यह्याज्यभागौ हुत्वा अपश्वेत पदाजहि त
वेश्वेतस्याभ्याचार इति द्वाभ्यां मंत्राभ्यां प्रतिमंत्रं हैश्चाज्याहुती जुहोति स्थालीपाकस्य जुहोति वि
लवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति । अनंतरं स्थालीपाकस्य चरोश्चतस्र आहु
तीर्जुहोति यथा बिलवे स्वाहेत्येवमादिश्चतुर्भिर्मंत्रैः ॥ धानावंतमिति धानानां धानावंतं करं
भिणमित्येतयर्चा धानानामेकाहुतिं जुहोति ॥ घृताक्तान्सक्तून्सर्पेभ्यो जुहोत्यावयपांडु
पार्थिवानां ८ सर्पाणामधिपतये स्वाहा । श्वेतवायवांतरिक्षाणां ८ सर्पाणामधिपतये स्वाहा ।
अभिभूः सौर्य दिव्यानां ८ सर्पाणामधिपतये स्वाहेति ॥ घृतेन आज्येन अक्ताः अभिघारिताः

१२३॥

तान्त्सक्तून्त्सर्व्वस्य आग्नेय पांडुपार्थिवेत्यादिभिर्मंत्रैः प्रतिमंत्रं तिस्र आहुतीर्जुहोति॥ स
र्व्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति। तत एककपालं पुरोडाशः सर्वहुतं यथा भवति तथा
ध्रुवाय भौमाय स्वाहेत्यनेन मंत्रेण जुहोति। ततः स्थालीपाकधानासक्तुभ्यः॥ स्विष्टकृद्धोमः
प्राशनांते सक्तूनामेकदेशः शूर्प्पे न्युप्यो यं निष्क्रम्य बहिः शालायाः स्थंडिलमुपलिप्योल्का
यां ध्रियमाणायां मांतगमतेत्युक्त्वा वाग्यतः सर्प्पान्तवनेजयत्यागमायेति॥ प्राशनांते संस्र
वप्राशनानंतरं सक्तूनां एकदेशं बलित्रयपर्य्याप्तं शूर्प्पेण शरैषीकावंशान्यतममये उ
द्धापरिमाणे न्युप्य कृत्वा उपरि निष्क्रम्य बहिः शालायाः सकाशान्निर्गत्य बहिः अंगणे
स्थंडिलं भूमिं स्वयं गोमयेनोपलिप्य अत्र सर्प्पान्वनेजयतीत्यस्याः क्रियायाः उपलेपन
क्रियायाश्च एककर्तृकत्वेन पूर्वकालीनस्योप- लेपनस्याल्यवलौत्समानकर्तृकयोः पू
र्वकाले पाणिनीनाल्यप्रत्ययस्मरणात्॥ तेन स्थंडिलस्य भू[illegible]मेनुपलेपनं। उल्कायां ध्रिय

प१

माणायां ज्वलति काष्ठे अन्येन ध्रियमाणे मांतरागमत आवसथ्यस्य मध्ये च अन्तराले मार्ग
छे ततस्तु तस्मा अभिधाय वाग्यतो मौनी सर्व्वान्न आग्नेयस्थेत अभिन्त्वरित्यादिभिः स्विष्टि
भिर्मंत्रैः अवनेनिक्ष्वेत्येतदंतैः प्राक्संस्थान्यवनेजयति। अवनिक्तान् शुचीन् करोति
यथावनिक्तं द्रव्योपघातसंकीर्णस्सर्व्वेभ्यो बलिं हरत्याग्नेयेत्यादि। अधिपत्न एषते ब
लिरिति॥ यथावनिक्तं येषु देशेषु अवनेजनं कृतं यथावनिक्तं अवनिक्तमनतिक्रम्ये
त्यर्थः॥ दर्व्या प्रादेशमात्रा द्व्यंगुष्ठपर्व्वविस्तीर्णा यथापालाशा घन्यतमयज्ञियवृक्षोद्भ
वया उद्धृतं उपहत्योपहत्य गृहीत्वा बलिं आग्नेय इत्यादिभिर्मंत्रैः एषते बलिरित्येतदंतैः
प्रतिमंत्रं सर्व्वेभ्यो हरति ददाति उपघातमिति॥ णमुलन्तस्य यांतः॥ उपपूर्वो हंति ग्रहणा
र्थः॥ अथ स्रुवेणोपहत्यान्यभितिवत्॥ अवनेज्य पूर्ववत् कंकतेः प्रलिखत्यादि प्रलिखस्वे
त्यंतं॥ अवनेज्य अवनेजनं दत्वा कथं पूर्ववत्॥ कंकते द्वैकं कृतीयेः प्रादेशमात्रैः त्रिभिरे
कत्तोदन्तैः समुचितैः आग्नेयेत्यादिभिः स्विष्टिभिर्मंत्रैः प्रलिखस्वेत्यंते येयासंख्यं प्रति बलिं

५५

प्रलिखतिकं ढूपति॥ ओं अननानुलेपन ८ स्वेन श्वां जस्वानुलिंपस्व स्वजोपिन ह्यस्वेति॥ ओं अ
नंक जलं लौकिक दीयतं त्रक कुंदसौवीरं इति प्रसिद्धं या॥ अनुलेपनं सुरभिवंदनादि स्र
तः पुष्पमाला॥ आग्नेयेत्याभिरिभिमंत्रैः ओं जस्व अनुलिंपस्व स्वजोपि न ह्यस्वेत्यंतैः प्र
तिमंत्रं प्रतिबलिहरणे मे कैकं यथाक्रमं ददाति॥ स तु शेष ८ स्थंडिले न्युप्योदपात्रे
णोपनिनीयोपतिष्ठते नमोस्तु सर्प्पेभ्य इति तिसृभिः॥ स तु शेषं यच्छूर्प्पन्यूप्पानीतं ब
लिदानावशिष्टं स्थंडिले बलिदानायोपलिप्तैकदेशे न्युप्य शूर्प्पैर्णैवेनिहित्वोदपा
त्रेणाजलपात्रेणोपनिनीय प्रवाह्य नमोस्तु सर्प्पेभ्य इति तिसृभिर्ऋग्भिः सर्प्पानुपतिष्ठ
ते बल्यभिमुखस्तिष्ठन् प्राङ्मुखस्तिष्ठन्तोति॥ स यावत्कामयेत न सर्प्पा भ्युपेयुरि
ति तावत्संततयोदधारया निवेशानं त्रिः परिषिंचन्परीयादपश्वेतपदाजहीति द्वाभ्यां
सं गृह्णपतिः यावत्र यावतं देशं सर्प्पा नागाः नाभ्युपेयुः न संवरेयुः इति कामयेत इ

छेत्ता तावंतं देशं संततया अविछिन्नया उदग्धारया सलिलधारया निवेशनं गृहं परिषिंच
न्त्रिः परीयात् त्रीन्वारां गृहस्य समंतात् प्रादक्षिण्येन परिक्रम्य गच्छेत्॥ कथं अपश्रुत
पदाजहीति द्वाभ्यां मंत्राभ्यां दर्भीशूर्प्पवृक्षाल्पवृतप्पवय छेति॥ दर्भीशूर्पौ क्त्रां शूर्पं
चवृक्षाल्पवृक्षालयित्वा वृतप्पसकृत्वा पयित्वा सन्निधाना दुल्काधारयवय छेति दद
ति॥ उल्काधा॰राय सन्निधाना देवा द्वार देशो मार्ज्जयंत आपो हि ष्ठेति तिसृभिः॥ द्वार
देशे शालाया द्वारे आपो हि ष्ठेति तिसृभिर्म्मार्ज्जिः॥ व्रत्यय जमानो उल्का धाराः वहु
अ वचनोपदेशात्॥ अनुगुप्तमेतत्ऽ सतु शेषं होमावशिष्टान् सक्तून् अनुगुप्तं सुर
प ३ क्षितं निधास्या पयित्वा ततः स्पात्॥ श्रवणकर्म्मकालात्। अस्तमिते ऽस्तमिते। प्रति
दिनं अग्निं आवसथ्यं परिचर्य सायं होमेन आपधा॥ दर्व्योपघातं सक्तूर्व्वेन्कृत्वा न्सक्तून
सर्प्पेभ्यः बलिं हरति किमवधि। आग्रहायण्याः॥ आग्रहायणीं पौर्णमासीं यावत्॥ अ

१२५॥

175

थवाश्रायहायणीशब्देन कालावधिका आग्रहायणीकर्म्म लक्ष्यते ॥ तत्र हि बलीनामु
त्सर्गस्य वक्ष्यमाणत्वात् ॥ भाष्यकारस्तु तत इति तेभ्यः सक्तुभ्यः दर्व्यापि हस्तेनापि हत्वा
स्तमितेस्तमिते अग्निपरिचरणं कृत्वा बलिं हरेदा आग्रहायण्या वदि[illegible] त्याह स्म ॥ ब
लिहरणं च श्रवणेन तन्नदानप्रत्यवनेजनैः कृतविलेखनांतैः तद्वत् हरंतं नांतरेण
गच्छेयुः ॥ तं गृहपतिं बलीन्हरंतं आवसथ्याग्निं च अंतरेण मध्ये न गच्छेयुः प्राणिनः ॥
ततश्चादयोपि निवार्याः ॥ दर्व्या वमनं प्रक्षाल्य निदधाति स्थापयति प्रत्यहं ॥ द
र्वीमुखप्रक्षालनोपदेशात् शूर्पप्रक्षालनाभावः ॥ धानाः प्राश्नंत्यसंस्कृताः ॥ धानाः
भर्जितान्यवान् ताः प्राश्नंति मन्त्रवर्ज्यंति बहुवचनोपदेशात् ब्राह्मणयजमानौ प्राधाराः ॥ कथं
भूताः अहस्कृताः दंतैरलग्नाः अवर्द्धसंतरस्यर्थः ॥ ० ततो ब्राह्मणभोजनं ॥ इति सूत्रार्थः
॥ॐ॥ अथ प्रयोगः ॥ तत्र श्रावण्यां पूर्णिमायां श्रावणकर्म तस्य प्रथमप्रयोगे मातृपू

जान्मुदयिकं विधाय आवसथ्याग्नौ कर्म कुर्य्यात्॥ यथा ब्रह्मोपवेशनादिप्राशनान्ते अयं विशे
षः॥ चरुस्थाल्यन्तरं मार्जनं कर्परं॥ तत एकं कपालं॥ तथा तंडुलानानंतरं यवान्॥ ततस्तंडुलपिष्टा
न्यासादयेत्॥ प्रोक्षणकाले यथासादितं प्रोक्षेत्॥ उपकल्पयति च॥ दृषदुपले स्रुव्वोल्कोदु
दपात्रं दर्व्वीकं करतत्रयं अंजनं अनुलेपनं स्रजश्चेति॥ ततः पवित्रकरणादिप्रोक्षणीनिधा
नान्ते चरुदेशस्यो त्तरतो मार्जनमधि श्रित्य तदुत्तरतः कपालमुपधाय आज्यं नि
रूप्य चरुपात्रे प्रणीतोदकासेचनपूर्वकं तंडुलप्रक्षेपं कृत्वा प्रणीतोदकेन पिष्टानि संपूय
पुरोडाशं कृत्वा ब्रह्मन्नुद्वास्याम अधिश्रित्य स्वयं चरुमन्येन मार्जनेनैव वा॥ ताम्रपरेण कपा
ले पुरोडाशं अधि श्रित्य पुरोडाशं श्रपयित्वा यावत्कपालं सर्वेषां पर्य्यग्निकरणं
कुर्य्यात्॥ ततस्रुवं संस्कृत्याज्यमुद्वास्य चरुं चोद्वास्याज्यस्योत्तरतः स्थापयित्वा धानानाउद्वा
स्य चरोरुत्तरतो निधाय पुरोडाशमुद्वास्य धानानामुत्तरतः स्थापयेत्॥ ततआज्योत्पव

नावेक्ष्णतो प्रोक्षणप्युत्पवना [illegible] निकृत्वाधाना नां मूयसी धीनादूष दुपलाभ्यांपिष्ट्वा अल्पा
पृथक्स्थापयित्वा द्वितेन [illegible] तून अक्त्वा उपयमन कुशादाना घोज्यभागान्तं कर्म कुर्या
त्तं तत आज्येन अपश्चेतपदाजहि पूर्द्धेण चापरेण वा सप्त चवारत्नीरिमाः प्रजाः सर्वाः श्व
राजबांधवैः। स्वाहेति इदं श्वेतपदे इति त्यागं विधाय। नवे श्वेतस्याद्याचारेहि इदं दर्शकं च
नाश्वेताय वैदर्व्याय [illegible] नमः स्वाहेति मंत्रेण द्वितीयामाहुतिं हुत्वा। इ
दं श्वेताय वैदर्व्यायेति त्यक्त्वा। स्थालीपाकेन चतस्र आहुतीर्जुहोति। तद्यथा। विष्णवे स्वा
हा। इदं विष्णवे। श्रवणाय स्वाहा। इदं श्रवणाय। श्रावण्यै पौर्णमास्यै स्वाहा। इदं श्रावण्यै
पौर्णमास्यै॥ वर्षाभ्यः स्वाहा। इदं वर्षाभ्यः इति। अथ धानवंतं करंभिणं त्स्वाधाना नामेका
हुत्वा इदमिन्द्रायेति त्यक्त्वा सक्तूनामाहुतित्रयं जुहुयात्। तद्यथा। आग्नेय पांडु पार्थिवानां स
र्पाणामधिपतये स्वाहा। इदं शेषयुक्तः स्वाहाकार रहितो यं मंत्र एव त्यागः त्रिषु॥ श्वेत

वायवांतरिक्षाणां सर्पाणामधिपतयेस्वाहा। अग्निर्भूः सौर्यादिव्यानां सर्पाणामधिपतये
स्वाहा। ततोग्र्वायव्यैमायेतिसर्व्वंपुरोडाशंस्कवेकृत्वाजुहुयात्। इदंस्रुवायव्यैमायेति
त्यक्त्वावरुधानसकुम्भः उत्तरः किंचित्किंचिदादायस्विष्टकृतंविधायमहाव्याहृत्यादिहो
मंसंस्रवप्राशनंब्रह्मणेदक्षिणादानांतंकुर्यात्। अथहुतशेषसक्तूनामेकदेशंशूर्पे
प्रक्षिप्यादायउदपात्रदर्वीकंकतत्रयांजनानुलेपनस्रजश्च। शालायाबाह्निर्निष्क्रम्यब्रह्म
णाउल्काधारणसहस्वांगणहस्तमात्रंस्थंडिलमुपलिप्यलौकिकाग्निमुल्कायांधृयमाणयां
मांतरागमतेतिशेषमुच्चार्य वाग्यतःस्थंडिलेउदपात्रमादयाग्नेयेत्यादिनाअधिपते
वनेनिर्ह्वेत्यंतेनएकत्रावनेजनार्थंजलंदत्वाश्वेतवायवेत्यादिना। अधिपतेवनेनिह्वे
त्यंतेनद्वितीयं। अग्निर्भूःसौर्येत्यादिनातथैवतृतीयं। सर्पानवनेजयति। ततोवनेज
नस्थानेषुश्चवनेज्यनक्रमेणएतैरेवमंत्रैरेवरेषतेबलिरित्यंतैःप्रतिमंत्रंबलिंहरति॥

१२७॥

ततः पूर्ववदवनेज्यकं कतत्रयेण प्रलिखस्वेत्यंतैः एतैरेव मंत्रैः प्रतिबलिं प्रतिमंत्रं प्रलिख
ति। ततो ज्ञस्वेत्यंतैरुक्तमंत्रैः प्रतिबलिं प्रतिमंत्रं अंजनं ददाति तथैवानुलिंपस्वेत्यनुलेप
नं। एवमेव स्रजोपिनह्यस्वेति पुष्पमालां दत्वा सकुशे बंस्थंडिले निहित्वा उदपात्रजले
न प्रक्षाल्य नमोस्तु सर्वेभ्य इत्यादिभिस्तिसृभिर्ऋग्भिः सर्पाननुपतिष्ठते तिष्ठन्। ततः
सग्रहपतिः ए … तावंतं देशं सर्पा तांप्रवेशयुरिति यावत्कामभ्येता। तावंतं देशं संत
तोदकधारया त्रिः परिषिंचन् गृहं परिपरीयात्। अपश्वेतपदा जहीति पूर्वोक्तमंत्रा
भ्यासकृत्तद्दिक्षु स्वाहा। ततो दर्वीं शूर्पं च प्रक्षाल्योल्कायां सकृत्प्रतप्योल्काधारायप्रय
च्छति। अथ शालाद्वारे आपो हिष्ठेति त्र्यृचेन ब्रह्मयजमानोल्काधाराः मार्जयंते स्वयं।
ततो धानाः प्राश्नंति ब्रह्मयजमानोल्काधारा अनवदं उपतः। ततो ब्राह्मणभोजनमेता
वद्भूतं कर्म॥ ॐ॥ अथ प्रत्यवरोहबलिहरणप्रयोगः॥ सकुशे बं सुगुप्ते भांडे स्थापयि

त्वाततोस्तमितेस्तमितेसूर्ये कृतसायंहोमःसूर्पंसक्तुदर्वींकंकतत्रयंनिधायोदपात्रं
गृहीत्वासोल्काधाराःशालायाबहिरूलेपनादिपरिलेखनांतंबलिहरणंअनुदिनंपू
र्ववत्कुर्यात्॥ आग्रहायण्यांयावत्।मांतरागमतेति [illegible]येषामावोपिकश्चिदंतरानगच्छे
त्।दर्वीसुखमेवप्रक्षालयेत्॥ इतिप्रौष्ठप[illegible]घामिंद्रय[illegible]ः॥ प्रौष्ठपदीभाद्रपदी
प्रकरणत्वपौर्णमासीतस्यांइंद्रयज्ञनामधेयंकर्मभवति।श्रौपासनाग्नौ॥ पायसमैंद्र
ं श्रपयित्वापूपांश्चापायसंपयसासिद्धंचरुं।ऐंद्रंरौद्रंदैवत्यंश्रपयित्वायथाविधिव
क्त्वा।अपूपांश्चश्रपयित्वा।तांश्चचतुरःप्र[illegible]दुतिदिशंस्तरणार्थेहितेन।ऐंद्रमित्यनेन
देवतातद्धितेन।इंद्रायस्वाहेतिहोमलक्षणउपरिहोमस्यमंत्रांतरस्यवा।अनुक्तत्वात्।
अत्रपायसश्रपणार्थंपयश्चप्रणीयते।अपूपैस्तीर्त्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोतिइंद्राये
द्राण्याअजायैकपदेअहिर्बुध्न्यायप्रौष्ठपदाभ्यश्चेतिअपूपैःप्रतिदिशमग्निंस्तीर्त्वापरिस्तीर्य।

ॐ३

आज्यभागौ हुत्वा इंद्रायेत्यादिभिः स्वाहांतैः पंचभिर्मंत्रैः प्रतिमंत्रं चाज्याहुतीर्जुहोति। अत्रा
नुक्तोपि पायसेन इंद्राय स्वाहेत्येकाहुतिहोमः। अन्यथा पायसस्य अपणम् अदृष्टार्थं स्यात्।
प्राशनांते मरुद्भ्यो बलिं हरत्यहुतादो मरुत इति श्रुतेः। ततः स्विष्टकृदादि प्राशनांते मरु
द्भ्यः एकोनपंचाशत्संख्येभ्यो देवताभ्यो बलिं ददाति न तु मरुतां देवतात्वेसति कथं हो
मसंबंधरहितं बलिदानं हि त्वं च शृणु। अहुतादो मरुत इति श्रुतेः। अहुतमदंतीत्यहुतादो
मरुतो देवाः इति श्रुतेः वेदवचनात्। आश्वत्थेषु पलाशेषु मरुतो श्वत्थे तस्थुरिति वच
नात्। मरुद्भ्यो बलिं हरतीत्युक्तं। तस्याधिकरणमुच्यते। अश्वत्थस्य इमानि आश्वत्थानि
पु३ तेषु पिप्पलोद्भवेषु [illegible] पत्रैं बलिं हरतीति शेषः। ननु बलिहरणभूमौ अन्यत्र दृश्यते। इ
ह कस्मादश्वत्थपत्रेष्विति शंकिते आह। मरुतः शुक्रज्योतिप्रभृतयो यस्मात् अश्वत्थे तस्थुः
स्थितवंतः इति वचनात्। श्रुतेः शुक्रज्योतिरिति प्रतिमंत्रं विमुखेन च मनसा नामान्यपब्रा

नामानि ४

मेतानीति श्रुतेः मंत्रापेक्षायामाह । शुक्रज्योतिरित्यादिभिर्मंत्रैर्नमस्कारांतैः प्रतिमंत्रं वि
मुखेन वा । उग्रश्च भीमश्चेत्येवमादिनाध्योत्रप्रसिद्धेन मनसा मनो व्यापारेण वलिं
हरतीति शेषः । कुतः एभिर्मंत्रैर्बलिहरणं । एषां मरुतां एतानि शुक्रज्योतिश्च चित्रज्योतिश्चे
त्येवमादीनि विह्निपदस्थैं तानि इति श्रुतेः वेदवचनात् । ईदृं दृं देवोरिति जपति वलिहरणं
ते ईदृं दृं देवी रित्येतामृचं जपति ततो ब्राह्मणभोजनमिति सूत्रार्थः ॥ ॥ अथ प्रयोगः ॥
भाद्रपदपौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं विधाय आवसथ्याग्नौ कर्म
कुर्यात् ॥ तत्र ब्रह्मोपवेशनांते विशेषः । सक्षीरं प्रणयनं तामूलदेशे पयः इतरत्र जलं प्र
क्षिप्य प्रणयेता । उपकल्पनीयानि तंडुलपिष्टं सर्पिश्च शूर्पपाणीनि । तत्र आज्यनिर्वापानंत
रं प्रणीताभ्यः क्षीरमुष्टिं च चरुपात्रे तंडुलान्प्रक्षिप्य प्रणीतोदकेन पिष्टं संपूय च तुरो
शूर्पान्निर्माय आज्यमधिश्रित्य तदुत्तरतश्चरुं तदुत्तरतः कष्वं रेव तुरो शूर्पानधिश्रयति ।

ततउपयमनकुशादानात्पूर्वंअपूपैः अग्नेः पुरस्तात् दक्षिणतः पश्चिमतंउत्तरतश्च
एकैकेनपरिस्तरणंकृत्वाज्यभागान्तेपंचाज्याहुतीर्जुहोति।इंद्रायस्वाहा।इदमिंद्राय।
इंद्राण्यैस्वाहा।इदमिंद्राण्यै।अजायैकपदेस्वाहा।इदमजायैकपदे।अहयेबुध्न्यायस्वाहा।
इदमहयेबुध्न्याय।प्रोष्ठपदाभ्यःस्वाहा।इदंप्रोष्ठपदाभ्यः।ततःपायसेनइंद्रायस्वाहेत्येका
माहुतिंहुत्वा इदमिंद्रायेतित्यक्त्वापायसेनैवस्विष्टकृद्धोमंविधायमहाव्याहृत्यादिहो
मसंस्रवप्राशनदक्षिणादानानिकुर्यात्।।अथप्राक्संस्थानिप्रागग्राणिसप्ताश्वत्थप
त्राणिनिधायमरुद्भ्योबलींहरतिपायसशेषेणस्रुवेणदायशुक्रज्योतिरित्येवमादिभिः
षड्भिर्मंत्रैर्नमस्कारांतैः उ ग्रश्चभीमश्चेत्येतेनसप्तमेनवामनसोच्चारितेनचप्रति
मंत्रंसप्तसुपत्रेषुयथाक्रमंस्पष्टार्थंप्रयोगउच्यते।।यथाशुक्रज्योतिश्चेत्यारभ्यक्रमेतपा
श्चात्य ८ हा नमः।इदंशुक्रज्योतिषेचित्रज्योतिषेसत्यज्योतिषेज्योतिष्मतेशुक्रायऋतपसे ८

हसेचाईं ह्र्हन्य ह्रैं स्यादिसमरानमः। इंदमीह्रशेन्याह्रशेसह्रशेप्रतिसह्रशेभिताय
सम्मिता यस मरसेव। अतश्चेत्यादिविधारयो नमः॥ इंदमतायसत्याय ध्रुवायधरुण
यध्वर्तेविधर्त्रेविधारयायव। अतर्जितेत्यारभ्यगणो नमः। इंदमतजितेसत्यजितेसनजि
तेसुखेणायअंतिमित्रायदूरेअमित्रायगणायच। ईंह्नायइत्यारभ्यचतेअस्मिन्नमः। इं
दमीह्रह्नेभ्यएताह्र्हेभ्यः सह्रहेभ्यः प्रतिसह्रह्नेभ्यो मितेभ्यः संमितेभ्यः समरोभ्योम
रुद्भ्यश्चास्वनवांश्चेत्यादि उर्जेबीनमः। इंदंस्वतवसेप्रघासिनेसांतपनायगृहमेधि
नेक्रीडिनेशाकिनेउज्जेषिणेच। उग्रश्चेत्यारभ्यविक्षिपः स्वाहानमः मनसाइंदमुग्रा
यभीमायध्वांतयसासह्रतेभियुग्वनेविक्षिपायचमनसातत इंद्रं देवीरि। सेताम्रचंत
वतिततोब्राह्मणभोजनमिति॥ ॥ आश्वयुज्यांप्रबातकाः प्रबातकाइति संज्ञा कर्मी
नवति। आश्वयुज्यांपूर्णिमायां नवति। पायसमेंद्र ॥ अपायित्वादधिमधुघृतमिश्रं
ध्रुंताधु

१३०॥

जुहोति। सूत्रं। तत्र इंद्रदेवत्यं पायसं चरुं संसाध्य दधिमधुघृतमिश्रं कृत्वा आवसथ्याग्नौ
जुहोति। केन्य इत्याह। इंद्राग्नेंद्राएवाअग्निभ्यामाश्वयुज्यै पौर्णमास्यै शरदे वेति। इंद्रादे
त्यादिभिः पंचभिर्मंत्रैः स्वाहाकारांतैः प्रतिमंत्रं पंचाहुतीर्जुहोति। प्राशनांते दधिपृषा
तकमंजलिना जुहोत्यूनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहेति। ततः स्विष्टकृत्प्रभृति
प्राशनांते दधिपृषातकपृषदाज्यमंजलिना जुहोत्यूनं मे पूर्यतामित्यादिमंत्रेण जु
होति। पृषदाज्यं घृते दधिप्रक्षेपाद्भवति। दधिमधुघृतमिश्रममात्याश्चवेद्वं तत आया
लिंङ्ग इत्यनुवाकेन। दधिमधुघृतमिश्रं हुतशेषं पायसं अमात्याश्च माचरंति। तत्र भवा
अमात्याय जमानस्य गृह्याः भ्रातृपुत्रादयः। अवेद्वंते आयालिंङ्गोवसउपनइत्या र
भ्यपूर्यं पातस्वस्तिभिः सदानइत्यंते न पश्यंति। मात्यभिर्हुत्वा सा ८ स्व ता ८ रात्रिं। तां
आश्वयुजीसंबंधिनीं रात्रिं वत्सान्न तर्णकान्मातृभिर्जननीभिर्वैनुभिः स ८ स्व पृष्ठ

संसर्ष्टं कृत्वा तां रात्रिमिति कालावधेर्नोरत्नंत संयोगे इत्यनेन उपपदविभक्तिर्द्वितीया तेन संध्यायां वत्सान् संसृजत्यसकलां रात्रिं न बध्नीयात् आग्रहायणी यानकेव लं तामेव रात्रिं वत्ससंसर्गः आग्रहायण्यां वरात्रिं तत ब्राह्मणभोजनमिति सूत्रा

र्थः ॥ ७ ॥ अथ प्रयोगः ॥ ८ ॥ तत्र आश्वयुज्यां पौर्णमास्यां पृषातकाख्यं कर्म्म भवति

प्रथम प्रयोगे मातृपूजाभ्युदयिकपूर्वकं आवसथ्याग्नौ ब्रह्मोपवेशनादिदर्शान्तं

तो विशेषः सद्वीराः प्रणीताः प्रणयेत् दधिमधुनो उपकल्पयेत् प्रणीतावद्वीरेण

यसंश्रपयेत् उपयमनकुशादानादर्वीं कृपायसे दधिमधुघृतानि आवपेत् आज्य

भागानंतरं दधिमधुघृतमिश्रेण पायसेन इन्द्राय स्वाहा इदमिंद्राय इंद्राण्यै स्वाहा

इदमिंद्राण्यै अश्विभ्यां स्वाहा इदमश्विभ्यां आश्वयुज्यै पौर्णमास्यै स्वाहा इदमा

श्वयुज्यै पौर्णमास्यै शरदे स्वाहा इदं शरदे एवं वंचाहुतीर्हुत्वा ततएव पायसान्ना॥

१३१

स्विष्टकृत्ते हुत्वा महाव्याहृत्यादि दक्षिणा दानांतेततं स्या ० त्वं अग्ने दधिआसिच्य

एषदाज्यं कृत्वा अंजलिना दाय ॐनमेपूर्यं तां पूर्णं मेमा व्यगा त्स्वाहेति मंत्रेण जु

होति। इदमग्नेय। ॐनम्मे पूर्यताभित्यस्य होमस्य का देवतेति संदेहः। देवता ताव

न्नेद्धितचतुर्थीमंत्रश्रूयते न तद्धितश्चतुर्थीमंत्रलिंगं वा कयप्रकरणेः प्रतीयते।

अत्र तु दधिपृष्ठातकमंजलिना तु होतीति होमविधिवाक्ये एषातकं इन्द्रमात्र

श्रूयते न तद्धितश्चतुर्थी वा। मंत्रेपि न देवता प्रकाशकं लिंगमस्ति न च वाक्योत

तः प्रकरणमेवशिष्यते। तत्र वैं इन्द्रं पायसमैंद्रं ० श्रपयित्वेति तद्धितात्। अस्य

यज्ञस्येंद्रो देवतेति तर्हि किं प्राकरणिकत्वात्। अस्य होमस्य इंद्रो देवता। ततआ

ज्यं द्रव्यं मना देशो जुहोतिषु विधीयते मंत्रस्य देवता याश्च प्रजापतिरिति स्विति

रिति छंदोगपरिशिष्टपरिभाषया प्रजापतिः तत्र वो करणयोः वाक्यस्य वली

राम

१३१

ग

का

यत्वात्तत्प्रकरबाधः तेनेह प्रजापति देव तासु देव दीक्षितासु पद्धतावत्रयइतिलिखं
तिस्मृतत्कुतइतिनताय तेततो दधिमधुघृतमिश्रहुतशेषं पायसंश्रमात्याः पुत्रा
दयः आयान्तिंद्ध इत्यनुवाकेनसूर्यं पात स्वस्तिभिः सदानइत्येतेनच अवे दंतेततो
ब्राह्मणभोजनं कृतेतत्कर्माङ्गतया ब्राह्मणमेकं भोजयेत् ॥ ८ ॥ अथसीतायज्ञः ॥ अ
थेदानींसीतायज्ञः कर्मव्याख्यास्यते तत्र कृषिप्रवृत्तौ पासनिकोऽग्निक्रियते ।
व्रीहियवानांयत्रयत्रयज्ञेततन्मध्ये स्थालीपाकः श्र पयेत् [illegible] तत्रसी
तायज्ञो व्रीहयश्चयवाश्च व्रीहियवास्तन्मध्ये यत्र यज्ञो व्रीहिकाले यवकाले वाय
ज्ञेतसीतायज्ञेनातन्त्रतन्मयं व्रीहि मयं कालेयव मयं यवकाले स्थालीपाके श्र
पयेत् कामादीनान्यो न्यत्रापि व्रीहियवयोरेवान्यतरत् स्थालीपाकः श्रपयेत् का
मान्तरइच्छातः अन्यत्रापिपक्वादिप्रभृतिषु ईज्ञानो यागं कुर्वन् व्रीहियवयोरवश्य

१३४॥

न्यतरं प्रकृति तरं स्थालीपाकं अपयेत्। न पूर्वचोदितत्वात्संदेहः। अत्र व्रीहियवयो
रन्यतरस्य यागमात्रसाधनद्रव्यत्वेन संदेहः। कुतः पूर्वचोदितत्वात्पूर्वोपदिष्ट
त्वात् कुत्रैँ चेत्। व्रीहीन्यवान्वा हविषि इत्यत्र कल्पे॥ अतो न संदेहः। असंभवाद्वि
निवृत्तिः। तनुपावस्यवरोर्विनिवृत्तिर्दृश्यते कथमन्यतरं स्थालीपाकं अपवदेदि
ति चेत्। उच्यते याविनिवृत्तिः। यावस्यवरोः सा असंभवात्। न शास्त्रात्। अतोन्यायो
असंभवविनिवृत्तस्य यावस्यवरोः प्रतिप्रसवः। सामान्यशास्त्रविहितं बाधकशास्त्रे
ण प्रतिषिद्धं। पुनर्विधीयमानं हि प्रतिप्रसू तमुच्यते। इदं त्वसंभवात्प्रतिषिद्धं
मसंभव इति चेत्। अनवस्थावित्तां तरोष्मपद्ये ईषदसिद्धं तंडुलपाके चरुशब्दप्र
योगप्रत्ययात्। अतो वाचनिको यावस्थालीपाको यत्र तत्राङ्गुलिकाभिः संपाद्यत
त्र पुनर्विकल्पः पुरस्तात्सूर्यस्यां दिशि उत्तरतो वा उदीच्यां वा। शुचौ अमेध्य द्वयो

राम
१३

रहितदेशे कृष्टे काले न विलेखेत [illegible] फलस्य [illegible] सस्य अनुपरोधः अबा-
धः फलानुपरोधश्चेन फलानुपरोधेन सीतायज्ञः कर्त्तव्यः। ग्रामे वोभयसंप्रयोगा-
त्। यद्वा ग्रामे कर्त्तव्यः। कुतः, उभयसंप्रयोगात्। उभयं हि तत्र ग्रामे अस्य संप्रयो अधिक-
रणतया संबद्धुं शक्यते। फलानुपरोधेन कृष्टत्वेन वा पुरस्ताद् उत्तरतो वा शुचौ दे-
शे कृ[illegible]ष्टे इति ग्रामस्यापि विशेषणत्वेन संबध्यते। अविरोधात्। ननु द्वेत्र ग्राम-
योः एकतरोपादाने अन्यतरस्य बाधः प्रसज्यते। ततो विरोधादिति चेत्। न वि-
रोधः। अविरोधस्तस्माद् अविरोधाद्विकल्पादेकतरोपादानं न दोषः। व्यवस्था सं-
भवे हि अष्टदोषदुष्टोऽपि विकल्पः आश्रीयते न्यायविद्भिः। यत्र अपायिष्णु उप-
लिप्त उद्धता वा ह्विते ग्निमुपसमाधाय त[illegible]ष्मिन्दे हृद्येत्तीर्ल्वीऽस्य भागा विष्णु-
र्या कृतीर्जुहोति। यत्र द्वेत्र ग्रामे वा [illegible] वरं अपायिष्णुर्भवति अपायितुमिच्छेन्न
भवति। तत्र उपलिप्ते गोमयादके न उ[illegible]द्धृते स्थिते वा ह्विते अवोह्विते मा।

१३३॥

कोदन [illegible] ो।सिक्ते अग्निमावसथ्यं स्थापयित्वा। अत्र पुनरुपनाय्योपदेशः। क्व
ऽपि प्राप्त्यर्थः नपुनः परिसमूहनोद्धरणनिवृत्त्यर्थः। तन्मिश्रेदर्भैस्तीर्त्वा
तैः व्रीहिमिश्रैर्यवैर्वा मिश्रा मिलिता दर्भाः तैस्तन्मिश्रे दर्भैः अग्निं स्तीर्त्वा परिस्ती
र्य आज्यभागान्तं तरं वक्ष्यमाणमंत्रैः पृथिवी द्यौरित्यादिभिः पंचाज्याहुती
र्जुहोति स्थालीपाकस्य जुहोति सीतायै यज्ञायै समायै भूत्यै इति मंत्रवत्प्रदा
नमेकेषां स्थालीपाकस्य इत्यवयवलक्षणा षष्ठी तस्य सीताद्याभ्यश्च तस्यान्यो
देवताभ्यश्च तस्य आहुतीः। तन्नामभिरेव चतुर्थ्यन्तैः स्वाहाकारान्तैश्च जुहोति
एकेषामाचार्याणां पक्षे मंत्रैर्देवप्रदानं होमः। न स्वाहाकारः। किं कारणं स्वाहाका
रं प्रदानं इति श्रुतेः। स्वाहाकारेण प्रदानं येषु ते स्वाहाकाराः प्रदानाः जुहो
तय इति श्रुतेः श्रुतौ श्रौतकर्मणि स्वाहाकारप्रदानत्वात् इदं तु स्मार्तं कर्म। व

व

वा + वषट्कारस्य प्रवृत्तिः। किमिति याज्यापुरोनुवाक्ययोर्वे २

षट्कारेण वै स्वाहाकारेण वा देवेभ्योन्नं प्रदीयत इति। सामान्यवचनाद्वचनाल्लि
गाद्वयपि प्रवर्त्ततां इति चेत्। न चात्र वषट्कारस्य श्रवणात्। तेन स ह प्रदत्त्। स्वा
हाकारोप्यत्र निवर्त्तते। विनिवृत्तिः मंत्रवत्प्रदानमित्येतस्य पदस्य विनिवृत्तिः
निरासः। अप्रवृत्तिः स्मार्त्तेपि कर्मणि स्मृतिकारैः स्वाहाकारस्य विधानात्। य
था छं दोगपरिशिष्टे कात्यायनेः। स्वाहाकारवषट्कारनमस्कारा दिवौकसां।
हंतकारं मनुष्याणां स्वधाकारं स्वधाभुजां॥ सीताय ज्ञेनेत्यनेन सूत्रेणेति दि
ष्टाभ्यो लांगलयोजनदेवताभ्यः। तद्भूतोपात्तस्थालीपाके नास्मिन्नवसरे जुहुया
त्। कुतः। ततः स्थालीपाकहोमाधिकारात्। ततः स्विष्टकृदादि स्तरणशेषं कु
र्वंसीतागोप्तृभ्यो बलिं हरति। तत्र पुरस्ताद्य इत्यादिभिश्चतुर्भिर्मंत्रैः स्तर
णशेषभावं उपसर्जनत्वं गताः प्राप्ताः कूर्चाः तरणशेषभावकूर्चाः तेषु बलिं

प्तृ२ प३

हरतिकेभ्यः सीतागोप्तृभ्यः सीता लांगलपद्धतिः। गोपायंति पालयंति ये ते सीतागोप्तार
स्तेभ्यः सीतागोप्तृभ्यः आद्यादिषु च तत्स बुद्धिं तु यथालिंगं प्रकृताद्न्यस्माद्दाज्यशे
षाण चपूर्ववद्बलिकर्म। प्रकृतास्त्रधानदेवतावंधिनः। ब्रैहाघावाँद्वास्थालीपाकात्
अन्यायः सिद्धोपात्तश्च स्तस्मात्स्थालीनाज्यशेषेपूर्ववत्लांगलयोजनवत्। बलि
कर्म। इंद्रपर्जन्यादिभ्यो बलिहरणं कर्तव्यं स्त्रिय ओपयजेरन्नाचारं तत्वात्। स्त्रि
यश्च भार्यादिकाः उपयजेरन्न बलिकर्मणा ताभ्य एव देवताभ्यः पूजां कुर्युः कुत एत
त् आचारं तत्वात्। प्राचीनामिष्टोभिः बलिकर्मणः कृतत्वात्। सं०। स्थिते कर्मणि
ब्राह्मणभोजयेत्। आशयेद्ब्रह्मभोज्यादिभिः। द्विरुक्तिरत्रकांडसमाप्तिनिबंधना
इति सूत्रार्थः॥ ॥ ॥ अथ प्रयोगः॥४॥ ॥ अथ सीतायज्ञः कृषिं कुर्वतः सान्नेः ब्रीहि
निष्पत्तिकाले यव निष्पत्तिकाले भवति। तत्र प्रथम प्रयोगे मातृऽपूजाभ्युदयिके भवतः॥४॥

अनंतरंद्वैत्रस्यपूर्वतःउत्तरतोवाप्र षुशुचौदेशेयत्रसस्यानिन्युप्यन्तेतत्रेदंकर्म
कुर्यात्॥ यद्वाग्रामेपूर्वतउत्तरतोवाशुचिदेशेस्यकर्षणंविधायतत्रकर्तव्यं॥ एवंदेश
द्वयान्यतरेदेशेपंचभूसंस्कारान्कृत्वा।औपासनाग्निमुपसमाधायब्रह्मोपवेशना
दिकुर्यात्। तत्रविशेषः। व्रीहिकालेव्रीहिसस्याभिवृद्धैरग्निंपरिस्तृणाति यवकाले
यवकासस्याभिवृद्धैः तथाव्रीहिकालेव्रीहिमयंएककमेवचरुंयवकालेयवमयंश्रपयति।
अपरंस्थालीपाकंसिद्धमेवासादयति। तंडुलानपरंउपकल्पयति। बलिपटलक
मितिशूर्पादिकंवैणवपात्रंकुल्माषौदनयुक्तमुच्यते। तंडुलानंतरंसिद्धंसिद्धंचरुं
प्रोक्षति। आज्यभागानंतरंपंचाज्याहुतीर्जुहोति। यथापृथिवीद्यौःप्रदिशोदिशोयस्मै
द्युभिरावृताः। तामिहेंद्रमुपह्वयेशिवानःसंतुहेतयःस्वाहा॥ इदमिंद्राय॥ यन्मे
किंचिदुपेप्सितमस्मिन्कर्मणिवृत्रहन्। तन्मेसर्वंसमृध्यतांजीवतःशरदःशत

१३५

घ

ॐस्वाहा। इदमिंद्राय। संपत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यं ॐ श्रैष्ठ्यं ॐ श्रीः प्रजामिहावतु स्वाहा। इदमिंद्राय। यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्म्मणां। इंद्रपत्नीमुपह्वये सीतां ॐ सा मे त्वनपायिनी भूयात् कर्म्मणि स्वाहा। इदमिंद्रपत्न्यै। अश्वावती गोमती सूनृतावती बिभर्त्ति या प्राणभृतो अतंद्रिता। खलमालिनीमुर्वरामस्मिन्कर्म्मण्युपह्वये ध्रुवां ॐ सा मे त्वनपायिनी स्वाहा। इदं ॐ सीतायै। अथ प्रकृतस्य स्थालीपाकस्य चतस्र आहुतीर्जुहोति यथा सीतायै स्वाहा। इदं सीतायै। यजायै स्वाहा। इदं यजायै। समायै स्वाहा। इदं समायै। भूत्यै स्वाहा। इदं भूत्यै। अथ सिद्धेन स्थालीपाकेन लांगलयोजन देवताभ्योष्टाहुतीर्जुहोति। इंद्राय स्वाहा। इदमिंद्राय। पर्ज्जन्याय स्वाहा। इदं पर्ज्जन्याय। अश्विभ्यां ॐ स्वाहा। इदमश्विभ्यां। मरुद्भ्यः स्वाहा। इदं मरुद्भ्यः। उदलाकाश्यपाय स्वाहा। इदमनुमत्यै यथा दैवतं त्याग ४ प्रकृतान्नसिद्धान्न चरोः स्विष्टकृत ततोमहाव्या

१३

इत्यादि ब्रह्म दक्षिणा दानान्तं कृत्वा क्षेत्रस्य पुरस्तादारभ्य प्रादक्षिण्येन प्रतिदिशं स्त
रणशेषं तृणान्यास्तीर्य तेषु मुख्येन चरुणा यथास्तरणं वक्ष्यमाण मंत्रैः बलीन् हरति
यथा पुरस्ताद्य एतं आसते सुधन्वानो निषंगिणः। तेभ्यः पुरस्ताद्गोपायंत्वप्रमत्ता अन
पायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमं पुरस्ताद्बलिहरणमंत्रः। इदं सुधन्वा
भ्यो निषंगिभ्यः। अथ दक्षिणतो निमिषा वर्मिण आसते तेभ्यो दक्षिणतो गोपायंत्वप्र
मत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमं इति दक्षिणतो बलिहर
णमंत्रः। इदं मनिषेभ्यो वर्मिभ्यः। अथ पश्चाद्भुवः त्र[illegible] भुवो भूतिर्भूमिः पार्ष्णिर्मुर्नं
कु[illegible]रिः। तेभ्यः पश्चाद्गोपायंत्वप्रमत्ता अन[illegible]पायिनो नम एषां करोम्यहं बलिमेभ्यो ह
रामीमं इति पश्चिमतो बलिहरणमंत्रः। इदमाभूभ्य ४। अभूभ्यो भूत्यै भूम्यै पार्ष्ण्यै शु
नंकु[illegible]र्यै। अथोत्तरतो भीमा वायुः समा जवे। तेभ्य उत्तरतः क्षेत्रे खलेग्रहे ध्वनि गोपायं

त्वप्रमत्ताश्चनपायिनोनमऽवछांकरोम्यहं बलिमेभ्योहरामीमं। इतिउत्तंतोबलिहरणमंत्रः ॥
इदं भीमेभ्योवायुसमाजवेभ्यः। अथासिद्धचरुशेषंस्याल्यांनाल्यशेषेणयमत्वीयतेनेद्रा
दिभ्योनुमत्यंतेभ्योलांगलयोजनदेवताभ्योबलिं८ हरति। ततोबलिपटलकेनस्त्रियश्चेंद्रा
दिभ्योलांगयोजनदेवताभ्यः अन्येभ्यः वृद्धव्यवहारसिद्धेभ्यः क्षेत्रपालादिभ्यः बलि
दानंकुर्युः४॥ततोब्राह्मणान्भोजयेत्॥ ॥ इत्यग्निहोत्रीहरिहरविरचितायांपार
स्करगृह्यसूत्रव्याख्यानपूर्विकायांप्रयोगपद्धतौद्वितीयः कांडः॥ २॥ ॥ अनाहिताग्ने
र्नवप्राशनं। अनाहिताग्निरावसथिकः। तस्यनवप्राशननिमित्तंनवप्राशनाख्यंकर्म
व्याख्यस्यतइतिसूत्रशेषः। नवप्राशनमितिसंज्ञात्वन्वर्था। ततश्चेतत्कृत्वानवंप्राश्य
तेनाकृत्वा। अत्रकिं नवमात्रनिषेधः४॥ छेतकतिपयानांइत्यपेक्षितेगृह्यांतरग्रहकौ
रः॥ नचयज्ञाधिकारस्याः श्यामाकाव्रीहयोयवाः। नाश्नीयात्तानकृत्वैवमन्यत्र

ष्वनियमः स्मृतः॥ ऐन्द्रवः सद्यं शुंगाश्च नीवाराश्चकाकाण वस्तिलाः अकृणीय
पणे श्री- यास्तेषां न्नोक्ता हविर्गुणाः॥ न चास्याग्रयणे शारद्वाच्यता तेन पौर्णमास्य
मेवास्यानियमो नास्ति। व्रीहियवपाकोचितत्वात् शरद्वसंतावादृियेते॥ नवं
स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुती जुहोति शतायुधायेति नवं शरदि
नवव्रीहिमयं वसंते नूतनयवमयं स्थालीपाकं पक्त्वाज्यभागयोरन्ते शतायुधाये
ति चत्वार इत्येताभ्यां मंत्राभ्यां प्रतिमंत्रं द्वे आज्याहुती जुहोति। स्थालीपाकस्याग्र
यणदेवताभ्यो हुत्वा जुहोति। स्विष्टकृते च स्विष्टमग्न इति। अथ स्थालीपाकस्याग्र
यणदेवताभ्यः इंद्राग्नी विश्वेदेवा द्यावापृथिवी इत्येताभ्यः प्रत्येकमेकैकामाहुतिं
हुत्वा स्विष्टमग्न इत्येतेन मंत्रेण स्विष्टकृद्धोमात् पूर्वं पश्चात्त्वाज्याहुती जुहोति। म
ध्यस्थालीपाके न सो विष्टकृतं तंत्। तोम हाव्याहृत्यादि प्राजापत्यान्ते अग्निः प्रथम

इति मंत्रेण संस्रवं प्राश्नाति। अत्र हुतशेषप्राशने गुणविधिरयं मंत्रेण। अन्नपतीय
या वा। अन्नपतिर्ह्यग्निर्देवता यस्याः सा अन्नपतीया तया कृतया अन्नपतीयया अन्न
चा अन्नपतेन्नस्य नो देहीत्यादिकया। वाविकल्पेन प्राश्नाति। यद्वा अन्नपतिशब्दो यस्या
मृचि अस्ति सा अन्नपतीया। अथ यवानां मेतमुत्यमिति। अथ व्रीहिप्राशनमं
त्राभिधानानंतरं यवानां प्राशने मंत्रमाह। एतमु त्यमित्यादि सुदानवइत्यंतमं
त्रं यवप्राशने। येढानसिः। अग्निमेवौष्णीसीत नान्यद्दैवतं। अग्निर्मूर्ध्नामिति विज्ञा
यते॥ न प्रवसेत् यदि प्रवसेद् दुक्तमुपस्थानं यजमानस्य प्राशितमग्नौ जुहुयात्
नवष्ठामेवौपासनिकस्या। ततो ब्राह्मणभोजनमिति सूत्रार्थः॥ ॥ अथ प्रयोगः॥
॥ तत्र शरदि वसंते च अनाहिताग्नेर्नवप्राशनं कर्म भवति॥ प्रथमप्रयोगे मा
त्पूंम्सु दधिके विदध्यात्॥ आवसथ्याग्नौ ब्रह्मोपवेशनादि आशनांते विशेषः॥

पानि १

नवंस्थालीपाकं श्रपयित्वा आज्यभागानंतरं आज्याहुतिद्वयं जुहोति। यथा। श
तायुधाय शतवीर्याय शतोतयेभिमातिषाहे। शतंयो नः शरदो जीजानिंद्रो नेष
दति दुरितानि विश्वा स्वाहा। इदमिंद्राय।। ये चत्वारः पथयो देव यानाअंतरा
द्यावापृथिवी वियंति। तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्ते ह स
र्वे स्वाहा। इदं सर्वेभ्यो देवेभ्यः।। इंद्राग्नी विश्वेदेवा द्यावापृथिवी स्थालीपा
केनाग्रयणदेवताः।। इंद्राग्निभ्यां स्वाहा। इदमिंद्राग्निभ्यां।। विश्वेभ्यो देवेभ्यः
स्वाहा। इदं विश्वेभ्यो देवेभ्यः।। द्यावापृथिवीभ्यां स्वाहा। इदं द्यावापृथिवी
भ्यां।। इति तिस्र आहुतीर्हुत्वा स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च देवः पृतना
अविष्यत्।। सुगंनु पंथां प्रदिशंन एहि ज्योतिष्मध्येह्यजरंन आयुः स्वाहेत्य
नेन आज्याहुतिं जुहोति। इदमग्नये। ततः स्थालीपाकात्। अग्नये स्विष्टकृ

२३८

तेस्वाहा। इदमग्नये स्विष्टकृते। पुनः स्विष्टमग्न इत्यादिनाऽऽहुतिं जुहोति। इदम
ग्नय इति त्यागः॥ ततो महाव्याहृत्यादि प्राजापत्य होमांतं कृत्वा। अग्निः प्रथमः प्रा
श्नातु स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिर्मेदु
न्नशैयः समनैष्ट देवास्त्वया वसनेसमशीमहि त्वा स नो मयोभूः पितो आविश
स्व शंतोकाय तन्वे स्योन इत्यनेन मंत्रेण संस्रवं प्राश्नाति। अन्नपतेऽन्नस्य नो देहि
त्यनेन यवाः। यवान्नप्राशने तु एतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि पव
नाय चकृषुः। इंद्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदान
व इत्यनेन संस्रवं प्राश्नाति। ततो ब्राह्मणभोजनं॥ ॥ मार्गशीर्ष्यां पौर्णमा
स्यामाग्रहायणीकर्म मार्गशीर्ष्यामाग्रहायण्यां पूर्णिमायामाग्रहायणी
संज्ञकर्म भवति॥ स्थालीपाकं श्रपयित्वा श्रवणवदाज्याहुती हुत्वा प

= वा १

राञ्जुहोति। यां जना। इति। तत्र चरुं श्रपयित्वा श्रवणाकर्मणि यथा द्वे आज्याहुती जुहोति
यथात्रापि श्रपश्चैतपदा जहोति द्वाभ्यां मंत्राभ्यां हुत्वा ततो नंतरं मपरा ४ यां जना इत्या
दिभिश्चतुर्भिर्मंत्रैश्चतस्र आज्याहुतीर्जुहोति। स्थालीपाकस्य जुहोति सोमाय मृगशिर
रसे मार्गशीर्ष्यै पौर्णमास्यै हेमंताय चेति। ततः स्थालीपाकेन सोमायेत्यादिभिश्चतुर्भि
र्मंत्रैः स्वाहान्तैश्चतस्र आहुतीर्जुहोतीति चकारः समुच्चयार्थः। स तु शेषं शूर्पेन्
[illegible]
प्योपनिष्क्रमणप्रभृत्या मार्जनांता। ततः स्विष्टकृत्प्रभृति शाशलाया प्राशनान्तेब
लिहरणार्थे स तु शेषं शूर्पे कृत्वा उपनिष्क्रमणं प्रभृति शालाया बहिर्निष्क्रमणा
दि आमार्जनात्। द्वारदेशे मार्जनं यावत्। श्रवणाकर्मेव कुर्यात्। मार्जनान्ते उत्त
ष्टो बलिरित्याहो। एता एतावदाग्रहायणी कर्म। अथान्यत्कर्माभिधीयते। पश्चाद
ग्नेः स्वस्तरमास्तीर्याहतं च वास आच्छुत्य अहतवाससः प्रत्यवरोहंति। पश्चाद
वा १ मार्जनान्तेस्मा वसानेतु उत्सृष्टो बलिरिति वक्तव्यं ब्रूयात् २ चतुरिः

स्वा स्त

वस[थ्य]पश्चिमदेशे स्तरं प्रागग्रैः कुशैः [ते] स्वस्तरं आस्तीर्य विरचय्य अहतं च नवं च वस्त्रं
तदुपरि आस्तीर्य। आप्लुताः स्नाताः अहते नवे सकृत्प्रक्षालिते प्रत्येकं प्रत्यैकं वा सम्वीय वा
ते अहतवाससः स्वाभिप्रन्नतयः प्रत्यवरोहन्ति निविशन्ते। दक्षिणतः स्वामी जायोत्त
रा यथा कनिष्ठमुत्तरतः। कथं प्रत्यवरोहन्ति। सर्वेषां दक्षिणतः स्वामी गृहपतिः
भवति उत्तरा तस्योत्तरा जायापत्नी। उत्तरतः अपत्यानि कथं यथा कनिष्ठं। यो यस्मात्क
निष्ठः स तस्मादुत्तरतः। दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं शमीशाखा
सीतालोष्टाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निरिति॥ तत्र स्वामी [illegible] स्वस्तरं
प्रत्यवरोहन् दक्षिणतोग्नेः ब्रह्माणं यथाविधि उपवेश्य। उत्तरत उदपात्रं जलपू
र्णं भाजनं शमीवृक्षस्य शाखा सीतालोष्टं हलपद्धतिम् एवं स्रष्टकलं। अश्मानं प्रस्त
रं निधाय स्थापयित्वा अग्निं समीक्षमाणः आवसथ्यं पश्यन्। अयमग्निर्वीरतमोयं

भगवन्नमः स हस्वैसानमः सुवीर्याय॰ श्रेष्ठोदधानुनाविरुत्येतं मंत्रंन्नपति। पश्चाद
ग्रेः प्रांचमंत्रलिंकरोति दैवी नावमितितिसृभिः। अग्नेः पश्चिमतः। प्रागग्रमंत्रलिंक
रसंपुटंविदधाति दैवीनावंइत्यारभ्यमद्यारजांसिसुकृतेरुत्येतानिस्तिसृभिर्न्न
भ्रिः स्वस्तरमारोहंति ब्रह्माणमामंत्रयते ब्रह्मन्प्रत्यवरोहामेति। स्वस्तरंय
थोर्त्तं आरोह न्तीादहानीस्वामिब्रह्मतयः पूर्वंपत्नप्रत्यवरोहंतीतितद्विधाना
र्थी। तत्रस्वामीब्रह्माणं आमंत्रयतेपृच्छतिकथं। ब्रह्मन्प्रत्यवरोहामेतिवाक्येन,
ब्रह्मानुज्ञाताःप्रत्यवरोहंत्यायुः कीर्तिर्यशोबलमन्नाद्यंप्रजामितिप्रत्यवरोह
द्यमितिवाक्येनब्रह्मणानुज्ञाताःप्रत्यवरोहंतिस्वस्तरमधितिष्ठंतिआयुःकीर्ति
मित्यादिनामंत्रेण। उपेताजपंतिसुहेमंतः सुवसंतइत्यादिकं। तत्रयउपेताःउप
नीतास्तेजपंतिसुहेमन्तइत्यादिकंमंत्रं। स्योनापृथिवि नोभवेतिदक्षिणपार्श्वैः

२४०

प्राकृशिरसः संविशंति। स्योना पृथिवि भवेत्यनेन मंत्रेण स्वामिना याचयित्वा निप्रा
कूपूर्वशिरो येषां ते प्राकृशिरसः संविशंति दक्षिणपार्श्वैः संविशंति स्वपंति शेर
ते प्रस्तरोपरि॥ उपोदुत्तिष्ठंत्यु दायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या। पृथिव्याः सप्त
धामभिरिति। उपस्थस्तरसमीप उदुत्तिष्ठंति उत्थायतिष्ठंति उदायुषा स्वायुषेत्यने
न मंत्रेण स्वस्तरात्। एवं द्विरपरं ब्रह्मानुज्ञाताः एवमुक्तेन प्रकारेण ब्रह्मन्स्वस्त
वरोहामेत्यारभ्य ब्रह्मानुज्ञाताः द्विरपरं अन्यद्द्विवारं स्वस्तरमारोहंति संविश
ति उत्तिष्ठंति च। अधःशायी रश्चतुरो मासान्यथेष्टं वा॥ अत ऊर्ध्वं चतुरो मासानू
र्ध्व हपतिः प्रमुखाः यथेष्टं वा अथवा इष्टमनतिक्रम्य यथेष्टं यथाकामं अधो वा
षट्खट्वायां वा शायीरन्निति विकल्पः॥ इति सूत्रार्थः४॥ ॥ अथ पद्धतिः॥ मार्गशीर्षी
पौर्णमास्यामाग्रहायणीकर्म भवति। तत्र प्रथमारंभे मातृपूजाभ्युदयिकविधानं

पौषमा
घफाल्गु
नचैत्रा
नग्रहे
स्वहायु
दस्वभ
नोरशायीरनर३

१५
हैदे

आवसथ्याग्नौ ब्रह्मौपवेशनादि प्राशनान्तं विशेषः॥ पूर्वे संततेन उल्कां उदपात्रं द
वीं कं कृत तत्र यं श्रुतेन नमनुलेपनं स्रजं श्चैत्युपकल्प्य आज्यभागान्तं तरमप श्वेतपद्मान्
हीत्वा कृतिद्वयं श्रवणाकर्म्मवत् कृत्वा अपराश्चतस्र आज्याहुतीर्जुहोति। बद्धमाले
श्वतुभि मैत्रैः प्रतिमंत्रं यथा यां जनाः प्रतिनंदंति रात्रीं धेनुमिवायतीं। संवत्सरस्य
या पत्नी सा नो अस्तु सुमंगली स्वाहा। इदं० रात्र्यै। संवत्सरस्य प्रतिमायां ता० रा
त्रीमुपास्महे॥ प्रजा० सुवी यो कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा। इदं० रात्र्यै। संवत्स
राय परिवत्सराये दावत्सराय इद्वत्सराय वत्सराय कृणुते बृहन्नमः। तेषां वयं० सु
मतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा। इदं संवत्सराय परिवत्सराय इदावत्स
त्सराय इद्वत्सराय वत्सराय च॥ ग्रीष्मो हेमंत उत नो वसंतः शिवं वर्षा अभया शरन्नः॥
तेषां वयं० सुमतौ यज्ञियानां निवात एषामभयेव सेम स्वाहा। इदं ग्रीष्माय हेमंताय

कृत्स्ना० शतशारदानां १

नाना ३

दाव

वसंताय वर्षाभ्यः शरदे च। ततः स्थालीपाकेन चतस्र आहुतीर्जुहोति। तद्यथा। सोमा
य स्वाहा। इदं सोमाय। मृगशिरसे स्वाहा। इदं मृगशिरसे। मार्गशीर्ष्यै पौर्णमास्यै
स्वाहा। इदं मार्गशीर्ष्यै पौर्णमास्यै। हेमंताय स्वाहा। इदं हेमंताय। ततः स्थालीपाके
न सौविष्टकृतं हुत्वा। महाव्याहृत्यादि दक्षिणादानान्तं। संतु शेषं। सूर्य्येनस्प्याव
निःक्रमणप्रभृति आमार्जनांतं श्रवणाकर्मवत् कृत्वा मार्जनांते उत्सृष्टो बलिरि
त्युच्चैर्ब्रूयात्। ततस्तां रात्रिं वसानमात्यैः सह संस्तरे तारत्याग्रहायणीकर्म।
अथ स्रस्तरारोहणं। तत्र प्रथमं प्रयोगमात्रपूताम्भु दधिके विधाय स्रस्तरप्रदे
शग्रहे सर्वमावसथ्याग्निं नीत्वा पंचभूसंस्कारपूर्वकं स्थालीं पचित्वा। अग्नेः प
श्चिमस्यां दिशि कुशैः स्रस्तरास्तरणं कुर्यात्। स्रस्तरस्य स्तरणं अग्निशालायां ग्र
होत्तरे युज्यते। अग्निज्वालायां सोम पयस्य रात्रिमंतरेण शयनानि वेधालानस्यो

परिव्हृतनं सकृत्प्रक्षालितउदकुदशं वासः संस्तरेत्।। अग्निं दक्षिणेन ब्राह्मणमुपवेश्य
उत्तरत उदपात्रं शमीशाखां सीतालोष्ठं अश्मानं वनि धाय स्वस्तरस्य पश्चिमतः
स्वामी स्थित्वा तमुत्तरोः पत्नीतामुत्तरेण पत्न्यानि यथा कनिष्ठं गृहपतिरग्निमी
क्षमाणो जपति अयमग्निर्वीरतमो वयोधा वतमः सहस्रसातमः सुवीर्योयं श्रेष्ठे दधा
तु नो रु इति तं मंत्रांततः पश्चादग्नेः प्रांचमंजलिं करोति। देवीनावं स्वरित्राम नागसं
रत्या ध्यान्नि मे छारना सिसु नरू रू इत्यं तामिसि स्तिस्त्वमिरोत्थिः।। ततो ब्रह्मन् प्रत्यवरो
हामेति ब्रह्माणमामंत्र्य प्रत्यवरोहध्वमिति ब्रह्मणा प्रत्यनुज्ञाताः सर्वे स्नाताः अहत
वाससः आयुः कीर्तिर्यशो बलमन्नाद्यं प्रजामित्यनेन मंत्रेण स्वस्तरो हत्यभितिष्ठं
ति। स्त्रीयोपि मंत्रेण।। आरुह्यते षु ये उपनीताः तैहेमंतः सुवसंतः सुग्रीष्मः प्रतिधी
यतां नः शिवा नो वर्षाः संतु शरदः संतु नः शिवाः इत्य सुमंत्रं जपति।। अयस्योना पृथि

स्व

२६२

वीत्सनंपर्यास्वामिश्रम्ततयः स्त्रियउपनीताअनुपनीताश्चसर्वेयथोक्तेक्रमेण दक्षि
णपार्श्वैः प्राक्शिरसः संविशंतिस्वपंति। ततउदायुषास्वायुषोत्पत्स्वेत्यस्यर्चः स्योना
पृथिव्याः सप्तधामभिरित्यनेनमंत्रेणोत्तिष्ठंतिसर्वे। ततः स्वस्तरादुत्तीर्यब्रह्मणामंत्रण
प्रत्यवरोहणोपेतजपसंवेशनोत्थानानिवारद्वयमेवकुर्युः ततआरभ्यचतुरो
मासान्नसट्वेऽधः शयीरन्नाकामतोवाशय्यायां। पुनरावसथ्यंपंचभूसंस्कारपू
र्वकंस्वस्थानेस्थापयेत्। इतिस्वस्तरारोहणम्॥ मुख्यकालेयदावश्यंकर्मकर्तुंन
शक्यतेगौणकालेपिकर्तव्यंगौणेप्यत्रेदृशोभवेत्। आग्नायमाहुतेः कालान्कालो
स्तिप्रातराहुतेः॥ प्रातराहुतिकालात्प्राक्कालः स्यात्सायमाहुतेः॥ पूर्णमासस्यका
लोस्तिपुरादर्शस्यकालतः॥ स्यात्साकमेधकालोप्याशुनासीरीयकालतः॥ शुना
सीरीयकालोप्यावैश्वदेविककालतः श्यामाकेव्रीहिमिश्रैर्वयवैरन्योत्यकालतः॥

२६

प्राग्यष्टुं युज्यते वत्स्यं नत्वत्राग्रयणात्ययः। दक्षिणायनकाले यापश्चिपाचोत्तराय

णे। अन्योन्यकालतः पूर्वं यष्टुं युक्तेऽमेऽपि। एवमामाभियागां यमुख्यकालादन्य

स्तनः। स्वकालोदुत्तरो गौणः कालः पूर्वस्य कर्म्मणः। यद्वागाभिक्रियामुख्यकाल

स्याप्यंतरालवत्। गौणकालत्वमिच्छंति केचित्प्राक्तन कर्म्मणि। गौणेष्वेतेषु काले

षु कर्म्मचोदितमाचरेत्। प्रायश्चित्तप्रकारेण प्रोक्तां निष्कृतिमाचरेत्। प्रायश्चि

त्तमकृत्वा वा गौणकाले समाचरन्। नित्येष्टिमग्निहोत्रं च मारद्वाजीयभाष्यतः।

मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते। तत्कालद्वयोकस्य मुख्यत्वं गौणतापि

वा। मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनं। तन्मुख्यद्रव्यलोभेन गौणकाल

प्रतीक्षणम्। एकपक्षगतो यावान् होमः संख्योपपद्यते। पक्षहोमविधानेन तं हुत्वा ते

बो॰ १ तुमतीयजेत्। ऊँ ध्रुवमाग्रहायिण्यास्ति स्तोष्टकाः। ऊँ इंद्रमुपार आग्रहायिण्याः मार्गशी

ध्रुव २

ष्ठीः पूर्णिमायामिति स्वः। अष्टकाः शीं त्रीण्यष्टकाख्यानि कर्माणि भवंति। तानि च सकृत्
संस्कारकर्मत्वात्। कृतः संस्कारकर्मतेति सुमंतुगौतमादिभिः अष्टकाः पार्वणः श्रा
द्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति पाकयज्ञसंस्था इत्यादिना। अष्टकादी
नां संस्कारकत्वेन स्मरणात्॥ ननु संस्कारकर्मणामपि पंचमहायज्ञानां पार्वणस्था
लीपाकपार्वणश्राद्धानां कुतो सकृत्करणम्॥ अभ्यासश्रवणात्। तथाहि। अ
हरहः स्वाहा कुर्यादाकाष्ठादित्यादिना पंचमहायज्ञादीनां यज्ञादिष्विति वृद्ध
वचनात्। स्थालीपाकस्य। मासि मासि चोशनमिति श्राद्धस्य। न तथाष्टका
नामभ्यासः श्रूयते येन ताः पुनः पुनरनुष्ठीयेरन्नेवं चत्वारिंशत्संस्का
रकर्मणां मध्ये येषामभ्यासः श्रूयते तान्यसकृद्भवंति। इतराणि सकृदिति निर्णयः।
एवं द्वौ वैश्वदेवौ प्राजापत्यापि ञ्चेत्य पूर्यमा ८ स शावैयेयास रवं। अष्टकाकर्मा

णाकर्तव्यत्वेनविधायतत्रइष्टकदेवतापक्षायांइष्टकालिदेवताश्चविधत्ते।तत्रप्रथमाऐंद्रीइंद्रोदे
वताअस्याइतिऐंद्रीइंद्रदेवत्येत्यर्थः१।द्वितीयावैश्वदेवीविश्वेदेवादेवताअस्याइतिवैश्व
देवीविश्वेदेवत्येत्यर्थः१।तृतीयाप्राजापत्याप्रजापतिर्देवताअस्याइतिप्राजापत्याप्र
जापतिदेवत्येत्यर्थः१।।चतुर्थीपित्र्यापितरोदेवताअस्याइतिपित्र्यापितृदेवत्येत्यर्थः१।
अपूपंचमांसंचशाकंच अपूपमांसशाकाः तैःअपूपमांसशाकैर्यथासंख्यंयथासंख्याः
संख्यातामनतिक्रम्ययथासंख्यंयजेततैतेत्यध्याहारः।एतदुक्तंभवति।प्रथमायांअपू
पेणइंद्रंयजेत।द्वितीयायांमध्यमागवेतिवक्ष्यमाणत्वात्।गोमांसेनविश्वान्देवान्
तृतीयायांशाकेनप्रजापतिमिति।अत्रेतिसूत्रउपक्रमेप्यपित्र्येत्यनेनचतुर्थ्यांअभिधा
नंअयुक्तंइतिचेत्।नउपक्रांतानांतिसृणांदेवताभिधानावसरेचतुर्थ्याअपिदेवता
याअभावार्थस्यबुद्धिस्थत्वात्तदभिधानमदोषः।अत्राष्टकाशब्दःकर्मवचनोपिका

लोपलक्षकः॥ यथावार्त्रघ्नी पौर्णमासी वृधन्वती अमावास्येत्यत्र कर्माभिधायकौ पौर्णमास्य
मावास्याशब्दौ काललक्षकौ। अन्यथा आग्रहायण्या ऊर्ध्वं तिस्रोष्टका इत्यनेन प्रतिपद्य
वाष्टकाकर्मप्राप्तिः स्यात्। तस्मात्। अष्टकाशब्देनाष्टम्योपलक्षिता तु तेन तथा च श्रुतिः।
आश्वलायनस्मृतिश्च। द्वादश पूर्णमास्यो द्वादशाष्टका द्वादश अमावास्या इति स्मृति
श्च हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति॥ एवमष्टकाकर्म सु
द्रव्यदेवते अविधीयतु देशक्रमेण तदितिकर्तव्यतामाह। प्रथमाष्टकापक्षाष्टम्या
ं स्थालीपाकं श्रपयित्वा स्वभागाविष्णुश्च अग्नाकृतीर्जुहोति। प्रथमा आद्या अष्टका अ
ष्टकानामधेयं कर्म भवति। कदा पक्षाष्टम्यां अत्र सौरादित्यदेनभेददिनमासाना
मनेकत्वात्। अष्टम्योप्यनेका इति किं माससंबंधिन्यां अष्टम्यां अष्टका नामधेयं क
र्माभिसंदेह पक्षाष्टम्यामित्याह। पक्षे पौर्णमास्या ऊर्ध्वमिति वचनात्। सामर्थ्यात्

१४४

३५

मो२

१४५

कृष्णाष्टमीपक्षाष्टमी न पुनः सौरसावनमानान्तरमासस्संबंधिनीतेषां शुक्लापक्षत्वाभावा
त्पक्षाष्टम्यां कथं स्थालीपाकं चरुं श्रपयित्वा उक्तविधिमासंसाध्य आज्यभागौ आहुति
रिशेषो हुत्वा दश आज्याहुतीः । त्रिंशच्च सावद्दत्यादिभिर्दशभिर्मंत्रैर्जुहोति । स्थालीपा
कस्य जुहोति । स्थालीपाकस्य चरोः जुहोति शांता पृथिवी त्यादिभिश्चतुर्भिर्मंत्रैश्च तस्य
आज्याहुतीर्जुहोति प्रतिमंत्रं अत्र रौद्री प्रथमाष्टमी केति प्राधान्यामिंद्रस्योक्तं अपूप
स्यनेन हविषा यागावसरश्च नोक्तः सूत्रकृता अतः संदेहः कुत्र क्रियतामिति किं ताव
त्प्राप्तं साधनत्वादाज्यभागानंतरं क्रियतामिति । न तत्र आज्यभागाविष्ट्वा ज्याहुतीर्जु
होतीति सूत्रकारेण आज्याहुतिविधानात् तर्हि तदंते स्तु तथा स्थालीपाकस्य जुहो
तीति आज्यहोमानन्तरं स्थालीपाकहोमविधानात् तस्मात्तदनंतरं युज्यते पूपेनेंद्रे
द्राय स्वाहेत्येकामाहुतिं जुहोति जुहुयात् । एवमुत्तरत्रापि एकं प्रथमाष्टकेति कर्त्त

१८५

व्यतामनुविधायाधुनाऽयमेवोत्तरास्वष्टकासु इति कर्त्तव्यताऽस्याभिप्रेता। तासां वि
शेषमात्रमनुविधत्ते। मध्यमा गवेत्यादिभिः सूत्रैर्मध्यमा गवातिसृष्टेणं द्वितीयस्यार्थे।
सा गवा गोपशुना कर्त्तव्या इति सूत्रशेषः। अत्राचार्येणाप्ययं गोपशुर्नुतोऽस्त्यपि अ
स्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति स्मरणेन तत्तथा। देवरेण सुतोत्पत्तिर्वान
प्रस्थाश्रमग्रहः। दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च। समुद्रयानस्वीका
रः कमण्डलुविधारणं। महाप्रस्थानगमनं गोपशुश्च सुराग्रहः। अग्निहोत्रहवण्या
श्च लेहो लीढापरिग्रहः। असवर्णासु कन्यासु विवाहो न द्विजातिषु। वृत्तस्वाध्या
यसापेक्षमघसंकोचनं तथा। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च। प्रायश्चित्त
विधानं च विप्राणां मरणान्तिकं। संसर्गदोषः पापेषु मधुपर्के पशोर्वधः। दत्तौरसेतरे
षां तु पुत्रत्वेन परिग्रहः॥ शामित्रं चैव विप्राणां सोमविक्रयणं तथा। दीर्घकालं ब्र

न्मचर्यनरमेधाश्वमेधकौ। कालौ युगेत्विमान्धर्मान्वर्ज्यानाहुर्मनीषिण इति च स्मरणात्।
।गोपशोः अस्वर्ग्यत्वात् लोकविद्विष्टत्वात्। कलौ विशेषतो वर्तनीयत्वाच्च न गवालंभः क
र्तव्यः। किंतु अनिषिद्धपश्वंतरेण अवश्यकर्तव्याष्टकादिकर्म निर्वोहणीयं। समूलं लवे
त्वनुनिर्वपादिसमव्याहारेण तत्सौत्रमात्रविषयत्वात्। वस्तुतस्तु नान्यतस्यतंत्रत्वं प्रती
यते। तत्रस्यैव वपां जुहोति च वह वपां जातवेदः पितृभ्य इति। तस्यै इति षष्ठ्याः स्थाने चतु
र्थी तस्याः गोवपां वह वपामित्यादि। नाम मंत्रेण जुहोति। पुनर्विश्वेभ्यो देवेभ्यः स्वाहेत्य
वदानानि जुहोति। शेषं पशुकल्पं पशुश्चेत्यादिना उपरिष्टाद्वक्ष्यति। रूपं कालो नु
निर्वापः श्रपणं वेश देवता तथा। आदौ ये विहिता पश्चात्त इमे सर्व्वे दासस्ताः। इ
त्येतस्य संहिततात्र दर्शनात् इति प्रासंगिकं। सांतपनीयाधिकरणे न्यतंत्रमध्ये
ऽग्निहोत्र दर्शनात्। श्रौ न्वष्टकासु सदा सांपार्श्वे सा न्वष्टका स व्याम्यां परिवर्तते पिंड

पितृयज्ञवत्। श्वः अष्टम्याउत्तरेद्युः अन्वष्टकासु अष्टकां अनुपश्चाद्भवंतीत्यन्व
ष्टकाः। तासु सर्वासां च तस्त्रणमष्टकानां कर्म भवति इति विशेषः। केन द्रव्येण स्याह।
पार्श्वेव सक्थ्नैव पार्श्वसक्थिनी पार्श्वसक्थिनी वर्तते सव्येव पार्श्वसक्थि सव्येताभ्यां पार्श्व
सक्थिसव्याभ्यां अत्र तुल्याधिकरणे विशेषणपूर्वस्य सव्यशब्दस्योत्तरपदत्वं छांद
सं। परिवर्तते सर्वं तत् ४ प्रक्षादि तेआवसथ्याग्निः सदनेइति कर्तव्यतापेक्षायामाहापिं
डपितृयज्ञवत्। अपराह्णे पिंडपितृयज्ञइत्याद्युक्तो पिंडपितृयज्ञविधिना पत्नीभ्यश्च
पिंडपितृयज्ञवदित्यनेन पितृपितामहप्रपितामहानां पिंडदानं प्राप्तं ततोधिक
मुच्यते। स्त्रीभ्यः पितृपितामहीभ्यः ४ पिंडानन्दद्यादिति चकारेण समुच्चीयते। अत्र
सामान्योस्त्रीशब्दः पित्रादिसन्निधानात्तन्मात्रादिपरोवसीयते वगम्यते। उप
सेचनं च कर्षूषु सुरया तर्पणेन च अंजनानुलेपनं ४ अंजनं च। न केवलं स्त्रीभ्यः

५६

पिंडान्दद्यात्। किंतु उपसेवनं च कुर्यात्। कया सुरया मद्येन कासु कर्षूषु न केवलं सुरया तत्प
लेन च तत्पर्यन्तस्थनेनेति तर्प्पणेन सोधनं सक्तादितेन चकारः उपसेचनक्रियासमुच्चयार्थः कु
राणाधिकरणयोश्चेति तर्प्पेशब्दोल्लुडंतः। अंजनं त्रैककुदं सौवीरांजनं प्रसिद्धं तदत्वा
मे लौकिकं कज्जलं अनुलेपनं सुगंधिद्रव्यं चंदनादि स्रजः अप्रतिषिद्ध सुरभिपुष्पमालाः
चकारः दद्यादिति क्रियासमुच्चयार्थः। आचार्यांतेवासिभ्यश्चानपत्येभ्य इच्छन् यदि काम
यते तदा आचार्यान्तेवासिभ्यश्चाशिष्येभ्यः पिंडान्दद्यात् यद्यादितेऽनपत्याः स्युः मध्या
वर्षे च तुरीया शाकाष्टका। एवमष्टकात्रयं सामान्यतो विशेषनं च अनुविधातौ यथा पित्र्य
मुद्दिश्य क्रमप्राप्ताविशेषतश्च चतुर्थी अष्टका माहा मध्यामे च्छे वर्षे च वाष्टिकाले प्रोष्ठप
दाऊर्द्ध्वमष्टमीत्यर्थः॥ तुरीया चतुर्थी शाकाष्टका शाकेन कालकाख्येन निर्वर्त्यत्वात् अ
ष्टका शाकाष्टका इति सूत्रार्थः॥ ॥ अथाष्टकाकर्मपद्धतिः॥ ॥ तत्र मार्गशी

३

१४७

र्षांऽऊर्द्धं कृत्वाष्टम्यामात्वपूजाभ्युदयिके श्राद्धं विधायावसथ्याग्नौ कर्म कुर्यात। केषांचित्त्व
द्वैअष्टकाकर्मसुआभ्युदयिकं नास्ति। नाष्टकासु भवेच्छ्राद्धमिति वचनात्। तत्र ब्रह्मो
पवेशनादिप्राशनान्ते विशेषः। तंडुलानंतरं अपूर्वं औपासनाग्निसिद्धस्यैवापूपस्य
आसादनं प्रोक्षणं च प्रोक्षणकाले तत आज्यभागान्तं कर्म कृत्वा त्रिः ॐ शात्स्वसारद्धत्येव
मायाः दशाहुती हुत्वा स्थालीपाकेन शान्ता पृथिवीत्यादिभिश्चतुर्भिर्मंत्रैश्चतस्र आ
हुतीर्हुत्वा अपूपादिं द्वाय स्वाहेत्येकामाहुतिं दत्वा स्थालीपाकादपूपाच्च स्विष्टकृते
तु होति। पश्चात्। आज्यभागानंतरं त्रिः ॐ शात्स्वसार उपयंति निस्कृतिः ॐ समानं केतुं प्र
तिमुंचमानाः अनन्तरं तन्वतेकवय ४ प्रतानतीर्मध्ये ह्वंदस ४ परिवर्तिमास्वतीः स्वाहा।
इदं स्वस्रभ्यः ज्योतिष्मती प्रतिमुंचते नभो राज्ञी देवी सूर्यस्य व्रतानि। विपश्यंति प
शवो जायमानानानारूपा मातुरस्या उपस्थे स्वाहा। इदं [illegible] ॐ राज्ञ्यै। एका

नेऽ

१४

पं

ष्टकातपसातप्यमानाजज्ञानगर्भेमहिमानमिंद्रंतेनदस्यून्व्यसहंत देवाहंमोसुराणा
ममवछ्चीभिःस्वाहा।इदमष्टकायैअनानुज्ञामनुज्ञांमामकर्त्तेःसत्यंवदंत्वमिष्छ
तत्रा।भूयासमस्यसुमतौयथायूयमन्यावोअन्या।मतिमाप्रयुक्तःस्वाहा।इदंरात्री
भ्यः।अभून्ममसुमतौविश्ववेदाआष्प्रतिष्ठामविदद्धिगाधम्रा।भूयासमस्यसुम
तौयथायूयमन्यावोअन्यामतिमायुक्तःस्वाहा।इद७रात्रीभ्यः।पंचव्युष्टीरनुपंचदो
हागांपंचनाम्नीमतवोनुपंचा।पंचदिशःपंचदशेनक्लृप्ताःसमानमूर्द्धीरधिलो।कमे
क८स्वाहा।इद८रात्रीभ्यः।ऋतस्यगर्भःप्रथमाव्यौषुष्वहा।पामेकामहिमानंविभर्ति।
सूर्यस्यैकाचरतिनिष्कृतिषुधर्मस्यैकासवितैकान्नियछतुस्वाहा।इद७रात्र्ये।याप्रथ
माव्यौहं...सा धेनुरभवद्यमेसानः४पयस्वातीधुक्ष्वोत्तरामुत्तरा७समा७स्वाहा।इदं
७रात्र्यै।८शुक्रऋषभानभसाज्योतिषागाद्विश्वरूपाशबलीरग्निकेतु४समानमर्थे
(margin, left of line 11): १३२

नं४

क्रि० स० १ ६२

१६८

ॐ स्वप्नं स्यमानाविसृजती त्वरामन्त्ररउषागात्स्वाहा। इदं ॐ रात्र्यै। अत्तनांपतीव्रयमेयमा गादक्षिणेन्द्रीन्नमित्रोप्रजानी। एकासतीवहुभोषो व्योहं स्ताधं जीलि त्वं न रयासि सर्वमन्य स्वाहा। इदं ॐ रात्र्यै। अथस्थालीपाकेन ... वतस्व आहुतयः ॐ शीता पृथिवीत्यादिभिर्मन्त्रैः शान्ना पृथिवी शिवमन्तरिक्षं हे शन्नो द्यौर ... मयं कृणोतु शन्नोदिशः प्रदिशआदिशो नो होरात्रे कृणुतं दीर्घमायुर्व्यश्नवे स्वाहा। इदं पृथिव्या अंतरिक्षाय दिवे दिग्भ्यः प्रदिग्भ्यः आदिग्भ्यो होहो रात्राभ्यां च। आपो मरीचीः परिपान्तु सर्वतो धातासमुद्रो अपहं तु पापं। भूतं भविष्यदकृतद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याम् ॐ स्वाहा। इदमद्भ्यो मरीचिभ्यो धात्रे समुद्राय ब्रह्मणे चा विश्वे आदित्या वसवश्चा देवा रुद्रा गोप्तारो मरुतश्च सन्तु। ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु यः स्वाहा। इदं विश्वेभ्य आदित्येभ्यो वसुभ्यो देव

१६

सृत्रः २

ष्योरुद्रेभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिने च। अग्निष्टकायै स्वाहा। इदमष्टकायै। अग्न्यादिपूर्वतरवका
कृतिः। इन्द्राय स्वाहा। इदमिन्द्राय। स्थालीपाकादपूपाद्यस्तिष्टकृत। ततो महाव्याहृत्यादि
प्राजापत्यांतं होमं विधाय प्राशनादि समापयेत्। श्वोऽन्वष्टकाकर्मावसथ्याग्नाविव। तत्राग्नि
त्यवैश्वदेवानंतरं अपराह्णे प्राचीनावीती नीवीं बंधनं कृत्वा दक्षिणामुखः परिस्तरेत्
ग्निसमीपे अग्निरुत्तरतः उपविश्याग्न्यादि दक्षिणं तमप्रदक्षिणमग्निं दक्षिणाग्रैः कु
शैः परिस्तीर्य अग्नेः पश्चिमतः दक्षिणसंस्थानि पात्राण्येकैकश आसादयति। यथा स्रुवं
चरुस्थाली वा स्रुकपद्मे स्कगनंतरं चरुस्थालीमुदकं। आत्मनेक्षणं स्रुवं उदपात्रं सकृदा
छिन्नानि कीतकयोर्लेहयो र्छागस्य प श्वेस वकोमांसं। सुरां सरकूं नजं तनं अनुले
पनं स्रजः। स्रुतवालि। चात ततः पाश्वास रवोमांसं ललक्षणं अणुशाखलावप्रक्षिप्ता सादि
तोदकायां चरुस्थाल्यां प्रक्षिप्याग्नावधिश्रित्याप्रदक्षिणं मेक्षणेन चालयन् लाश्रतमां

समासादितेन घृतेनाभिघार्य दक्षिणत उदस्य पूर्वेणाग्निमानीयोत्तरतस्थापयेत्ततः
सव्यं जान्वाच्य मेक्षणेन मांसमादायाग्नये कव्यवाहनाय स्वा हेत्येकामाहुतिं हुत्वा
इदमग्नये कव्यवाहनायेति त्यागं विधाय पुनर्मेक्षणेन मांसमादाय सोमाय स्वा पितृ
मते स्वाहेति हुत्वा इदं सोमाय पितृमत इति त्यागं विधाय मेक्षणमग्नौ प्रास्याग्नेर्दक्षि
णतः पश्चाद्वा दक्षिणामुख उपविश्य सव्यं जान्वाच्योपलिप्य स्फ्येनापहता असुरा
रक्षांसि वेदिषद इति लेखामुल्लिख्य तथैव द्वितीयां उदकमुपस्पृश्य ये रूपाणीत्यु
ल्मुकं प्रथमलेखाग्रे निधाय तथैव द्वितीयलेखाग्रे उदकमुपस्पृशेत् ततः उदकपा
त्रमादाय प्रथमलेखायां पितृतीर्थेनामुकगोत्रास्मत्पितरमुकशर्मन्नवनेनिक्ष्वेत्ये
वं पितामहप्रपितामहयोरवनेजनं दत्वा द्वितीयलेखायां अमुकगोत्रेऽस्मन्मातः अ
मुकि देवि अवनेनिक्ष्वेति एवं पितामही प्रपितामह्योः अवनेजनं दत्वा सकृदुपमूला

१४९
३

इदं पित्रे इदं पितामहाय इदं प्रपितामहाय इदं मात्रे पितामह्यै
गुरि:

न्नानि दक्षिणाग्राणि वर्हीषि तेषु रेखयोरास्तीर्य तत्रावनेजनक्रमेणामुकगोत्रास्म
त्पितर अमुकशर्म्मन्नेतत्ते मांसं स्वधा नम इति पिंडं दत्वा पितामह प्रपितामहयोश्चै
वं प्रदायापरलेखायाम् अमुकगोत्रेऽस्मन्मातः अमुकि देवि एतत्ते मांसं स्वधा नम इ
ति पिंडं दत्वा उत्तरत्र पितामही प्रपितामहीति पिंडद्वयं प्रदाय प्रतिपिंडदाने इदं प्र
पितामह्यै इति त्यागान् विधाय । इच्छया स्त्रीपिंडसन्निधाने अवनेजनस्यैकदास्तर
णपूर्वकं अनपत्येभ्यः आचार्यान्तेवासिभ्यश्च यथाक्रमं मांसपिंडान् दद्यात् । चका
रादन्येभ्योपि सपिंडादिभ्यः । स्त्रीपिंडसन्निधाने अवटत्रयं खात्वा तेषु अमुकगो
त्रे अमुकि देवि एतत्पत्व स्वेति मातृप्रभृतिभ्यः सक्तून् प्रत्यवटं प्रक्षिप्य ततस्तथै
व अञ्जनस्वेति मातृप्रभृतिभ्योऽञ्जनं दत्वा अनुलिंपस्वेत्यनुलेपनं स्रजोपि नयस्वेति
स्रजो दत्वा अपितरः इत्यर्द्धर्चं जपित्वा पराङ्मुख एत्य वायुं धारयन्नातमनात्तरु

दक्षु खङ्गासित्वा तेनैवारत्यामीमदं तेत्यर्द्धं त्रपित्वा पूर्ववदवनेज्यनीविं विस्रस्य
नमो वः इति प्रतिमंत्रमंजलिं करोति। गृहान्नः इत्याशिषं प्रार्थ्य एतद्वः इति पिंडं सूत्रा
णि दत्वोर्जंभितिति पिंडे ष्वपो निषिच्य पिंडानुत्थाप्य उल्काया मवघ्रायावति घ्नतिस
कृदाछिन्नायप्रेप्रास्यो ल्मुकेच प्रतिष्यो दकं स्पृष्ट्वा चम्य आन्वष्टक्यं श्राद्धं कुर्यात्॥
उल्काय मर्यीमत्न्यीवाशिलिम्पस्य पतिम्यश्वश्रा ददीतमतीस्स दा। उल्वा मांसस्था
त्राप्योस्वावयनोबांपमूर्खापिंडपितयनी श्वइत्येका एकावैष्वा ऊर्द्धं कुर्णामर्णा
द्वितीयाष्टका तत्रमात्र त्यपूत्नापूर्वकमाभ्युदयिकं कृत्वा प्रथमप्रयोगे आवस
थ्याग्नौ ब्रह्मोपवेशनं। प्रणीताप्रणयनं परिस्तरणं विधाय पात्राण्यासादयति
पवित्र छेदनानि पवित्रे प्रोक्षणीपात्रं आज्यस्थाली हुच रुस्थाल्यो सम्मार्गकुशाः
उपयमन कुशाः समिधः स्रुवः आज्यं कार्म्यं मण्पेटस्तमात्रौवयाश्चपात्रौ

शाखाविशाशेअष्टकाचरुतंडुलाः हस्तमात्रं वारणं शूलं पशुश्रपणार्थमुखातास्र
मयीमृन्मयीवा पशुकचरुतंडुलाश्च इत्येतानि अथोपकल्पनीयान्युप[illegible] कल्पयति
लीत्तशाखा पलाशा शाखात्रिहस्तप्रमाणा व्याममात्री कौत्रि[illegible] गुणरशना। उपा
करणं तृणमेकं दर्भतरुणं। द्विगुणरशना कोशी व्याममा[illegible]त्री। पशुश्छागः। पात्रेन
नौ। उदकपूर्णा स्थाली। असिः शस्त्रं। हिरण्यशकला निषट्। पृषदाज्यार्थे दधिचेति।
ततः पवित्रकरणादि प्रोक्षणांतं विशेषः विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति पाशु
कचरुतंडुलानां प्रोक्षणं आ[illegible]त्यनिर्वापानंतरं मष्टकाचरुपात्रे तंडुलान्प्रक्षिप्य
पाशुकचरुपात्रे तंडुलान्कुर्यात्। ततो ब्रह्मासंस्थवमष्टकाचतुं अन्यः पत्नी वा पाशुच
रुं युगपदग्नौ उद[illegible]क्तं स्यमधिश्रयंति। ततः पर्यग्निकरणादि प्रोक्षणुत्पवनांतं यजमा
नः कुर्यात्। अथाग्नेः पश्चाद्दक्षि[illegible]णत आरभ्य उदक्संस्था प्रागग्राः कुशास्तरणाव

रिक्तं शाखा आस्तीर्य। अग्नेः प्राग् दक्षिणेन पुरस्ता [त् २] कृत्वा पलाशशाखामग्निकुंडलग्नां उ
दङ्मुखोपविष्टः वितस्तिमात्रं निखाय त्रिगुणरशनामादाय प्राग्दक्षिणेन पलाशशा
खां त्रिर्वेष्टयति। अथोपाकरणं तृणेन विश्वेभ्यो देवेभ्यो उपाकरोमीति पशुमुपा
करोति स्पृशति। शरीरात् त्रिगुणरशना पाशं शृंगमध्ये तूष्णीं दक्षिणकर्णे धस्ता हृ ध्ना
ति विश्वेभ्यो देवेभ्यो नियुनज्मीति पलाशशाखायां पशुं नियुनक्ति। अथ प्रोक्षणी
रादाय ब्रह्मन् हविः प्रोक्षिष्यामीति ब्रह्माणमामंत्र्य ओं३ प्रोक्षेति ब्रह्मानुज्ञातो
विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्ष्य प्रोक्षणीजलं पशोरास्ये कृ
त्वा शेषं पशोरधस्ता दुप्रोक्षति सिंचति। अथ यथागतमागत्य स्वासने उपविश्य
यमनकुशानादाय समिधोभ्याधाय पर्युक्ष्य ब्रह्मणान्वारब्धः आघारौ कृत्वा आज्य
लिप्तेन स्त्रुवाग्रेण ललाटे अंसयोः श्रोण्योश्च पशुं समननिक्ति अंजनं करोति। त

तोऽस्मिदापशवेणे वसंयोज्य अश्विभ्युवायाभ्यां पशोर्ललाटमुपस्पृशति ततो उ
ल्मुकमादायोत्थाय पत्र दक्षिणं वारि गच्छ पशुं त्र्याग्नेयं शाल्वामग्निपर्यग्नि कृत्वोल्मुकम
ग्नौ प्रास्य तावत्र [illegible] ति परीत्य प्राग्दक्षिणेयेनागत्य ग्नास्तूत्तरेण द्वयमादापशुं
शिरस उन्मुच्य कं छेद्य त्वा वापला शश्वा रवातः उन्मुच्य रशनया वामकरेण ध
त्वा [illegible] दक्षिणेन नवं प्राश्य पत्नीभ्यामन्वारब्धमुदयति। तत्रैकं तृणं भूमौ ध
त्वा तस्मिन्प्रत्यक्शिरसं वा उदक्या दं पशुं निपात्य स्वासने उपविशति यजमा
नः अपरः कश्चित्पशुवे संज्ञपयति। संज्ञप्यमाने यजमाने पूर्णाहुति वदा
ज्यं संस्कृत्य स्वाहा देवेभ्य इत्येकामाहुतिं हुत्वा इदं देवेभ्यः इति त्यागं कृत्वा सं
ज्ञप्ते देवेभ्यः स्वाहेति तेनैवाज्येन द्वितीयां दत्वा इदं देवेभ्यः अपराः पंचाहुतीर्जु
होति। इदं प्रजापतये इति त्यागः ततः पात्रेजनीमादाय पशोः प्राणान्स्वय

ततु सा
यपशुंमो
चयित्वा
वपाश्र
पत्नीभ्यां
नियोज
नीयत
ति॥ शुद्धि:

मेवमृगुं धत्तिय या। पात्रे तनी जलमा दाय मुखं दक्षिणोत्तरे नासिके दक्षिणोत्तरे
चक्षुषी दक्षिणोत्तरो कर्णौ नाभिंमेढ्रं पायुं एकीकृत्य प्रादं क्रमेण मृगुं धत्ति। शेषं पशोः पश्चान्निषिंचति। ततः पशुमुत्तानं कृत्वा नाभ्यग्रे उदं ग्रं तृणं निधाय असिधारया तृणमसिनि धाय छिनत्ति। अथद्वि धामूलतस्य तृणस्य मूलमा दाय उभयतो लोहितेनाक्त्वा निरस्य वर्पमुत्खिदति। अनंतरं च यां श्रपण्या वादाय प्रोर्णोति। ततश्छिनत्ति वपां। असिधारयति वा। ततः प्रक्षाल्य अग्रे रुत्तरतः स्थित्वा प्रतप्य शाखाभ्योरंतरेण हृत्वाग्ने र्दक्षिणतः स्थित्वा वपां श्रपयति। आज्यमा णं च स्रुवेण संगृह्य हीत्वा सिद्धार्यस्य त्यासिंहृत्य ब्रह्मोपदक्षिणेन हृत्य स्वासने उपविश्य स्रुवेण संगृह्य हीत्वा वपायां प्राणदानं विधाय मूल शाखा स्वासा दायति आलमते वा। ततः ब्रह्मणान्वारब्धे आस्य मागे हुत्वा त्रिः शश्वस्वाहा इति दशा हुतीरनं न्वारब्धे हुत्वा आ

ष्टकाचरुणा शांत पृथिवी त्यादिकाश्चतस्रो हुत्वा वपाहोमाय वा महस्तस्येस्रुवे आज्य
मुपस्तीर्य हिरण्यशकलमवधाय वपां द्विरवदाय गृहीत्वा पुनर्हिरण्यशकलमव
धायद्विरभिघार्य वह वपां जातवेदः पितृभ्य इति प्राचीनावीतिनो दक्षिणामुखस्य व
पाहोमः। इदं पितृभ्यः। इदं जातवेदस इति वात्यागं विधाय यज्ञोपवीती मध्वो
दर्वं स्रुच्छ्या वपाश्रपण्यौ विपर्यस्तोऽग्नौ प्रास्य पशुं विशास्ति तथैव यथा। हृदयं जिह्वां
क्रोडं सव्यं बाहुं पार्श्वे यकृत् वृक्कौ गुदं मध्यं दक्षिणां श्रोणिमिति॥ सप्तैवदान
पक्षे दक्षिणां बाहुं गुदं तृतीयां श्रोणिं सव्यां श्रोणिमिति व्यंगानि स्विष्टकृद्भ्यामव
दानि ततो हृदयं जिह्वां क्रोडमिति॥ पंचावदानपक्षे हृदयं जिह्वां क्रोडं
सव्यं बाहुं पार्श्वे इति। पंचस्ववघतिस्वं ड यति तस्मिन्नक्षे शेषात् स्विष्टकृते अवद्याति।
ततः अवदानानि प्रक्षाल्य शूले हृदयं प्रव [illegible] मग्नौ बाधिश्रित्य अवदानानि प्रक्षिप्य

तिस्त्वल्पमुदकं चाततत्रिः प्रच्युते हृदयं उपरि कृत्वा पृषदाज्येन हृदयमभिघार्य
इतराण्यवदानानि त्र्यंगवर्जितानि आज्येनाभिघारयति । अथोखामुद्वास्य
अवदानान्युद्धृत्य कस्मिंश्चित् पात्रे हृदयादिक्रमेण उदकसंस्थानि निधा
य स्रुवेण यमादाय हृदयादीनां त्र्यंगवर्जितानां क्रमेण प्रोणादानं कृत्वा शा
खाग्नौ रन्तरेण हृत्य प्लक्षशाखासु हृदयादिक्रमेणोदकसंस्थान्यासादय
तितत त्र्यंगवर्जितान्यालभते । प्रधानहोमार्थं स्रुवेणाज्यमुपस्तीर्य ही
रण्यशकलमवधाय हृदयादिभ्यः क्रमेण द्विर्द्विरवदाय स्रुवे द्विस्त्वा स्थाली
पाकात् सकृदवदायोपरि द्विस्त्वा तदुपरि हिरण्यशकलं दत्वा सकृदभिघा
र्य विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयात् इदं विश्वेभ्यो देवेभ्यः ॥ ततः स्विष्टकृदार्थं
स्रुव उपस्तीर्य हिरण्यशकलं दत्वा त्र्यंगेभ्यो द्विर्द्विरवदाय स्रुवे कृत्वा चरुद्वा

ब्रसकृत्सकृदवदाय हिरण्यशकलमवधाय द्विरभिघार्य अग्नये स्विष्टकृते स्वाहेति
जुहुयात्। इदमग्नये स्विष्टकृते इति त्यागः। असद्भिर्वदानपक्षे प्रधानावदानशे
षात् स्विष्टकृद्धोम इति विशेषः। ततो महाव्याहृत्यादि प्राजापत्यान्तान् नवाहुती
र्हुत्वा त्वारहेहुत्वा संस्रवं प्राश्य ब्रह्मणे पूर्णपात्रं दक्षिणां दद्यात्। ततः स्रूत्यंत
रोर्नू पंचविंशति ब्राह्मणभोजनं दद्यात्। अश्वेव पशोः सव्यपार्श्वसक्थिस्थापनम् व
रदिने अन्वष्टकाकर्म पूर्ववत्। माघ्या ऊर्ध्वं कृष्णाष्टम्यां ततो या प्राजापत्याष्टका
यया प्रथमाष्टका। तत्र कालशाकचरुः सिद्ध एव आसादे सादयेत्। आसादनका
ले प्रोक्षणकाले प्रोक्षेत्। ततो प्रधानयागः स्वाने प्रजापतये स्वाहेति कालशाकं जु
हुयात्। शेषं समानम्। कालशाकालाभे वास्तुकं वा। अन्ये घुः पूर्ववदन्वष्टकाक
र्म। प्रोष्ठपद्या ऊर्ध्वं कृष्णाष्टम्यां चतुर्थी अपश्वाशाकाष्टका प्रथमाष्टकावत्।

एतावान्विशेषः स्थालीचरुद्वयं तंडुलानंतरं कालशाकं मांसौदयेत्। कालशाक
चरुसंबद्धमांसादनादिहोमांतं कर्म प्राचीनावीती दक्षिणामुखः कुर्यात्। अ
न्यच्चयज्ञोपवीती पूर्वामुखः कालशाकचरुसंबद्धं कर्म कृत्वा उदकमुपस्पृश्ये
त्। अपूपहोमस्थाने पित्र्याः स्वाहेति शाकचरोरेकामाहुतिं जुहुयात्। प्रात
रन्वष्टकाकर्म पूर्ववत्॥ ॥ अथातः शालाकर्मेत्र अष्टकाकर्मानंतरं
यतः आवसथ्याधानादीनि शालाग्नौ साध्यानि अनुविहितानि। शालाकरणं वो
क्तं अतो हेतोः शालाकर्म शालायां गृहस्यक्रियाव्याख्यते इति सूत्रशेषः॥
पुण्याहे शालां कारयेत्॥ पुण्ये शुभं मलमासबालवृद्धास्तामितरौ शुक्रगु
वादित्यसिंहस्थगुरुत्रयमासदिनक्षयहकूरग्रहाक्रांतं तमुक्तेन वज्रादिदोष
रहिते ज्योतिः शास्त्रोदितगृहारंभविहितमासपक्षतिथिवारनक्षत्रयोगकर

णमुहूर्ते चंद्रतारालग्नादिगुणान्वितं अहः पुण्याहं तस्मिन् पुण्याहे शालां गृहं का
रयेत् निर्मापयेत् । पुनः पुण्याहग्रहणं उदगयनशु क्लपक्षयोरनियमार्थं शा
लां कारयेदित्युक्ते तद्गृहशालाकरणं देशमन्तरेण न संभवति । इति सामान्यतो देशे
प्राप्ते यन्नाम्नानं स्वशाखायां पारकामरोधियत्र । विद्वद्भिस्तदनुष्ठेयमग्निहो
त्रादिकर्मवदिति वचनात् । पारस्कराचार्येणानुक्तमपि गोभिलगृह्यसूत्रो
क्तं देशविशेषं अविरोधात् अपेक्षितत्वाद्वात्र निखामः । तद्यथा । कीदृशे शा
लां कारयेत् । समे लोमशे अविभ्रंशिनि प्राचीनप्रवणे उदक्प्रवणे वा अ
क्षीराद्रुकंटकाकटुकौषधिवति विप्रस्य गौरपांसौ क्षत्रियस्य लोहितपांसौ
वैश्यस्य कृष्णपांसौ वास्तुशास्त्रमते वैश्यस्य पीतपांसौ शूद्रस्य कृष्णपांसौ
स्थिरायामाते एकवर्णे अशुष्के अमरूषने । अमरीमरु निर्जले देशे ब्रह्मवर्चसका
मस्य दर्भै [illegible] युक्ते बलकामस्य बृहत्तृणैः पुत्रपशुकामस्य मृदुतृणै

शादासंमितेमंडलाद्वीपसमितेवा स्वयंखातस्य भवति वायन्नकामस्य बलकामस्य

चप्रागद्वारं पुत्रपशुकामस्योदग्द्वारं सर्वकामस्य दाक्षिणद्वारं तंप्रत्यकद्वारं मुख्य

द्वारसन्मुखात् द्वाररहितांपूर्वादितः प्रदक्षिणक्रमेण अश्वत्थवटप्लक्षवटौदुं

बरवृक्षवर्जितां कारयेत् भवनस्य पूर्वादौ वटोदुंबराश्वत्थप्लक्षाः सार्थकामिकाः वि

परीतास्त्वसिद्धिदा इति मत्स्यपुराणे। तथा कंटकीक्षीरवृक्षा अश्वत्थः सफलो

द्रुमः आर्य हानिं प्रजाहानिं कुर्वन्ति क्रमशस्तथा। नाछिंद्याद्यदि तानन्यानंतरस्था

पयेत् शुभान्। पुन्नागशोकबकुलशमीतिलकचंपकान्।। दाडिमीपिप्पलीद्राक्षा

तथा कुसुममंडपान् जंबीरपूगपनसद्रुममंजरीजातीशरेजत्सतपत्रिकमल्लिकाभिः

यन्नालिकेरकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति। तस्याग्र

वटमभिमंत्र होमं ... अच्युताय भौमाय स्वाहेति। अत्रैव विरमित्येकवचनं अन्येषां त्रया

बु४

२५६

15b

णामुपलक्षणार्थं। संस्कार्यत्वाविशेषात्तद्ग्रहं स्तंभाष्टौ इति वदेकवचनं। चत्वारोऽवटाः कुत इति चेन्न
। यवलग्नस्य स्तंभशालारूपस्य चतुर्षु कोणेषु चत्वारो मूलस्तंभा भवन्ति ते च शिलासु उच्छ्रीय
न्ते। शिलाश्च अवटेषु निधीयन्त एव चत्वारः। यतश्चतुर्षु कोणेषु आग्नेयादिषु चत्वारो वटा भवन्ति तेषु
व भवन्त्येन होमः। स्तंभमुच्छ्रयति इमामुच्छ्रयामीत्यादि। स्तंभं उच्छ्रयति उत्थापयति अवटेष्विति ना
तोऽत्यर्थः। केन मंत्रेण इमामुच्छ्रयामीत्यादिनाग्नेयोवसात इत्यन्तेन चतुरः। ततोऽनेनैव मंत्रेण
नैर्ऋत्यावरवायव्यावरैशान्यावटे चतुरः स्तंभानुच्छ्रयति। उत्तरग्रहेषु चतुर्षु कोणेषु शिला
न्यास एव भवति। एभिर्मंत्रैः। अपघ्नते शालां प्रविशति। अभ्यन्तरतोऽग्निमुपसमाधाय दक्षि
णतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वा ब्रह्माणमामंत्रयते
ब्रह्मन्प्रविशामीति ब्रह्मानुज्ञातः प्रविशति ऋतं च प्रपद्ये शिवं प्रपद्ये इति अभ्यन्तरतः॥
अर्द्धनिष्पन्नायां शालायां मध्ये अग्निमावसथ्यं उपसमाधाय पंचाभूसंस्कारपूर्वकं पाकं

ने२

कौंपाथ

स्थापा१

स्थ

तं

श्रपयित्वा दक्षिणतो ब्रह्माणमुपवेश्य उत्तरतः उदपात्रं अग्नेरुत्तर प्रदेशे उदपात्रं जलपूर्णं ताम्र

दिभाजनं प्रतिष्ठाप्य निधाय अत्र पुनः ब्रह्मोपवेशनवचनं उदपात्रं प्रतिष्ठापनावसरज्ञापना

र्थं स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा ब्रह्माणं क्वचित् आमंत्रयते संबोधयति। कथं ब्रह्म

न्प्रविशामीति आमंत्रितेन ब्रह्मणा प्रविशत्यनुज्ञातः प्रसूतः प्रविशति॥ शालां प्रपद्यते।

ऋचं प्रपद्ये शिवं प्रपद्य इति मंत्रेण आज्यसंस्कृत्येहरतिरित्या ज्याहुती हुत्वा परानुहो

आज्यसंस्कारं तन्त्रं पर्युक्षणांतं इहरतिरिहरित्यादि रिहस्वधृतिः स्वाहेत्येकां उपसृजन्मिस्मि

दि सुदीधरत्स्वाहेति द्वितीयामाहुतिं जुहोति। वास्तोष्पत इति चतसृभिः त्र्यंबकं अग्निरपरां ब्रह्मचंव

तस्व आज्याहुती र्जुहोति। अशनानेकाः स्थसंभाराः जोप्या उदुम्बरपलाशानि समुराणि शा

द्वालं गोमयं दधि मधु घृतं कुशान्यवान् आसनोपस्थानेषु प्रोक्ष ततः स्विष्टकृदादि संस्र

ततश्चो दारावास्य भागोऽस्थालीपाकस्य जुहोति अग्नेर्मित्रामित्सादिभिः षड्भि मंत्रैः प्रतिमंत्रं

षडाहुतीर्जुहोति॥ २ चरोः १

१५७॥ वप्राशनावसानेकांस्येकांस्यमयेपात्रेसंभारानबध्नमाणेनर्नुप्यकृत्वाक्षौदुम्बरपत्राणिसुसुरा
णिसक्षीराणिशाड्वलदूर्वांगोमयंगोशकृत्दधिमधुघृतयवान्निगदव्याख्याता॥ तान्
आसनानिचउपस्थापनानिच।आसनोपस्थानानिचवास्तुशास्त्रोपदिष्टानिप्रोक्षेत्।
अभिषिंचेत्।तत्रआसनानिनागदंतादीनि।स्थानानिदेवतास्थानानि।पूर्वसंधावभि
मृशतिश्रीश्चत्वेति।शालायाःपूर्वसंधिप्रदेशंआलभते।श्रीश्चत्वेतिमंत्रेण।एवंदक्षि ॥१५॥
णेसंधौयज्ञस्यत्वेतिमंत्रेणतथैवपश्चिमसंधौअन्नंचत्वेति॥तद्वदुत्तरेऊर्क्चत्वेति।निष्क्र
म्यदिशउपविश्यपते।एवंशालायाःपूर्वादिसंधिषुअभिमर्शनंकृत्वाबहिर्निष्क्रम्यदिशः
प्राचीप्रमुखाश्चतस्त्रः।केतावमशुके [illegible] तावेत्यादिभिर्तुभिर्मंत्रैः।प्र दक्षिणक्रमे
णउपतिष्ठते।स्तोति।निष्ठितांप्रपद्यतेधर्मस्थूणेतिनिष्ठितांनिर्मितांप्रपद्यते
प्रविशति।धर्मस्थूणेत्यादिनासंतुसर्वेतइतितेनमंत्रेण।ततोब्राह्मणभोजनमि

तिसूत्रार्थः ॥ ॥ अथ प्रयोगपद्धतिर्लिख्यते ॥ ॥ अथ शालाकर्मोच्यते ॥ तत्र पुण्याहे मा
तृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा पूर्णाहुतिवदाज्यं संस्कृत्य स्तंभस्थानावटेषु चतु
र्षु प्रथमवटमाग्नेयकोणादारभ्य अच्युताय भौमाय स्वाहेत्यनेन मंत्रेणैकैकामाहुतिं जु
हुयात् । इदमच्युताय भौमायेति प्रत्याहुतित्यागः । अथ होमक्रमेण अवटेषु स्तूणीशि
लास्थापयित्वा तदुपरि इमामुच्छ्रयामीत्यादिना मंत्रेण आयोवसानइत्यंतेन इमामुच्छ्र
यामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनां । इहैव ध्रुवां निमिनोमि शालां क्षेमे
तिष्ठतु घृतमुक्षमाणाः अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय । आ
त्वा शिशुराक्रंदत्वा गावो धेनवो वाश्यमानाः ॥ आ त्वा कुमारस्तरुण आ वत्सो ज
गदैः सह । आ त्वा परिस्रुतः कुंभ आ दध्नः कलशैरुप क्षेमस्य पत्नी बृहती सुवासा रयिं नो धे
हि सुभगे सुवीर्यम् । अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव । अभि नः पूर्यतां रयिरि

त्व

गा

१५८

तत्र ःस्वाहा

दमनुश्रेयोवसानं इत्यनेन मंत्रेण होमक्रमेण वचतुर्षु अवरेषु वनुरस्तंभानु कुर्यात्
मिनोतिस्तंभाभावे अनेनैव मंत्रेण प्रत्यवरं शिलां स्थापयेत्॥ अर्द्धनिष्पन्नायां शाला
यां मध्यप्रदेशे भूसंस्कारपूर्वकं आवसथ्याग्निं स्थापयित्वा ब्राह्मणमुपवेश्य उत्तरत
उदपात्रं प्रतिष्ठाप्य प्रणीताप्रणयनं विधाय कुशकांडकापूर्वकं चरुं श्रपयित्वा प्रोद्व
त्युत्पवनान्ते बहिर्निष्क्रम्य द्वारसमीपे गृहाभिमुखः स्थित्वा ब्राह्मन्प्रविशामीति ब्र
ह्माणमामंत्र्य प्रविशस्वेति ब्राह्मणेनानुज्ञातः ऋतं च प्रपद्ये शिवं प्रपद्य इति मंत्रेण शा
लां प्रविशेत्॥ अथ स्वासने उपविश्य उपयमनकुशानादाय समि दाधानपर्यु
क्षणानि कृत्वा इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहेति आज्याहुतिं जुहुया
त्॥ इदमग्नये त्यागं विधाय॥ उपसृजं धरुणं मात्रे धरुणो मातरं धयन् रायस्पोषम
स्मासु दीधरत् स्वाहेति मंत्रेण पुनर्जुहुयात्॥ इदमग्नये॥ अपराश्च तस्र आज्याहुतयः

१५

तं५

वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो
भव द्विपदे शं चतुष्पदे स्वाहा। इदं वास्तोष्पतये। वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभि-
रश्वेभिरिन्दो अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुषस्व स्वाहेति द्वितीयां इदं
वास्तोष्पतये। वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या पाहि क्षेम उ-
त योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहेति तृतीयां इदं वास्तोष्पतये। अमीवहा वा-
स्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः स्वाहेत्यनेन चतुर्थीं जुहुयात्।
इदं वास्तोष्पतय इति च तस्य पुत्यागः। ततः आघारावाज्यभागौ हुत्वा वरुणाग्निमिं-
द्रं इत्यादिभिः षड्भिर्मन्त्रैः षडाहुतीर्हुत्वा। अग्निमिन्द्रं बृहस्पतिं विश्वांश्च देवानुपह्वये।
सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा। इदमग्नये इदमिन्द्राय बृहस्पतये वि-
श्वेभ्यो देवेभ्यः सरस्वत्यै वाज्यै च। सर्पदेवजनान्त्सर्वान्हिमवन्तं सुदर्शनं वसूं-

श्चरुद्रानादित्यानीशानं जगदादैः सह। एतान्सर्व्वान्प्रपद्येहं वास्तुमे दत्त वाजिनः स्वाहा। इदं सर्व्वदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्यो आदित्येभ्य ईशानाय जगदेभ्यश्च। पूर्व्वाह्णमपराह्णं चोभौ मध्यंदिनासह। प्रदोषमर्द्धरात्रं च व्युष्टां देवीमहापथां। एतान्सर्व्वान्प्रपद्येहं वास्तुमे दत्त वाजिनः स्वाहा। इदं पूर्व्वाह्णायापराह्णाय मध्यंदिनाय प्रदोषाय अर्द्धरात्राय व्युष्टायै देव्यै महापथायै च। कर्त्तारं च विकर्त्तारं विश्वकर्म्माणमोषधीश्च वनस्पतीन्। एतान्सर्व्वान्प्रपद्येहं वास्तुमे दत्त वाजिनः स्वाहा। इदं कर्त्रे विकर्त्रे विश्वकर्म्मणे ओषधिभ्यो वनस्पतिभ्यश्च। धातारं च विधातारं निधीनां च पतिं सह। एतान्सर्व्वान्प्रपद्येहं वास्तुमे दत्त वाजिनः स्वाहा। इदं धात्रे विधात्रे निधीनां पतये वास्तोनः शिवमिदं वास्तुमे दत्तं ब्रह्म प्रजापती। सर्व्वाश्च देवताः स्वाहा। इदं ब्रह्मणे प्रजापतये सर्व्वाभ्यो देवताभ्यश्च स्थालीपाकेन स्विष्ट

स्था

कृहोमं विदध्यात्। ततो महाव्याहृत्यादि प्राजापत्यांतां नवाज्याहुतीर्हुत्वा संस्रवप्राशनं
कृत्वा ब्रह्मणे दक्षिणां दत्वा कांस्यपात्रे स[illegible]क्षीराण्यौदुंबरपात्राणि दूर्वां गोमयं दधि मधु घृ
तं कुशयवान् संभारान् कृत्वा आसनाभिनामदंभादिस्थानानि उपस्थानानि देवतास्था
नानि प्रोक्षेत्तैः संभारैः। अथ पूर्वे संधौ श्रीश्च त्वा यशश्च पूर्वे संधौ गोपायेतामिति मंत्रे
णाभिमर्शनं करोति। ततो दक्षिणे संधौ यज्ञस्य त्वा दक्षिणा च दक्षिणे संधौ गोपायेतामिति
अनंतरं पश्चिमे अन्नं च त्वा ब्राह्मणश्च पश्चिमे संधौ गोपायेतामिति। अथोत्तरे ऊर्क् च त्वा
सूनृता चोत्तरे संधौ गोपायेतामिति। अथ गृहान्निष्क्रम्य वक्ष्यमाणैर्मंत्रैर्यथालिंगं दिश
उपतिष्ठते। केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै केतादित्यः सुकेता तौ प्रपद्ये
ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेतामिति मंत्रे प्राचीं दिशमुपस्थाय [illegible] दक्षिणतो गोपाय
मानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानं रात्री रक्षमाणा ते प्र

स

१६०

अस्त्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति (चंद्रमका ३ तु)

पद्येताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेतामिति दक्षिणां दिशमुपस्थाय पश्चिमां दी
दिनिश्च मा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां
नमोऽस्तु तौ मा पश्चाद्गोपायेतामिति मंत्रेणोपस्थाय अथोत्तरां अस्वप्नो वायुरनद्राणस्तौ
प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेतामिति मंत्रेण उपतिष्ठते। ततः समाप्तायां शा
लाशायां ज्योतिर्विदुपदिष्टे पुण्येऽहनि प्रविशेन्नववेश्म निरुक्ति नवनात्॥ मातृपूजामा
भ्युदयिके विधाय ब्राह्मणैः कृतस्वस्त्ययनो मंगलतूर्यगीतशांतिपाठनेस. नल. कश
ब्राह्मणपुरस्सरः शुक्लमाल्यानुलेपनस्तादृशकलत्रपुत्रपौत्रादिसमेतः। सुशकुन
सूचिताभ्युदयः। तोरणाढ्यां शालां द्वारेण प्रविशति ध्रुवेस्थूणाराज ८ श्रीस्तू
पमाहो राज्ञे द्वारफलके रंद्रस्य गृहा वसुमंतो वरूथिनस्तानहं प्रपद्ये सह प्रजयास
ह पशुभिः यन्मे किंचिदस्त्युपहूतः सर्वगणः सखायः साधुसंवृतः तां त्वा शालेऽरि।

१६ स्तु व

स्त्वं वीराग्न्हा नः सन्तु सर्वे तत्र इत्यनेन प्रविशेत् । ततो ब्राह्मणभोजनम् । इति शाला
कर्म्म ॥ अथातो मणिकाविधानं ॥ अथ शालाकर्म्मानन्तरं यतः शालायां मणिके नभ
वितव्यं अतः मणिकाविधानं व्याख्यास्यते । उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा
कुशानास्तीर्य तत्रानरिष्टकांश्चान्यानि वापि मंगलानि तस्मिन्निनोति मणिकं उं स
मुद्रोसीति । तत्र शालायाः उत्तरपूर्वस्यां ऐशान्यां दिशि यूपवत् तत्र अभ्यादानपरिलेख
पूर्वकं अवटं मणिकं नुन्धावस्थानं यथाप्रमाणं खात्वा वा निखाय ततः प्राङ्गुदीकृतपोत्खा
वटस्योपरि प्रागग्रान्दर्भान्कुशानास्तीर्य तत्र त्वाश्वत्थात नयवान् अरिष्टकान् अरि
ष्टकफलानि अन्यानि च मंगलानि सद्धिवृद्धिसिद्ध्यर्थकादीनि उप्य चकारः समुच्च
यार्थः तस्मिन्नवटे मणिकं उदधानी निनोति स्थापयति । समुद्रोसि नभस्वानार्द्र
दानुः शंभूर्म्मयोभूरित्येतावता मंत्रेण । अप आसिंचत्यापो रेवतीः तयन्त्वा हि वस्वः

कर

१६१।

ता।

क्रतुं च मद्रं विम्रथो मर्तं चारायश्चास्य श्चीपत्यस्य पत्नी: सरस्वतीत द्रुणेनेव यो श्च इति
तस्मिन्माणिके अपउदकं नघादा: अ श्रद्धाहृतं आसिंचति आपो रेवती रिति मंत्रेण। आपो
हि ष्ठेति चतिसृभि: आपो हि ष्ठा मयो भुव इत्यादि त्रिसृभि: स्त्र मित्रैर्ग्रि: पुनर्मणिके सद
दप आसिंचति ततो ब्राह्मणभोजनं॥ ॥ अथ पद्धति:॥ ॥ तत्र तो मणिकावधान निमि
त्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अग्नेरीशानप्रदेशे देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां आददे नार्यसीति मंत्रेणाभिमादाय इदमहं रक्ष
सां ग्रीवा अपि कृन्तामीत्सवरं भाडानुमानं परिलिख्य उदक स्पर्शं कृत्वा खात्वा प्रांशु:
पांसून पास्य कुशानास्तीर्य अक्षतानरिष्टकानक्षाद्धि हरिद्रा दूर्वादिमंगलद्रव्यं
निक्षिप्य तदुपरि समो द्रोसि नमस्वानाद्रदानुः शर्मभू रित्येतावता मंत्रैर्मणिकम
वटे अवधाय आपो रेवती: त्वयन्नाहि बस: क्रतुं च मद्रं विम्रथा मर्तं नारायस्य स्या।

१६१

स्वपत्यपत्नीः सरस्वतीत द्रुणते वयोधाउत्यनेन मंत्रेण आपो हि ष्ठा मयोभुव इत्यादि ऋचेन च
मणिके अपआसिंचति ब्राह्मणमेकं च भोजयेदिति मणिकावधानम्। ॥ अथातः शीर्षरो
गभेषजं। अथ मणिकावधानानन्तरं शिरोरोगवान् किंचित्कर्म कर्तुं न शक्नोति। अतः शी
र्षणि मूर्द्धनि रोगः पीडा शीर्षरोगः तस्य भेषजं प्रतीकारः व्याख्यास्यते। पाणी प्रक्षाल्य
अनुवीविमार्ष्टि चक्षुर्भ्यां ॐ श्रोत्राभ्यां गोदानाच्छुबुकाद् अधियक्ष्मं ॐ शीर्षण्यं ॐ ररराटाद्विवृह
मीमें इति। यदि स्वस्य परस्य वा शिरसि पीडा भवति। तत्र पाणी स्वकीयौ हस्तौ प्रक्षाल्य अद्भिरव
नेनिज्य अनुवीताभ्यां पाणिभ्यां विमार्ष्टि प्रोंछति। अन्यस्य वा स्वयं करोति चक्षुर्भ्यां ॐ श्रोत्राभ्यां
गोदानाच्छुबुकाद् अधियक्ष्मं ॐ शीर्षण्यं ॐ ररराटाद्विवृहामीमम् इत्यनेन मंत्रेण। अर्द्धं वेद व
भेदकं विनूपोत्नोमहायशः अथो चित्रपक्षः शिरोमास्याभितापसौ रिति। अर्द्धं वेतरां शी
र्षे। व्यथते। तदा पूर्ववत् पाणी प्रक्षाल्य दक्षिणेन पाणिना यदा शिरसो दक्षिणं भा

ह्न श्चेत्पर्वे २

ग्रि५

१६२

गेरुकृतदा दक्षिणं वामे वामांश्च वमेद कवि नृपांत्स्वतपहोमहा २ यशः अथोचित्रपद्दंशि
रोमास्यामितापसीरित्यनेनमंत्रेण एकां मुवंविमार्ष्टि तेभ्यो ह्येवमवतिहि स्फुरं एवं कृते दे
म्यः शिरोरोगरहित एवमवति ॥ ०॥ उत्तं परिहोमहः । उत्तूलस्य । दुर्विनीतस्य दा
सस्य परिसमंतान्नमेहः मेहतं कर्म कथ्यते । यथा । स्वपतो नीव विषाणे स्वं मूत्रमासिच्या
पसलविचिः परिषिंचन्परीयान्वारित्वागिरेरहं परिमातुः परिस्वसुः परिपित्रोश्च भ्रात्रो
श्चसखिभ्यः परिददाम्यहं । उत्तूलपरिमीढोसि परिमीढः क्वगमिष्यसीति । ततं यदा सदा
सः स्वपिति तदागतादोःपशो नीवत विषाणे थ्वं गे स्वं मूत्रं आसिच्य कृत्वा तस्य स्वपतः अ
पसलविश्र पसव्येन अप्रादक्षिण्येन विषाणे स्थं मूत्रं परिसमंतात्सिंचन् उत्तूलन्विः
त्रीन्वारान्परीयान् उपरि मंत्रमेतं परित्वागिरेरहं परिमातुः परिस्वसुः परिपित्रो
श्च भ्रात्रोश्च सखिभ्यो विसृजाम्यहं । उत्तूल परिमीढोसि परिमीढः क्वगमिष्यसी

१६३

त्यतेनमंत्रेण। सयदिमत्ता स्याद्द्वावाग्निमुपसमाधाय हुताक्तानि कुशेंडूानि तु हुयात्
परित्वा कलनो कलं निवर्तं इर्वीरुधरं इपाशेनसित्वामहयमुक्ता। थान्यमानयेदिति
तेभ्यो ह्येवमवति। स दासः यदि यस्मिन्कर्मणि कृतेपि मत्तः स्यात् स्वेछया विचरेत् तत दा
तद्वश्यार्थमिदं कर्म कुर्यात्। यथा मूसंस्कारपूर्वकं दावाग्निं वन दहनं स्थापयि
त्वा ब्रह्मोपवेशनादिपर्युक्षणांते आघारावाज्यभागौ महाव्याहृतिसर्वप्रायश्चित्तप्राजा
पत्यस्विष्टकृदन्ताश्चतुं शाकुती हुत्वा कुशेंडूानि तु हुयात्। कुशानामिंडूानि कुंड
लाकाराणि हुताक्तानि त्रीणि परित्वा कलनइत्यादिनाग्रथान्यमानयेदित्यंतेन मंत्रे
ण सकृदेव तु हुयात्॥ इदमिंडूायेति त्यागः। ततः संस्रवप्राशनं ब्रह्मणे दक्षिणादान
तं कुर्यात्। तेभ्यो ह्येवमवति। अस्मिन्कर्मणि कृते हि स्फुटं तेभ्यः वश्यः दास एवमवति
संपद्येत इत्युक्तं दासवश्यकर्म॥ अलगवः स्वर्ग्यः पशव्यः पुत्रो धन्योयशस्य

२६३

आयुष्यः ॥ अथ स्वर्गादिकामस्य शूलगवाख्यं कर्म यागविशेषमनुविधास्यन्नाह शू-
लगव इति स च स्वर्ग्यः ॥ स्वर्गाय हितः पशुभ्यो हितः पुत्रेभ्यो हितः ॥ धनाय हितः ॥ यशसे हि-
तः ॥ आयुष्यः ॥ आयुषे हितः ॥ अयमर्थः ॥ यदा यजमानः स्वर्गपशुपुत्रधनयशआयु-
षामन्यतमकामो भवति तदानेन शूलगवाख्येन यागेन यजेत अनेककामानां
युगपदुत्पत्त्यसंभवात् ॥ औपासनमरण्यां हृत्वा वितानेऽसाधयित्वा रौद्रं पशु-
मालभते सांडं औपासनमावसथ्याग्निं अरण्यमवर्त्य विहृत्वा तत्र वितानं त्रेताग्निं वि-
न्यासं साधयित्वा शूल्कोक्तमार्गेण विरच्य रौद्रं रुद्रो देवतास्येति रौद्रं स रौद्रं
पशुं ॥ छागं आलभते संज्ञपयति ॥ कथंभूतं सांडं सह अण्डाभ्यां वर्त्तत इति सांडः तं सां-
डं अनपुंसकमित्यर्थः ॥ गौर्वा शब्दात् वा शब्दः पक्षव्यावृत्तौ नैव छागः ॥ पशुरौ-
द्रः ॥ अपि सांडो गौः ॥ कुतः शब्दात् ॥ शूलगव इत्येतस्मात् शब्दात् ॥ वपा॰ श्रपयित्वा

कौ॰

२६३

स्थालीपाकमवदानानि । चरुं रुद्राय वपामन्तरिक्षाय वसा० स्थालीपाकमिश्राण्यवदाना-
नि जुहोति वपां पक्त्वा स्थालीपाकं अवदानानि च हृदयादीनि सहैव श्रपयित्वा । न नु पशुतं-
त्रे विहत्य शामित्रेऽग्नौ अवदानश्रपणं वपाश्रपणं चाहवनीये दृष्टं अत्र तन्माभूदिति व-
पा० श्रपयित्वा स्थालीपाकमवदानानि चेति सह श्रपणमुच्यते । रुद्राय वपामन्तरिक्षाय
वसां तत्र रुद्राय वपां जुहोति । अन्तरिक्षाय वसां जुहोतीत्यध्याहारः । स्थालीपाकमिश्रा-
ण्यवदानानि [illegible] जुहोत्यग्नये रुद्रायेत्यादि । अवदानहो-
मावसरे हृदयादीन्यवदानानि स्थालीपाकेन चरुणा मिश्राणि संयुतानि जुहोति । अग्नौ
प्रज्वलिते । नवकृत्वः अग्नये स्वाहेत्यादिभिर्वक्ष्यमाणैर्नवभिर्मन्त्रैः । अग्नये रुद्राय पश-
र्वाय पशुपतये उग्राय अशनये भवाय महादेवायेशानायेति । यथामन्त्रं त्यागः । वनस्प-
ति स्विष्टकृदन्तैङ्गद्धारणं । वनस्पतिश्च स्विष्टकृच्च वनस्पतिस्विष्टकृतौ तयोर्वनस्पति

दि०१

+ स्विष्टकृद्धोमश्च सर्वावदानपत्नेभ्यो गोभ्यः । असर्वावदानपत्नेतेभ्य एवावशिष्टेभ्यः । अत्र सूत्रे व्याघारण
मेवनिवद्धं । तत्र द्रव्यदेवतापरिज्ञानार्थं सर्वे पशुप्राकृतिकतामीषोमीयोमपशावदर्शनात् बलाद् व्याघ्रिशा

स्विष्टकृतोरंते व्याघारणं कर्त्तव्यमिति शेषः । तत्तु व्याघारणं दिशां वसया कुर्यात् । तत्र वन
स्पतिहोमः स्विष्टकृद्धोमादर्वीकृपृषदाज्येन भवति पशौ तथा दृष्टत्वात् । व्याघारणान्ते
पत्नीः संयाजंतो द्राण्यै रुद्राण्यै शर्वाण्यै भवान्यै । अग्निं गृहपतिमिति व्याघारणं स्वदिशा
मभिघारणस्याज्यं तेऽवसाने पत्नीः वक्ष्यमाणाः संयाजयंति जायान्यापश्वंगो न कुर्वंद्रं
द्राण्यै इत्यादिभिः पंचभिर्मंत्रैः स्वाहाकारांतैः प्रतिमंत्रं । लोहितं पालाशेषु कूर्चेषु रुद्रा
य सेनाभ्यो बलिं हरति । ततो महाव्याहृत्यादि होमान्ते लोहितं । लोहितं तस्यैव पशोः
रुधिरं पालाशेषु पलाशपत्रेषु कूर्चेषु आसनेषु प्राक्संस्थेषु उदक्संस्थेषु वा रुद्राय
देवतायै सेनाभ्यः रुद्रसेनाभ्यो बलिं हरति उपहारं ददाति यास्ते इत्यादिभिः षड्भि
र्मंत्रैः । षट्सु पालाशकूर्चेषु प्रतिमंत्रं प्रत्येकं । ऊवध्यं लोहितलिप्तमग्नेः प्राक्स्वत्वधो वा
निखनति । ऊवध्यं पुरीषाधानं पदातिप्रसिद्धं लोहितेन रक्तेन लिप्तं संस्पृष्टं लोहि

बा२ दृ१

हितलिप्तंअग्नौश्री हवतीयेप्रास्यतिअग्निपति। वा। अथः भूमौ निखनति निधा ति। अनुवा
तं पशुमवस्थाप्य रुद्रं रूपतिष्ठते प्रथमोत्तमाभ्यां वानुवाकाभ्यां। अनुवातं वातमनु लक्षी
कृत्य वाताभिमुखमित्यर्थः। पशुं अव शिष्टं पशुशरीरं अवस्थाप्य निधाय रुद्रैः
नमस्त इत्यध्यायेनाम्नातैः उपतिष्ठते। यद्वा प्रथमोत्तमाभ्यां अनुवाकाभ्यां मंत्रसमुदा
याभ्यां तत्र प्रथमोनुवाकः नमस्त इत्यारभ्य षोडशर्चः। उत्तमोऽतिमद्वायअंधस इ
त्यारभ्य विंशतिकंडिकात्मकः। नैतस्य पशोर्ग्राममः हरन्ति। एतस्य रौद्रस्य पशोर्मांसं
संग्रामं न हरंति ग्रामं प्रति न नयन्ति याज्ञिकाः किंतु अरण्य एवोत्सृजंति। एतेनैव गो
यज्ञो व्याख्यातः। एतेनैव शूलगवेनैव यज्ञेन गोयज्ञः गोयज्ञनामधेयो यागः। व्या
ख्यातः कथितः। तत्र द्रव्यविशेषमाह। पायसेनानर्थलुप्तः। पायसेन पयसा संसिद्धे
नैरण्ण। अनर्थलुप्तः। शूलगवप्रधानदेवताहोममलोपरहितः। तस्य तुल्यवपामौ द्वे
च

१६५

165

त्विणा तस्य शूलगवपशोः वयसा तुल्यं समं वयः तस्माद्यतिक्रान्तकालः यस्य गोः स

तुल्यवयागो गौः पुंगवः॥ दक्षिणापरिक्रयद्रव्यं ब्राह्मणे देयमिति सूत्रार्थः॥ अथ त्रयो

गः॥ ॥ स्वर्गपशुपुत्रधनयशआयुःकामानां शूलगवपशुबंधो विहितः॥ तत्र मांसपू

जापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा औपासनाग्निमादायारण्यं गच्छेत्। तत्र पशुचोदेशगा

र्हपत्यायतनं सप्तविंशत्यंगुलं वृत्तं विधाय तन्मध्यनिखातशंकोः अष्टौ एकादश द्वा

दश वा स्वकीयानि पदानि प्राचीं गत्वा तदंते शंकुं निखाय तयोः शंक्वोः उभयतः पाश

रज्जुं प्रसार्य आहवनीयायतनं खंयेत्। तत यथा। यावत्प्रमाणा रज्जुः स्यात्तावद्देवाग

मो भवेत्। आगमार्द्धे च शंकुः स्यात् तदर्धे च निर्मथनमिति शुल्बवचनानुसारेण। अ

ग्न्यागारस्य नाभ्याकारः पूर्वस्मात् शंकोः द्वादशांगुष्ठपर्वपरिमितं देशं पूर्वतः पश्चिमत

श्च परित्यज्य तत्र शंकुस्थानं सूत्रादीनां कथयित्वा। अपरागमार्द्धे निर्मंथनं आकर्षणा

२

१६५

खातः। न४

सूत्रगुणमाप्य पूर्वार्द्धापरार्द्धे तयोः शंक्वोः तस्या रज्वोः पाशद्वयं निक्षिप्य निरंथन
नगुणेन दक्षिणतआकृष्य शंकुस्थाने शंकुं निखनेत्। ततस्तामेव रज्जुं उत्तरतो नी
त्वा तथैवाकृष्य शंकुस्थानेऽपरं शंकुं निखनेत्। अथ रज्वाः पाशौ परिवर्त्य पूर्ववन्
निरंथनगुणेन दक्षिणतआकृष्य शंकुस्थाने शंकुं निखाय पुनस्तामेव रज्जुं उत्तरतो
नीत्वा तथैवाकृष्य शंकुस्थाने शंकुं निहन्यात्। एवं चतुरस्रं चतुर्विंशत्यंगुल्यया
मविस्तारमाहवनीयायतनं संपद्यते ॥ ततो गार्हपत्याहवनीयान्तराले सम्मि
तां रज्जुमागमध्यतां चषड्गुणां सप्तगुणां वा विधाय षष्ठं अंशं सप्तमं वा तत्राधि
कं निक्षिप्य प्रसार्य त्रिगुणीकृत्य अपरं वितृतीये शंकुस्थानं ता नार्यमं कध्य
त्वा गार्हपत्याहवनीयमध्यगतयोः शंक्वोः पाशौः प्रतिमुच्य गार्हपत्यायतनात्।
दक्षिणतआकृष्य अपरावर्त्ततीयांके शंकुं निखाय तस्मिं शंकौ अन्यं रज्जुपा

166

१६६

शंप्रतिमुच्य षोडशांगुलानि परिमावृत्तं मंडलं वि[illegible]ख्य यतन्मध्यमशंकौ श्रत्वा
र्धांगुलानिन्युत्तरतः परित्यज्य तत्र पूर्वापरायतां मंडलसंमितां रज्जुं निपात्य रेखा
मुल्लिखेत्। एवं धनुषाकृति ह्रैक्षिणाग्न्यायतनं संपद्यते। अथ तामेव रज्जुं परिव
र्त्य आहवनीयादुत्तरतः वि[illegible]ततीयेनाकृष्य वितस्तीपस्थाने उल्लरं कुर्यात्॥
एवं वितानं साधयित्वा तेषु पंचभूसंस्कारान्कृत्वा गार्हपत्यायतने औपासनाग्निं स्था
पयित्वा मन्थनेन पात्रेण गार्हपत्यैकदेशमादाय आहवनीयायतने आहवनीयं
प्रणयेत्। तत एवमेव दक्षिणाग्निरखरे दक्षिणाग्निं आहवनीयस्य दक्षिणतो ब्रह्मास
नमास्तीर्य शूलगवेन रौद्रेण पशुना अहं यक्ष्ये तत्र मे त्वं ब्रह्मा भवेति ब्राह्मणं प्रार्थ
भवामीति तेनोक्तः। आसने उपवेश्य उत्तरतः प्रणीताः प्रणीय पवित्रच्छेदनानि पवि
त्रे प्रोक्षणीपात्रं वज्रं। अंतर्धानतृणं चेत्येतानि पंच आसादयेत्। ततः रज्जुं शंकुं शम्यां

१६६

अग्निं पुरीषाहरणं उदकं सिकताः आच्छादनवस्त्रं इत्यष्टौ उपकल्पयेत्। ततः पवित्रे कृत्वा
प्रोक्षणीः संस्कृत्य वस्त्रमंतर्द्धानत्वेणं च प्रोक्ष्य प्रोक्षणीं निधाय वस्त्रमादाय वेदिं मिमीते स्थापि
त आहवनीयस्य दक्षिणतः प्राचीं त्र्यरत्निं पश्चिमतश्चतुररत्निं उत्तरतस्त्र्यरत्निं पूर्वत
श्चरत्निं एवं परिमितां वेदिं त्रिभिः कुशैः परिसमुह्य उत्तरतो वज्रेणोत्करं परिलिख्य त
दंतिके वज्रं निधाय तदुपरि वेदित्वेणं कृत्वा सत्वरं वस्त्रमादाय दक्षिणहस्तेन सव्ये
पाणावाधाय दक्षिणेनालभ्य तेन वस्त्रेण पृथिवीमात्मानं वा संस्पृशेत् तावद्यामुदगग्रं त
त्रं निधाय तदुपरि तेन प्रहृत्य तदग्रेण पुरीषमादाय वेदिं प्रेत्य पुरीषमुत्करे कृत्वा पु
नस्तथैव प्रहृत्य पुरीषमादाय वेदिं प्रेत्य पुरीषमुत्करे वारद्वयं करोति। पुरीषकरणं
ते दक्षिणोत्तराभ्यां पाणिभ्यां उत्करे निन्यासं करोति। ततस्तृतीयं प्र हरणादि तथैव
चतुर्थं कृत्वा ब्रह्मन् पूर्वं परिग्रहं परि ग्रहीष्यामीत्यामंत्रिते तेन ब्रह्मणा परिगृहाण

प्र
गृहाणेत्यनुज्ञातः स्फ्येन वेदिं दक्षिणतः प्रा
परि २

पश्चिमत उदीचीं उत्तरतः प्राचीं परिगृह्णाति। अथ वेद्यां प्राचीस्तिस्रो लेखा उल्लिख्य अ
नामिकांगुष्ठाभ्यां दक्षिणप्रभृति तेभ्यो लेखाभ्यः पृथक्करणयक्तु पुरीषमादायोत्तरे प्रक्षि
प्य क्रमेण लेखाः संमृशति। तत्र वेदिमानादिपादार्थाः स्वकर्तृकाः मंत्ररहिताश्चा
न्यत्रिगंतराभावासमाम्नायाभावाच्च। अथाहवनीयस्य पुरस्तात् उत्तरवेदिस्थाने
पंचभूसंस्कारान्कृत्वा पूर्वोद्दिशं शंकुं निधाय द्वात्रिंशदंगुलाशम्यामादाय चतुरस्रां उ
त्तरवेदिं शम्यात्री [illegible] मिमीते। ततं [illegible]थैव शम्यया उत्तरवेदेरुत्तरतश्चात्वालं मिमीते त
था। पुरस्तादुदीचीं शम्यां निपात्य स्फ्येन तावतीं लेखामुल्लिख्य तथैव दक्षिणतः प्रा
चीं पश्चिमत उदीचीमुत्तरतः प्राचीं शम्यां निपात्य लेखामुल्लिखेत्। एवं चतुरस्रं श
म्याप्रमाणं चात्वालं संपद्यते। ततश्चात्वालमध्ये स्फ्याग्रेण प्रहृत्य पुरीषमादाय उत्तर
वेदौ शंकुसमीपे प्रक्षिप्य अग्निन्यासं विधाय पुनरेवं द्विरपरं प्रहृत्य पुरीषादानो

त्तरवेदिपुरीषप्रक्षेपाग्निन्यासान्न कृत्वा चतुर्थवेलायां आभ्याचात्वालं खात्वा यावता पुरी
षेण शम्यामात्री उत्तरवेदउर्द्धा पूर्यते तावत्पुरीषं पुरीषाहरणेन चात्वालादाहृत्य प्रक्षि
पेत् । एवमुत्त॰रवेदिं खवयित्वा मध्ये प्रादेशमात्रीं चतुःशानाभिं कृत्वा प्रोक्षणीभिः प्रोक्ष्य सि
कतामुपकीर्य वाससाच्छादयति । अथ गार्हपत्यपूर्णाहुतिवदाज्यसंस्कृत्य पंचगृहीतं गृ
हीत्वा आज्यप्रोक्षण्या आहवनीये सोपयमनी काधिश्रृते इध्मस्याग्नीनु घम्य उत्तरवेदि
समीपं गत्वा पुरस्तात्पश्चाद्दक्षिणत उत्तरतश्चोत्तरवेदिं प्रोक्षणीभिः प्रोक्षणीशेषमुत्त
रवेदेः आग्नेयकोणसमीपे बहिर्वेदि निनीय पंचगृहीतेनाज्येन नाभिं व्याघारयति को
णे हिरण्यं पश्यन् यथा पूर्ववद्दक्षिणस्यां स्रक्त्यां आघार्य उत्तरापरस्यां ततो दक्षिणपर
स्यां ततः पूर्वोत्तरस्यां मध्ये वा निघार्य शेषमाज्यं श्रुवमुद्यम्योर्द्ध्वमुत्क्षिपति ततो नाभि
पे तु दारवैः परिधिभिः परिदधाति यथा । प्रथमं उदगग्रेण पश्चिमतः । अनंतरं प्रागग्र

१६८

णे दक्षिणेन तः ततः प्रागग्रेणोत्तरतः ततो नाभिमध्ये गुलगुलु सुगंधि तेजनं पूतीकाः
शीर्षण्याः श्रमावन्यानिदधाति तदुपरि उपयमनीगतमग्निं स्थापयति। उपयमनी
तत्समीपेनिवपति चात्वाले प्रणीयमानमग्निं ब्रह्मानुगच्छति। ततो यजमानः प्रणीताः
उत्तरवेदेः उत्तरेण कुशास्तरणे प्रणीयाहवनीयं परिस्तीर्य गार्हपत्यं च पात्राण्यासा
दयति। आज्यस्थाली सम्मार्गकुशाः सन्नहनावच्छादनानि परिधयः उपयमनकुशाः
समिधः। स्रुवः। आज्यं वपा श्रपण्यौ चरुस्थाली शूलं उखा तंडुलाः दक्षिणार्थे तुल्यवया
गो श्चेति। उपकल्पनीयान्युपकल्पयति बर्हिः प्लक्षशाखाः त्रिगुणरशनां उपाकरण
तृणं द्विगुणरशनां। गोपशुः अभ्रिः पात्रेजनीः दर्भाः हिरण्यशकलानि षट्। पलाशप
त्राणि चेति॥ ततआदनक्रमेण पात्राणि प्रोक्षति। रुद्राय त्वा जुष्टं प्रोक्षामीति तंडुला
न्प्रोक्षयति। आज्यास्थाल्यामाज्यं निरुप्य गार्हपत्ये विश्रित्य पर्यग्निं कुर्यात ततवेदिं म

१६८

ध्यसंगृहीतामभ्याख्याय । ब्रह्मन्नुत्तरं [illegible] परिग्रहं परिग्रहीष्यामीति ब्रह्माणमामं
न्त्र्य परिगृहाणेति ब्रह्मानुज्ञातः पूर्ववत्स्फ्येन दक्षिणपश्चिमोत्तरवेदिं परिगृह्या
नुमार्ष्टि । आहवनीयमपरेण प्रोक्षणीरासाद्य प्रणीतोदकेन पात्राणि अवनिष्य प्रणीतानां
पश्चिमतः प्रागग्रं स्फ्यं निधाय तदुपरि ध्मा बर्हिषी आसादयति । ततः स्रुवं प्रतप्य संमृ
ज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात् । आज्यमुद्वास्य प्रोक्षणीनामपरेण कृत्वा उत्पू
याव्द्य प्रोक्षणीरुत्पूय वेदिं प्रोक्ष्य बर्हिश्च प्रोक्ष्य प्रोक्षण्येकदेशेन बर्हिर्मूलानि सि
क्त्वा बर्हिः स्रंस्य सन्नहनं च विस्रंस्य दक्षिणस्यां वेदिः श्रोण्यां निधाय सन्नहनावच्छा
दनैवच्छाद्य वेदिं स्तृणाति तत्प्रथा । बर्हिः मूलकं त्रिधा विभज्य प्रथमं भागं दक्षिणेनोत्त्या
पांकेकृत्वा द्वितीयं भागं दक्षिणेनोत्त्या [illegible] पितं सव्येन संगृह्य अंके स्थितं प्रथमभा
गं दक्षिणेनादाय वेद्यां स्तरणं स्रुदक्संस्थं तथैव तृतीयं भागं गृहीत्वा अंके कृत्वा स

हि २

खं १

१६९

। व्यस्थितं दक्षिणेनादायऋक्कगतं सव्येन संगृह्य पूर्वैस्त्तवर्हिर्मूलानि द्वितीयवर्हिर्मी
मांसैस्थादयनस्त्वात्तृतीयमागमादायस्कंधापग्रहेणतथैवस्त्रणातिपश्चादपवर्गः।
ततउपरिन्नक्षशाखास्त्रणाति।अथाहवनीयंकल्पयति।ततोमध्यमदक्षिणोत्तराग्न्य
रिधीनाहवनीयेपरिधायआहवनीयमेवेघअग्रेणाहवनीयंपरीत्यपलाशशाखांनि
खनति।तांत्रिगुणरशनयात्रिःपरिव्ययतितत्रशाकलमुपगूहतिरुद्रायत्वोर्पकरोमी
त्युपाकरणेनपशुमुपाकरोतिततोद्विगुणरशनयांतराशृंगंपशुंबध्वारुद्रायनियु
नज्मीतिशाखायांनियुनक्ति।अथरुद्रत्वाजुष्टंप्रोक्षामीतिपशुंप्रोक्षणीभिःप्रोक्ष्य
शेषंआस्येउपगृह्यअधस्तादुपोक्षति।ततउपयमनकुशानादायसमिधोभ्याधायप्रो
क्षणीभिःपर्युक्ष्यपूर्वाघारमाघार्यउत्तराघारंतेस्रुवाग्रेणललाटंसंश्रोतिमुपस्पृश्य
मनक्ति।ततःस्रुवाग्राक्ताभ्यांसर्वैसिर्भ्यांपशोर्ललाटमुपस्पृशति।स्वरुमवरु ह्य।

खा४

१६९

अस्मिंन्निदध्यात्। अमत्यन्वह स्योत्तरतः स्फ्येन शामित्रायपरिलिख्य आहवनीयस्योल्मु
केन पश्चाघ शामित्रदेशशाखा चात्वालाहवनीयात् पर्यग्निं कुर्यात्त्रिः पुनरुल्मुकमाहव
नीये प्रक्षिप्य तावत्स्यातिगच्छेत्। पुनराहवनीयादुल्मुकमादाय। पशुं कंठे बद्धा वपाश्रव
णीभ्यामन्वारभ्य उदङ् गच्छेत्। तत्र वेदितृणद्वयमादाय शामित्रे उल्मुकं निधाय शामित्रस्य
पश्चात्रएकं तृणं आस्तीर्यत त्र पशुं प्राक्शिरसं उदक्शिरसं वा उदाक्यादंनिपात्यअवाश्य
मानं मुखं संगृह्य। नमनेन शामित्रेण संज्ञपयति। सत्यन्यस्मिन्नुरूपे शमितरियजमा
न आहवनीयं प्रत्यत्य पूर्णाहुतिवदाज्यं संस्रुत्य स्वाहा देवेभ्यः इत्येकामाज्याहुतिं आह
वनीये हुत्वा संज्ञमे पशौ देवेभ्यः स्वाहेति तेनैवाज्येन अपरां हुत्वा तूष्णीमपराः पंचजु
होति। अथ वपाश्रपणीभ्यां नियोजनीं वा त्वाले प्रास्य पात्रे जनीभिः पशोः प्राणाधनं
स्वयमेव करोति। यथा मुखं नासिके चक्षुषी कर्णौ द्वौ नाभिं मेढ्रं पायुं संहत्य पादान्र

खं १

ण २

१२०

कैकंपान्नेन्ननीजलेनस्पर्शाति। शेषेणशिरःप्रभृतिकर्णपर्यंतंपुनस्तथैवंप्याय्यततो
गानिनिषिंच्यशेषंपशोःपश्चाद्भागेनिषिंचेत्। ततउत्तानंपशुंकृत्वानाभ्यग्रेतृणंनि
धायप्रज्ञातयासिधारयाभिनिधायसतृणं। त्वचंछित्वातृणमूलेंउभयतोलोहि
ना४ तेंक्ताततृणंभूमौनिरस्यततदुपरिस्वयंपादौकृत्वापुनरागत्योपविश्यचपामुश्च
घवपश्रपणीभ्यांप्रोणर्त्यछित्वाज्येनाभिघार्यप्रज्ञात्यपशुंविशास्ति। हृदयादीनिस
170 र्वाणित्रीणिवापंचवाययथाकामंअवदानान्यवद्य। जाघनींवाचयथाश्रेणूऊवध्यमवधा
यलोहितंवाविधायचरोतंडुलानोप्यवपांशामित्रेप्रतप्यआहवनीयस्योत्तरतःस्थित्वा
आहवनीयेचप्रतप्यशाखाग्रोरंतरेणाहृत्यदक्षिणतःस्थित्वास्रुवेणाज्येनाभिघा १२०
रयेत्।श्रपयति। गाहेपत्येस्थालीपाकंशामित्रेहृदयादीनिचरुंच। तत्रहृदयंशूलेकृ
तंपर्यग्निकृत्वावपामभिघारयति। अथत्विःप्रच्युतेपश्वौहृदयंउपरिकृत्वापृषदाज्य

न कृदवमग्निष्टार्थरं तराण्येव दानात्वाज्येन संस्रौणि वेद्यंगवर्जमग्निष्टार्थस्थालीपाक
मुद्वास्य अनंतरं मुखांचावपायाअंगानांचप्राणदानं कृत्वा वपादीनि क्रमेण साघअंगा
निशाखाग्न्योरंतरेण हृत्य वेघामासाघवपाम वदानानिचालभ्य ब्रह्मणान्वारब्धे आज्य
भागो हुत्वा वपाहोमार्थं स्रुवे आज्यमुपस्तीर्य हिरण्यशकलमवधाय वपां गृहीत्वा पुनर्हिर
ण्य शकलं दत्वाद्विरभिघार्य रुद्राय स्वाहेति वपां जुहोति। वपाश्रपण्यौ वाग्नौ प्रास्यति। त
तउखातो वसां गृहीत्वा अंतरिक्षाय स्वाहेति जुहुयात्। तत्र था वदान होमार्थं स्रुवे उपस्ती
र्य हिरण्य शकलमवधाय हृदयाद्यंगेभ्यस्त्वकं द्विर्द्विरवदाय यावदायस्रुवेद्विस्थास्थालीपा
काद्वैसकृदभिघार्य अस्य योनिचेद्वताभ्यं [illegible] गं कृत्वा अग्नये स्वाहेति जुहोति। एवं पुनः स्रुवे
उपस्तरण हिरण्य शकलावधानद्विर्द्विरवदानग्रहण सकृत्स्थालीपाकावदान हिर
ण्य शकलावदानाभिघारणानि कृत्वा रुद्राय शर्वाय पशुपतये उग्राय अशनये [illegible] भवाय
सकृदवदाय स्रुवे द्विस्थास्थालीपाकात् उपरि हिरण्यशकलं दत्वा ३ष

मि

महादेवाय ईशानाय त्वेते नाम मंत्रैः स्वाहाकारांतैः एकैकस्मै जुहोति। एवमष्टादयो
नवप्रधानहोमाः संपद्यंते। ततः पृषदाज्येन वनस्पतये स्वाहेति होमं विधाय स्विष्टकृद्धो
मार्थं स्रुवमुपस्तीर्य हिरण्यशकलं दत्वा सर्वावदानपत्रेभ्यं गेभ्यो द्विर्द्विरवदाय अत्र सकृदव
दानपत्रेते भ्य एव प्रधानार्थेभ्यो द्विर्द्विरवदाय सकृद्रोरवदाय हिरण्यशकलमवधा
याद्गिरभिघार्याग्नये स्विष्टकृते स्वाहेत्यग्नेरुत्तरपूर्वे जुहुयात्। यथामंत्रं त्यागः। ततस्स्रु
वेणैव सांग होत्वा आहवनीयस्य पुरस्तात् दिशः स्वाहा इदं दिग्भ्यः। दक्षिणतः प्रदिशः
स्वाहा इदं प्रदिग्भ्यः। पश्चिमतः आदिशः स्वाहा इदमादिग्भ्यः। उत्तरतः विदिशः स्वाहा
इदं विदिग्भ्यः। मध्यतः उद्दिशः स्वाहा इदमुद्दिग्भ्यः। पूर्वाह्णे दिग्भ्यः स्वाहा इदं दिग्भ्यः।
ततः जायन्तोग्रहोत्वा गार्हपत्यं प्रत्येत्य जाघन्याः स्रुवेणावदायावदाय इंद्राण्यै स्वाहा
इदमिंद्राण्यै। रुद्राण्यै स्वाहा इदं रुद्राण्यै। शर्वाण्यै स्वाहा इदं शर्वाण्यै। भवान्यै स्वाहा

इदं मवान्ये। अग्नये गृहपतये स्वाहा इदमग्नये गृहपतये॥ एताः पंच पत्नीसंयाजा जुहुतीर्जु
हुयात्। ततआहवनीयमहाव्याहृत्यादि प्राजापत्य होमान्ते संस्रव प्राशनानन्तरं शू
लगव पशुना तुल्य वयसं गां ब्राह्मणो दक्षिणां दद्यात्। ततः पलाशपत्रेषु षट्सु प्राकूसं
स्थपूदक्संस्थेषु पशुलोहितेन यास्ते रुद्र पुरस्तात्सेनास्ताभ्य एषबलिस्ताभ्यस्तेन
मः इदं रुद्राय सेनाभ्य इति सर्वबलिषु त्यागः १॥ एवं यास्ते रुद्र दक्षिणतः सेनास्ताभ्य
एषबलिस्ताभ्यस्ते नमः। यास्ते रुद्र पश्चात्सेनास्ताभ्य एषबलिस्ताभ्यस्ते नमः। रु
द्रोत्तरतः सेनास्ताभ्य एषबलिस्ताभ्यस्ते नमः। यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष
बलिस्ताभ्यस्ते नमः। येस्ते रुद्राधस्तात्सेनास्ताभ्य एषबलिस्ताभ्यस्ते नमः। ऊवध्यस्य
लोहितलिप्तस्याग्नौ प्रक्षेपः। अथो निखननं वा कृत्वा अनुवातं पशुमवस्थाप्य रुद्रा
ध्यायेनमस्त इत्यादिना अस्य प्रथमोत्तमाभ्यां वानुवाकाभ्यां रुद्रानुपस्थाय उदकमुप
स्पृशेत्। एतस्य पशोर्मांसं ग्रामं नानयेत्। समाप्तः शूलगवः॥ ० ॥ अथ चैत्यपद्धतिः॥

ग° १

तत्रविहितमात्स्यपूजाभ्युदयिकश्राद्धः स्वर्गपशुपुत्रधनयशआयुषांफलानामन्यतत्
फलकामः श्रीपासनमरण्यंनीत्वा तत्रपरिसमूहनादिभिः संस्कृतायांभूमौस्थापयेत्
ततो ब्रह्मोपवेशनादि प्राशनांतेविशेषः। सत्रीरं प्रणय नरुत्वाय य संश्रवयि
त्वाश्रा ज्यभागाविष्णुश्शूलगाव देवताभ्यः अग्निरुद्रशर्वपशुपत्युग्राशनिभवमहादे
वेशा नेभ्यः स्वाहाकारांतैर्नामभिश्चतुर्थ्यंतैर्न्नवभिर्मंत्रैः पायसनप्रत्येकंजुहुयात्
ततः पायसादेवस्विष्टकृतेहुत्वामहाव्याहृत्यादिप्राजापत्यहोमान्ते संस्रवंप्राश्य
पूर्णपात्रवरयोरन्यतरंब्रह्मणेदद्यात्॥ इतिगोर्थपद्धतिः॥ अथ वृषोत्सर्गः॥
अथशूलगवानंतरंवृषोत्सर्गः। वृषस्यवक्ष्यमाणलक्षणस्यउत्सर्गः। उत्सर्जनंव्या
ख्यास्यते। सचकामधिकारात्फलस्यचानभिधानात्। किंविश्वजिन्यायेनस्वर्गफ
लःकल्प्यते। उतपूर्वोक्तेशूलगवानंतरानिधानात्तात्फलइतिसंदेहः। तत्रविश्व
जिन्यायस्यसर्वथाश्रुतफलकर्मविषयत्वात्रनात्रप्रवृत्तिः। कुतः संनिधिश्रु

तस्य श्रूलगवफलस्य स्वर्गो देरत्रान्व यथोग्यत्वात्तस्मात्। अयमपि स्वर्गपशुपुत्र
धनयशआयुष्कामस्यैवेत्यभि प्रेत्याह। गोयज्ञेन व्याख्यातः॥ स वा गोयज्ञेना गवा
७ रो इ्एपशुनायज्ञः। गोयज्ञः। तेन व्याख्यातः। गोयज्ञफलेति कर्तव्यता वा नित्यर्थः।
ततश्चास्मिन्नपि स्वर्गपशुपुत्रधनयशआयुष्कामस्याधिकारः॥ सकृदा कर्तव्य इत्यपेक्षा
यामाह॥ कार्त्तिक्यां पौर्णमास्या ८ रेवत्यां वा श्व युजस्य। कार्त्तिक्यां पौर्णमास्यां।
आश्विनस्य रेवत्यां रेवतीनक्षत्रे वा कर्तव्यः॥ शास्त्रांतरानुवेश्यामाश्वयुज्यां वा मध्ये
गवा८ सुसमिद्धमग्निं कृत्वाज्य८ संस्कृत्येह रतिरिति षड्डुहोति प्रतिमंत्रं मध्ये गवां गो
ष्ठे पंचभूसंस्कारपूर्वकं आवसथ्याग्निं सुसमिद्धं प्रज्व लितं कृत्वा आज्य संस्कार
नंतरं पर्युक्षणांते इह रतिरित्यादिभिः षभिर्मंत्रैः प्रतिमंत्रं षडाज्याहुतीर्जुहोति। अत्र
मध्ये गवामिति देशविशेषनियमानुविधानात देशांतर रस्येह यागांतगत्वा

पूषागाँन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजांत्सनोतु न इति पौष्णस्य जुहो-
ति। पौष्णस्य पूषा देवतास्येति पौष्णः चरुः तस्य पूषा गा इत्यादि मंत्रे जुहोति। हो-
मसंख्यानभिधानात्सकृत् अपण्णनुपदेशात्सिद्ध एवोपादीयते। अयं पौष्ण-
चरुः पिष्टमयो भवतीति कुतः तस्माद्यं पूष्णे चरुं कुर्वंति प्रविष्टानामेव कुर्वं-
तीति श्रुतेः। रुद्रांजपित्वैकवर्णं द्विवर्णं वा यो वा पूर्थ्यैव्यादयतिर्यं वा पूर्थ्यैव्याद-
ये ड्रोहितो वै वस्यात्स हींगे रूपतो जीववत्सायाः पयस्विन्याः पुत्रौ पूर्थ्यैवै रूपस्विनं
मस्यांतमलंकृत्य पूर्थैमुख्याश्चतस्रो वत्सतर्यो वांश्यालंकृत्यै तं युवानं पतिं वो द-
दामि तेन क्रीडंतीश्चरथ प्रियेण मा नः संपृक्षै जैतुषा सुभगा रायस्पोषेण समि-
षाम देमे त्यैतये वोत्सृजेरन्न रुद्रान्नमस्त इत्यध्यायाम्नातान्नजपित्वा जपध-
मेण पठित्वा अत्र स्थलगवाति देशप्राप्ताधिरुद्रजपविधिः प्रथमोत्तमानुवाकज-

पविकल्पानि दृष्टार्थः। जपावसरज्ञापनार्थो वा। न अपूर्वेऽपवार्यं जप्यत्वेन अप्राप्तत्वात् त
प्रकृतो हि रुद्राणां पशुपस्थानेकरणत्वेन विहितत्वात्। एक एव शुक्लादिवर्णो रूपं
यस्य स एकवर्णः तं अथवा द्वौ वर्णौ यस्य स द्विवर्णः तं वृषं वर्णविशेषनियममभिधा
य अथ वृषस्य परिमाणविशेष नियममाह। यो वृषः यूथं कृत्स्नं वर्गं छादयति स्व
परिमाणे न अधः करोति तं वायं वृषं यूथं वर्गः छादयेत्। अधः करोति। तं वा यूथाद
धिकपरिमाणं वा न्यूनं न्यूनपरिमाणं वेत्यर्थः। रोहितः लोहितो वा एवस्यात् एवका
रेण लोहितस्य एकैव वर्णाभ्यां आशास्त्यमुच्यते। पुनः कीदृक् सर्वैः अंगैः उपेतः सम
न्वितः। न पुनः हीनांग अक्षिकां गो वा तथा जीवाः प्राणंतो वत्साः प्रसूतिर्यस्याः सा
जीववत्साः तस्याः गोः पुत्रः तथा पयः क्षीरं बहुलं विद्यते यस्याः सा पयस्विनी तस्याः
बहुरूपाया इत्यर्थः। तथा यूथे वर्गविषये रूपमस्यास्तीति रूपस्वी अतिशयेन रूपस्वि

वलिद्धु ४

ती १

१२४

तमः वृषः स्यात्। तं उक्तगुणविशिष्टं वृषमलंकृत्य वस्त्रमाल्यानुरूपहेमपट्टिकाग्रैवे
यकघंटादिभिर्वृषोचितभूषणैर्भूषयित्वानेकैवलं वृषमलंकृत्य ताश्च वत्सतरीः अ
लंकृत्य ताः काश्याः पूषेत्यत्र मुख्याः गुणैः श्रेष्ठा वत्सतर्यः कति चेत् सः चतुःसंख्योपेताः
एनं संयुवानमित्येतयर्चा उत्सृजेरन् त्यजेयुः। नभ्यस्थमभिमंत्रयते मयोभूरित्यनु
वाकशेषेण नभ्यस्थं वत्सतरीणां मध्ये तिष्ठं तं अभिमंत्रयते। अभिमुख्येन मंत्रय
ते। मंत्रैस्तोत्रिकेन मयोभूरभिमा वाहिस्वाहेत्यारभ्य स्वर्णे सूर्यः स्वाहेत्येतदंतेन।।
अनुवाकशेषेण। इति। अथ पायसप्राशनं नाम कर्मोतरं। स द्यो सां पयसि पायस
ं श्रपयित्वा ब्राह्मणान्भोजयेत्।। यस्य यावत्यो गावः दोग्ध्र्यः संति सः तासां सद्यो
सां पयसि दुग्धे पायसं श्रपयित्वा ब्राह्मणान् त्रिप्रभृतीन् यथाशक्ति भोजयेत्। नव्यैये
ता। पशुमध्ये के कुर्वंति। तस्य शूलगवे न कल्पो व्याततः। एके आचार्याः पशुमपि ब्रा

२२

गं कुर्वीत॥ आलभंते। उक्तविधिना पायसस्त्र पणपूर्वकं ब्राह्मणा नमो जयन्तीत स्य पशोः शूलगवेन शूलगवाख्येन कर्मणा कल्प्यः इति कात्यायनेन व्याख्यातः कथितः॥ इति सूत्रार्थः॥ ॥ अथ प्रयोगः॥ तत्र स्वर्गादी नाम न्यतमफलप्राप्तिकामः कार्त्ति क्यां पौर्णमास्यां आश्वयुजस्य रेवत्यां वा शरत्प्राप्तरार्द्रे आमाश्वयुज्यां मातृपूजापूर्वकमाभ्युदयिकं कृत्वा गोष्ठगवां मध्ये वंचमून् संस्कारान् कृत्वा आवसथ्याग्निं स्थापयेत्। [illegible]। प्रणीता प्रणयनकाले प्रणीतापात्रस्य मध्ये पिष्टादिना अन्तर्धानं विधाय मूलदेशे पयः इतरत्र जलं प्रक्षिप्य प्रणयेत्। तंडुलानन्तरं पौलं पिष्टं वर्हं संसिद्धमासादयेत्। प्रणीतेन पयसा पायसं श्रपयेत्। पर्युक्षणान्ते सुसमिद्धे ग्नौ इह रतिः स्वाहा। इह रमध्वं स्वाहा। इह धृतिः स्वाहा। इह स्वधृतिः स्वाहा। उपसृजं धरुणं मात्रे धरुणो मातरं धयन्न स्वाहा। रायस्पोषमस्मासु दीधरत् स्वाहा। इति त्यागः स

इदमग्नये १

हिताः षडाज्याहुतीर्जुहोति॥ ततश्चाघारावाज्यभागौ तं पायसेन शूलगवदेवताभ्यो
ऽग्न्यादिभ्यः ईशानांतेभ्यो नवाहुतीर्हुत्वा पिष्टचरोः पूषागाश्चन्वेतु न इत्यादि
सनो तु न इत्यवेनस्वाहाकारयुतेन मंत्रेण एकामाहुतिं हुत्वा इदं पूष्ण इति त्या
गं विधाय। पायसपोलाभ्यां स्विष्टकृते हुत्वा महाव्याहृत्यादि होमसंस्रवप्राशना
ते पूर्णपात्रयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात्॥ अथ नमस्ते रुद्र मन्यव इत्यारभ्या
समाप्तेः रुद्रान् जपित्वा एकवर्णादिगुणविशिष्टं वृषभं चत[illegible] सृभिर्वत्सतरीभिः
सहितं वस्त्रमाल्यहेमालंकारादिभिरलंकृत्य एतं युवानं पतिं वो ददामि तेन
क्रीडंतीश्चरथ प्रियेण मा नः साप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम
त्येतया ऋचा उत्सृजेरन्॥ ततो वत्सतरीमध्यस्थं वृषभं मयोभूरभि मावाहि स्वा
हेत्यारभ्य स्वर्णसूर्योयस्वाहेत्यंतेन अनुवाकशेषेण अभिमंत्रयते इति वृषोत्सर्गः॥६॥

अत्र यत्प्रेतकृत्यं तदन्योक्तं लिख्यते। तत्र प्रेतपित्रादिगतनानाविधसमुचितस्वर्गा
दिफलकामस्य स्वगतपुण्यातिशयाशोकमोक्षमतिकामस्य वाधिकारः। तत्र प्रथमसं
वत्सराभ्यन्तरे कृतसपिंडीकरणस्याकृतसपिंडीकरणस्य च मातृ स्यापनपूजना
भ्युदयिकश्राद्धानि भवन्तिस्मृतकांतद्वितीमहरेवपरं तस्य वृषोत्सर्गकालश्चानका
र्त्तिक्यादि प्रथमसंवत्सरे काम्यकर्माभ्युदयिकयोरनधिकारात् अकृतः तथैव का
म्यं यत्कर्मवत्सरात्प्र थमादृते इति वचनात् स्मृतकांते द्वितीये ऽहनीति वचनात् तथै
व काम्यं यत्कर्मेति वचनं वाधित्वैव प्रवर्त्तते। अनन्यविषयत्वात्। कार्त्तिक्यादितु वच
नं संवत्सरोत्तरकालानकार्त्तिकादिषु संकोच्यं अन्यथानाव सावेक्षत्वाभ्यां वै
षम्यापत्तेः। ततश्च संवत्सरानन्तरं कार्त्तिक्यादौ पित्रादिगतनानाविधतत्स्वर्गादि
कामैः क्रियमाणो वृषोत्सर्गो मातृस्यापनपूजन श्राद्धपूर्वक एव कर्त्तव्यः।

१७६

176

तस्य च कार्त्तिकी चैत्री आश्वयुजी रेवत्यां कालाः। अथ फलश्रुतिः। उत्सृष्टो वृषभो येन
पिबत्यथ जलाशये। शृंगेणोल्लिखते भूमिं यत्र क्वचन दर्प्पितः॥ पितॄणामन्नपानं
त त्तत्सर्वमुपतिष्ठते। वृषोत्सर्गाद्दृते नान्यत्पुण्यमस्ति महीतले। तथा वृषभम
स्य तु शब्देन पितरः सपितामहाः। आवर्त्तमाना दृश्यंते स्वर्गलोके न संशयः॥
जले प्रक्षिप्य लांगूलं तोयं यदुद्धरते वृषः। दशवर्षसहस्राणि पितरस्ते न तर्प्पिताः।
कूले समुद्धृता या वै शृंगे तिष्ठति मृत्तिका। मध्वमोघ्यमयैः शैलैः पितरस्ते न त
र्प्पिताः। गवां मध्ये यदा चैष वृषभः क्रीडते नु यत्र। अप्सरोहंसहस्रेण क्रीडंते
पितरस्ततः। लांगूलमुद्यम्य यावत्तोयेषु क्रीडते तु सः। अप्सरोगणसंघै
श्च क्रीडन्ति पितरः सदा। सह स्वरत्नपात्रेण कनकेन यथाविधि पितॄणां वै
सा वृषेण समोच्यते। एतानि तार्थेवादकफलानि समुद्धितान्येवाकामनाविषय

१७६

स्तुयां

अथ वृषस्वरूपं तीवबत्सायाः पयस्विन्याः पुत्रः मुखपुच्छपादेषु सर्वेषु शुक्लः नीलो लोहितो वा वृषः
तथा उन्नतस्कंधककुद्मान् ऋजुलांगूलभूषणः महाकटितटस्कंधो वै [illegible] डूर्यमणिलोचनः।
प्रवालगर्भशृंगाग्रः सुदीर्घऋजुवालधिः। नवाष्टदशसंख्यैः सुतीक्ष्णाग्रैर्दन्तैः शुभैः। मल्लि
काख्यश्च मोक्तव्यः तथा वर्णोन्नतावकः। कपिलो वृषभः श्रेष्ठो ब्राह्मणस्य प्रशस्यते। श्वेतो रक्त
श्च कृष्णश्च गौरः पाटल एव च। तथा। पृथुकर्णो महास्कंधः सूक्ष्मरोमा च यो भवेत्। रक्ताख्यः
कपिलो यश्च रक्तशृंगगलो भवेत्। श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते। स्निग्धव
र्णेन रक्तेन क्षत्रियस्य प्रशस्यते। यस्य प्रागयते शृंगे स्वमुखाभिमुखे सदा। सर्वेषामेव व
र्णानां स च सर्वार्थसाधकः। तथा मार्जारपादः कपिलः तथा कपिलपिंगलः। श्वेतो मार्जार
पादश्च तथा मणिनिभेक्षणः। तथा गौरः तत्त्रि [illegible] रिकृष्णतिलाशिनिभो तथा। आकर्णमूलात् श्वेतं
यस्य मु [illegible] खं स नन्दीमुखः। विशेषतो रक्तवर्णः। त [illegible] था यस्य जठरं श्वेतं पृष्ठं वा स समुद्रनामा।
कांचनाभेन वैश्यस्य कृष्णः शूद्रस्य शस्यते ४

अतसीवर्णो धन्यः। तथान्यो मोकर्षति लांगूलं पुनश्च स्थूलवालधिः। पुरस्तादुन्नतो नीलः
स [illegible] श्रेयान् वृषभः स्मृतः॥ तथा रक्तशृंगाग्रनयनः श्वेतदंतोदरस्तथा प्रवालसदृशास्ये
न वृषो धन्यतरः स्मृतः। एते सद्यैव धनधान्यविवर्द्धनाः। तथा चरणाग्रं मुखं पुच्छं यस्य श्वेता
निगोपतेः। लाक्षारससवर्णश्च तन्नीलमिति निर्दिश्यते॥ तथा लोहितोयस्तु वर्णेन मुखे पु
च्छे च पांडुरः। श्वेतः खुरविषाणाभ्यां स वृषो नीलउच्यते। नीलाधिकारे। एवं वृषं लक्षणसं
प्रयुक्तं गृहीत्वा क्रीतमथापि राजन्। मुक्त्वा न शोचेन्मरणं महात्मा मोक्षं मतिं चाहमतो विधे
स्यात् दर्थं गाथेयम्। एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा
वृषमुत्सृजेत्॥ तथाथ वर्जनीयवृषाः। कृष्णताल्वोष्ठदशना रूक्षशृंगशफाश्च ये। अस्यक्तद
ता ह्रस्वाश्च व्याघ्रभस्मनिभाश्च ये। ध्वांक्षगृध्रसवर्णाश्च तथा मूषिकसंनिभाः। कुंठाः काणा
श्च खंजाश्च केकराक्षास्तथैव च॥ अत्यन्तश्वेतपादश्च उद्भ्रान्तनयनास्तथा। नैते वृषाः प्रपो

२२२

कैव्या गः हे धार्याः कथंचन॥ उपादेयश्च वृषस्त्रिहायनः। तथा वत्सतर्यपि त्रिहायन्य एव।
अथ स्नात आचान्तः प्रेतपुत्रादिरन्यो वा होता ब्रह्मा च तत्रान्यपत्ने॥ ॐ अद्यामुकमासीयामुक
तिथौ पित्रादिगतस्वर्गकामो वृषोत्सर्गमहं करिष्य इति प्रतिज्ञाय अद्य कर्तव्ये वृषोत्सर्गे होमक
र्मणि भवान्मयाभिमंत्रितः। तथैव होमकर्मणि कृताकृतावेक्षकत्वेन मया भवानभिमंत्रि
त इति वस्त्रचंदनतांबूलादिना होतृब्रह्माणौ वृणुयात्॥ ततः स्वगृहं मध्ये गोष्ठे पंचभूसं
स्कारान्कृत्वा आवसथ्याग्नेः स्थापनं कुर्यात्। होतृब्रह्मप्रणीतानामासनदानं ब्रह्मोपवेश
नादि प्रणीताक्षीरोदकप्रणयनं। उदकपात्रप्रणयनमिति केचित्। आज्यं तंडुलाः पोलाः पि
ष्टमयः [illegible] सिद्ध एव चरुः। होतुर्वस्त्रयुगं सुवर्णकांस्यानि दक्षिणा। ब्रह्मणः पूर्णपात्रं वरो वा
प्रोक्षण्युदकेनैतान्संप्रोक्ष्य। प्रणीतेन पयसा यथाविधि पायसचरुश्रपणम्। उद्वासनादि। प्रो
क्षण्युदकेन पर्युक्षणं। पवित्रयोः प्रणीतासु निधानं। उपयमनकुशानादायातिष्ठत्समिधस्ति

स्वः तूष्णीमग्नौ क्षिपेत्॥ आज्येन होमः। इह रतिरित्याद्याः षडाहुतयः। इदमग्नय इति त्यागः। आ
घारावाज्यभागौ। ततः पायसेन अग्नये रुद्रायेत्यादि। ततः पिष्टचरुणा पूषागा इत्यादि मंत्रेणैका
हुतिः। ततः पायसपिष्टचरुभ्यां स्विष्टकृद्धोमः। ततो भूरित्यादिना आहुतयः। संस्रवप्राशनादि
दक्षिणान्ते रुद्रं जपित्वा एकस्मिन्पार्श्वे चक्रेण परस्मिन्शूलेन वृषभमंकयित्वा वत्सतरी
र्वृषं च हिरण्यवर्णा इति च त[illegible]भिः शन्नो देवीरिति च स्नापयित्वा [illegible] लोहघंटिकानूपुरकन
रूपद्दामादिभिः पंचाप्यलंकृत्य वृषस्य दक्षिणे कर्णे जपेत्। वृषो हि भगवान्धर्मश्चतु[illegible]ष्पा
द्धं प्रकीर्तितः। वृणोमि तमहं भक्त्या स मां रक्षतु सर्वत इति। ततउत्सर्गः। ॐ अद्यामुकमा
सीयामुकतिथौ एतं युवानमित्यादि समिषाम देत्यं तेन पारस्करेण एतये वो त्सृजे रक्षित
एकरेनिषेधात्॥ तेषां हि आगर्भः॥ हे वत्सतर्यो वो युष्माकं एतं युवानं तरुणं पतिं ददा
मित्यजामीत्यर्थः। हे वत्सतर्यः यूयम [illegible] पि जमयो वयोक्त्याः किंतु मया त्यक्ताः सत्यो वनेषु

अनैंद्रियेण पत्या सहचरथा। स्वछं दभ्रमथात्तृणनिखादयेति वा वरगतिमन्नणयोः नोस्मा
कं गृहेषु साप्नजनुषा सप्तजन्मपर्यंतं असुत्रगामाचरथा। किंचं युष्मत्प्रसादात् द्वयं रायस्पोषेण
धनपुष्ट्या इषा अन्नेन च संमदेम सम्यक् तृप्येमेति। इत्याशंसा। तदुक्तं। ततः प्रमुदितास्तेन
वृषेण च समन्विताः। वनेषु गावः क्रीडंति वृषोत्सर्गप्रसिद्धिषु॥ ततो वत्सतरीमध्ये वृषभं अभि
मंत्रयते मयोभूरित्यनुवाकं [illegible] शेषेण ततो यवतिलयुतं जलं पित्रादि[illegible]भ्यः पितृतीर्थेन दद्या
दनेन मंत्रेण। स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृप्तये। मातृपक्षाश्च ये केचित् ये चान्ये पि
तृपक्षकाः। गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः। ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः। वृ
षोत्सर्गेण ते सर्वे लभंतां तृप्तिमुत्तमामिति दद्यादनेन मंत्रेण तिलाक्षतयुतं जलं। उत्सृष्टान्नो
पयुंजीत स्वामी वान्योपि मानव इति। यथा वापीकूपतडागादौ उत्सर्गे कृते परस्मिन् श्रुस्वीका
रितानिष्टिकृतनुलगोचरतया सर्वेषामोपादानि वैस्वत्वं कुतो न भवति तत्राह। तवाऽयं न चत

क्षीरं पात केश्यं न चिन्त्यं चित्। न ब्राह्मणो सौ वृषश्चौ णम् तेत न्मूत्रगोमये॥ ततश्च यथेष्टवि
नियोगनिषेधान्मतिस्तोकत्वेन किंचिद्व्यपुदानं कार्यं। औपादानिकस्वत्वानंतरं विक्रीय
कप दिकानमेवास्त्विति चेत्। नानावाप्य इत्यस्य विनियोगमात्रोपलक्षणत्वात् विक्रय
स्यापि यथेष्टविनियोगरूपत्वात्। किंतु गोपशुविक्रयस्य निषेधश्रुतेः। कथं तद्दर्थमुपा
दानं। उल्लंघितमर्यादो विक्रयं करोत्विति चेत्। तस्यो छं खलत्वेन हेयत्वात्। शास्त्रानधि
कृत्य शास्त्रप्रवृत्तेः संकल्पविरोधाच्च। तर्हि नित्य प्रियेण वनेत्यनवच्छिन्नकारं चरथेति
संकल्पः नु तु परोपेतां गो बलीवर्दरूपं सुरुतामिति संकल्प वापीकूपादौ तु सर्वभूतानि
स्नानपानावगाहनादीनि यथेष्टमिह कुर्वन्त्वित्यनेन संकल्पः यदि तु वत्सरीणां अपत्या
नि केनचिदुपादाय दोहं तदा न दोषः। तत्पर्यंतं दोहनवाहनं निषेधवाक्यस्य तात्पर्यात्॥
एवं द्वचनमति न्यायात्। अघपायसप्राशनं नाम कर्मोत्तरं प्रकरणे कात्यस्वर्गाद्यन्यतमका

१७९

मस्याभिधीयते। तत्र कालविशेषानभिधानात्प्रकृतोत्सर्गकाल एव गृह्यते। ततश्च वृषो
त्सर्गविहितकार्त्तिक्याद्यन्यतमसमये मातृपूजाभ्युदयिकपूर्वकमावसथ्याग्नौ स्वकीया
नां सवत्सां दोग्ध्रीं [illegible]र्णां गवां पय आदाय तस्मिन्पयसि तंडुलान्प्रक्षिप्य पायसं श्रपयित्वा
त्रिप्रभृतीन्यथाशक्ति यथासंभवं ब्राह्मणान्भोजयेत्। अथवा शूलगवविधानात्कर्मपशुं
च कुर्यात्। इति पायसश्रपणम्॥ एष वृषोत्सर्गविधिः॥ स्वर्गादिकामस्य श्रौपासनाग्नौ साग्ने
र्भवति। यः पुनः प्रेतगतस्वर्गादिफलसाधनभूतो ब्राह्मणादीनां वर्णानां एकादशत्रयो
दशषोडशैकत्रिंशत्तमेष्वस्ति वृषोत्सर्गः स्मृत्यन्तरविहितः। तत्रापि द्विजातीनां साग्निनि
रग्नीनां काण्वमाध्यंदिनीयशाखानुसारिणां लौकिकाग्निना तेनैव [illegible] विधि[illegible] नामातृ
पूजाभ्युदयिकश्राद्धरहितः कर्ता भवति। प्रेतसपिंडानां प्रथमे वर्षे काम्याभ्युदयिकयोर्निषेधा
त्। शूद्रस्य च मंत्रवर्ज्जं क्रियामात्रं निरग्नीनां तु स्वर्गादिकामानां कार्त्तिक्याद्यन्यतमकाले लौ

१८०

किकाण्णां कर्तृत्वेनाभवतीविशेषः। अत्र केचिदाहुः। एकादशेऽह्नि संप्राप्ते यस्य नोत्सृज्य
ते वृषः। प्रेतत्वं हि स्थिरं तस्य दत्तैः श्राद्धशतैरपीत्यादिस्मृतिवचनात्। क्षत्रियवैश्यशू
द्रैरपि एकादशाह एव आशौचमध्येनियतकालेन त्वा वृषोत्सर्गः कर्तव्य इति। तदा
युक्तम्। अत्र प्रकरणे एकादशाहद्वादशाहादिशब्दाः आशौचव्यतिक्रांतकालोपलक्ष
काः। अन्यथा अहन्येकादशे नामातया आनंत्यात्कुलधर्माणामायुषश्च परिक्षयात्। अ
स्थिते शरीरस्य द्वादशाहः प्रशस्यते [illegible]त्यादिनिर्वचनेनर्नामकरणसपिंडक्रिया
क्षत्रियादीनां अशुद्धावेव आपद्यते। न तद्दिष्यते। शुचिना कर्म कर्तव्यमिति कर्माधिकारे
शुद्धेरपेक्षितत्वात्। सा च क्षत्रियादीनां त्रयोदशे षोडशे एकत्रिंशत्तमे दिने भवति। तस्मा
देकादशाह इत्यादिशब्दाः व्यतिक्रांतमुपलक्षयन्ति॥ ॐ॥ अथोदककर्म। अथ पुरुषसंस्का
रकर्मक्रमप्राप्तं उदककर्म उदकेन जलेन कर्मक्रिया अंजलिदानमित्यर्थः। व्याख्यास्यते॥

२८०

उपलक्षणमेतत्। येन आशौचादिनियमा अपि वक्ष्यन्ते। अद्विवर्षे प्रेते मातापित्रोराशौचं ८ शौच
मेवेतरेषामेकरात्रं त्रिरात्रं वा द्विवर्षवयो यस्य स द्विवर्षः न द्विवर्षः अद्विवर्षः। तस्मिन् प्रेते प्रक
र्षेण इतो गतः प्रेतो मृतः। तस्मिन्निमित्ते माता च पिता च मातापितरौ तयोः मातापित्रोः आशौ
चं अशुद्धिः। वर्णाश्रमविहितकर्मानुष्ठानसंकोचावस्था। इतरेषां मातापितृभ्यामन्येषां शौ
चमेव नाशुद्धिः। किं तत्कालं एकरात्रं एकमहोरात्रं। वा अथवा त्रिरात्रं अयं विकल्पः प्रेतस्य
अकृतचूडत्वेन व्यवस्थितः। इतरेषां सद्यः शौचमिति गृह्यकारस्यैव मतम्। अस्मन्मतांतरे तु तेषा
मप्याशौचस्य विहितत्वात्। आदन्तजननात् सद्य इत्यादिना। यच्च पुंस उपनयनात्प्राक् स्त्रिया
अविवाहात्प्राक् वयोवस्थाविशेषेण सद्य एकरात्रत्रिरात्रादिकमाशौचमुक्तं तत्सर्वं
वर्णसाधारणं विशेषागमस्याशक्यत्वात्। शरीरम दग्ध्वा निखनंति। ऊनद्विवर्षस्य प्रेत
स्य शरीरं कुणपं अदग्ध्वा अग्निदाहमकृत्वा निखनंति गर्ते प्रक्षिपन्ति। अतः सूतके चेदोस्या

तादाशौचं सूतकवत्। चेद्यदि अंतः सूतके सूतकस्य जननिमित्ताशौचस्य अंतः मध्ये तु
शातात् उत्थानं सूतकांतं यावत्। आशौचं जननाशौचं मातानि तदा सूतकवत्। पूर्वसू
तकशेषेणेतरस्य शुद्धिः। यदा अंतर्मध्ये सूतके सूतकांतरे जाते उत्थानादशुद्धिः। आ
शौचं मरणाशौचं सूतकवत्। मरणाशौचमध्ये यदा मरणाशौचमेवापतति तदा पूर्वशे
षेणैवेतरस्य शुद्धिः। एतत्त्वसपिंडविषयं। मातापित्रोस्तु विशेषः। मातरि पूर्वं मृतायां आ
शौचमध्ये यदि पिता म्रियते तदा पितृमरणनिमित्ताशौचांते शुद्धिः। यदा पुनः पितरि मृ
ते आशौचमध्ये माता म्रियेत तदा पितृमरणनिमित्ताशौचांतात् पक्षिण्यंते द्वादशा
हरांते शुद्धिः। यदि सूतके रात्रिमात्रावशिष्टे सूतकांतरमापद्यते शावे वा रात्रिमात्रा
वशिष्टे शावांतरमापद्यते तदा द्व्यहमधिकं वर्द्धते। यदि पुनर्यामत्रावशिष्टे सूतके शा
वे वा सूतकं शावं वापतति तदा त्र्यहमधिकं वर्द्धते। तथा च स्मृतिः। मातर्यग्रे प्रमीतायां

१८१

181

१८१

मशुद्धौम्रियतेपिता। नपूर्वशोचा च्छुद्धिःस्यान्मातुःकुर्यात्सपक्षिणीं। रात्रिशेषे द्व्य हाच्छु
द्धिर्यामशेषे शुचिस्त्र्यहादिति। अन्येतुइदंसूत्रं अ न्यथाव्याचक्षते। सं तःसूतकेचेद्यदि
बालस्यमरणमापद्यतेतदा। आउत्थानात्। आशौचंअशुद्धिः सूतकवद्भवति। नाशौच
निवृत्तिः। बालमरण निमित्ताशौचस्याल्पकालीनत्वेनवद्धुकालीनजननिमित्ताशौ
च शोधनासमर्थत्वात्। यतःसमानजातीयंसमानकालीनस्येवपूर्वोत्पन्नस्यअंतरा
पतितस्यवाशोधकत्वम्। नात्रोदककर्म्मो। अत्रऊनद्वि वार्षिकेप्रेतेउदककर्मउ
कांजलिदानं नभवति। द्विवर्षप्रभृतिप्रेतमाश्मशानात्सर्वेनुगच्छेयुर्यमगाथांगायंतो
यमसूक्तंजपंतइत्येके॥ द्विवर्षवयोयस्यसद्विवर्षः तत्प्रभृतिः तदादिर्यःप्रेतःतंआश्मशा
नात्। श्मशानावधिसर्वेसपिंडाःअनुगच्छेयुःपश्चाद्द्रूजैपुनः श्मशानानुगमनविधानाद्दा
हउपलक्ष्यते। श्मशानशब्देनहिप्रेतदाहभूमिरुच्यते। तस्माद्दाहमपिकुर्युः॥ दाहसन्निधौ

गशिष्टं उदकं च दद्युः। एके आचार्या यमगाथां यमदेवत्या ऋचं गीतं सामगायंतः। पठंतः।
तथा च यमं सूक्तं शाट्टवाच्यं। जपंतोऽनुगच्छेयुरित्याहुः। यद्युपेतो भूमिजोषणादि समानमा
हिताग्नेरोदकांतस्य गमनात्। यदि उपेतः उपनीतः प्रेतः स्यात् गृह्योक्तसंस्कारेषु तस्या
धिकारात्। वैतानिकस्य च मंत्रब्राह्मणकल्पसूत्रेषु पृथक् संस्काराम्नानात्। तदा भूमिजो
षणादि कर्म्म समानं तुल्यं केन आहिताग्नेः कर्मणा यथा आहिताग्नेः औपासनिकस्याग्निपर्यंतं
आउदकांतस्य उदकसमीपस्य गमनात्। एतदुक्तं भवति। यद्युपनीतः प्रेतो भवति तदा
स आहिताग्नेर्भूमिजोषणादि उदकांजलिदानपर्यंतं कर्म्म तथैव कुर्यात्। शालाग्निना द
हनं न आहिताश्वेत्। च यदि असौ प्रेतः आर्हिः कृतावसथ्याधानः स्यात्। तदा एनं प्रेतं
शालाग्निना औपासनेन दहनेन दहंति पुत्रादयः। तूष्णीं ग्रामाग्निना तेन तूष्णीं मंत्रवर्ज्जं ग्रा
माग्निना लौकिकेन पावकेन उत्तरम कृतावसथ्याधानं दहन्तीत्यनुषंगः। संयुक्तं मैथुनं वा

.न२ २२

कु १

दकं याचेरन्नुदकं करिष्याम इति। संयुक्तो केनचित्त्र्यौनेन संबंधेन संबद्धं मैथुनः एकदेशल
क्षणया मैथुनशब्दवाच्याया भार्याया भ्राता शाल इत्यर्थः॥ तं वा उदकं जलं याचेरन्। उदकं
रिष्याम इत्यनेन मंत्रेण। कुरुध्वं माचैवं पुनरित्यशतवर्षे प्रेते। एवं प्रष्टः संयुक्तः शालो
वा प्रतिब्रूयात्। किं कुरुध्वं माचैवं पुनरिति। द्व्यशतवर्षे प्रेते शतवर्षेभ्यो वीकु मृते कु
रुध्वमित्येवेतरस्मिन्। इतरः शतवर्ष प्रमृतिः तस्मिन्मृते कुरुध्वं इत्येवं प्रतिब्रूयात्। नमाचैवं पुनरिति। स वै ज्ञातयो पोप्यवयं त्यासप्त मात्पु रुषाद्दशमाद्वा
ज्ञातयः सपिंडाः समानोदकाश्च स वै एव अपोप्यवयंति। स्नानार्थं नद्यादेर्जलं प्रविशं
ति। किं यावत्। आसप्तमात्पुरुषात्। सप्तमं पुरुषमभिव्याप्य यावंतः सपिंडाः दशमाद्वाद
शमाद्वा पुरुषात्। आदशमं पुरुषमभिव्याप्य यावंतः समानोदकाश्च तावंत इत्यर्थः॥ स
मानग्रामवासे यावत्संबंधमनुस्मरेयुः। समानेएकस्मिन्ग्रामे वासः अवस्थानं समानग्रा

क्षार्थे यत्न २

मवासः। तस्मिन्सति। यावत्पदवधि संबंधं सापिंड्यं समानोदकत्वं सगोत्रत्वं वा अनु
स्मरेयुः। अस्मिन्पुरुषवयं संबध्या मह इति जानीयुः तावत्तः अपोभ्यवयंति। एकवस्त्राः प्रा
चीनावीतिनः सव्यस्यानामिकयापनोद्या पनः शोशुचदघमिति दक्षिणामुखा नि
मज्जंति। कथमित्याह। एकं परिधानीयमेव वस्त्रं येषां ते एकवस्त्राः प्राचीनावीतिनः रु
ता पसव्याः प्राचीनावीतं विद्यते येषां ते प्राचीनावीतिनः संतः सव्यस्य वामस्य पाणेः अ
नामिकया उपकनिष्ठिकया उदकमपनोद्य अपनः शोशुचदघमित्येतावता मंत्रेण प
सार्य दक्षिणामुखाः दक्षिणां दिगभिमुखाः निमज्जन्ति युगपत्सकृत्स्नांति। प्रेतायोद
कं सकृत्प्रसिंचंत्यंजलिना सावेतत्त उदकमिति। प्रेताय मृताय उदकं जलं सकृत्प्रसिंचं
ति शुद्धायां भूमौ प्रक्षिपंति कथम्। असौ प्रेत एतत्ते उदकं इत्यनेन मंत्रप्रयोगेण। उ
त्तीर्णाञ्छुचौ देशे शाड्वलवत्सुपविष्टांस्तैस्तैर्नानपवदेयुः। उत्तीर्णान् जलाद्बहिर्निर्गता

स्त्रशुचौमूत्रपुरीषमस्मनुषांगारास्थ्याद्यशु ... चिद्द्रव्यरहितेदेशेभूभागेपुनःकीदृशेंदू
लवतिाशाद्वूलंहरिततृणंतदस्मिन्नस्तीतिशाद्वलवान्तस्मिन् शाद्वलेति। उपविष्टान्
आसीनान्ततत्रअन्येलोक ... यात्रिकाःसुहृदःएतान्प्रेतस्यपुत्रादीन्अपवदेयुः। प्रेतस्य
गुणानुकथनेन ... तिहासपुराणादिविचित्रकथाभिःसंसारासारत्व
ख्यापनेनतान्शोकरहितान्कुर्युः। अनपेक्षमाणा ... ग्राममायन्त्विरीतीभूताःकनिष्ठ
पूर्वाः। अनपेक्षमाणंपश्चादनवलोकयंतः रीतीभूताः श्रेणीभूताःपंक्तीभूताःकनिष्ठ
पूर्वाःकनिष्ठोल ... धीयान्पूर्वःअग्निमायधांतेकनिष्ठपूर्वाःस्वस्वकनिष्ठानुसारिणइत्य
र्थः। ग्रामं। आयंतिाआगछन्ति। निवेशनद्वारेपिचुमंदपत्राणिविदश्याचम्योदकमग्निं
गोमयंगोरषर्पांस्तैलमालभ्याश्मशानमाक्रम्यप्रविशन्ति। निवेशनस्यप्रेतपतिकस्य
गृहस्यद्वारेपिचुमंदस्यानिंवस्यपत्राणिछेदातान्विदश्यदन्तैरवखंड्यआचम्यसमा

त्तैमाचमनंविधाय।उदकंजलंअग्निद्वारघृतंतथागोमयंमार्द्रसर्षपान्गौरावान्।तैलं
तिलसंभवंएतानिप्रत्येकमालभ्यस्पृष्ट्वाअश्मानंप्रस्तरंआक्रम्यपादेनाभ्यप्रविश
न्तिगृहं।त्रिरात्रंब्रह्मचारिणोधःशायिनोनकिंचनकर्म्मकुर्युर्न्नप्रकुर्वीरन्।।त्रीण्य
होरात्राणियावत्ब्रह्मचारिणःअकृतस्त्रीप्रसंगाःअधःस्वद्वाव्यतिरेकेणशेरतइ
त्येवंशीलाःअधःशायिनःकिंचनकिमपिकर्म्मगृहव्यापारादिलौकिकंनकुर्युः।नप्र
कुर्वीरन्अन्यैर्न्नकारयुः।क्रीत्वालब्ध्वावादिवैवान्नमश्नीयुरमांसंप्रेतायपिं
डंदत्वावनेजनदानप्रत्यवनेजनेषुनामग्राहं।क्रीत्वामूल्येनगृहीत्वालब्ध्वादात्रया
चितंअन्यतःप्राप्यदिवैवादिवसेएवनरात्रौअश्नीयुःभुंजीरन्।किंभूतंअमांसंमांस
वर्ज्जं।किंकृत्वाप्रेतायपिंडंअवयवपूरकंदत्वाकथंनामग्राहंप्रेतस्यनामगृहीत्वा
केषुअवनेजनदानप्रत्यवनेजनेषु।अवनेजनंचदानंच

१८४

कौष्

प्रत्यवनेजनं च अवनेजनदानप्रत्यवनेजनानि तेषु।म्नयेता ८ रात्रिं क्षीरोदके वि
हायसि निदध्युः प्रेतात्र स्नाहीति।मन्नये शरावादौ पात्रे कृत्वा तां यस्मिन् दिने प्रेते
मृत संबंधिनी रात्रिं क्षीरोदके क्षीरं च उदकं च क्षीरोदके दुग्धपानीयपात्रे कव
चनसामर्थ्यादेकीकृते विहायसि आर्कशीनि दध्युः स्थापयेयुः। प्रेतात्र स्नाहीत्य
नमंत्रेणाविद्वाने एवराचार्येस्तु द्रव्यद्वयनिधानसामर्थ्यात्। द्वयोः पात्रयोः नेद
न निधानं मन्यते। मात्रं चो हति। प्रेतात्र स्नाहि पिव चेदं इति। त्रिरात्रं शावमा
पा४ शौचं दशरात्रमेके॥ एवं प्रेतस्य पुत्रादीनां मरणादि दिनकृत्यमभिधायाशा
शौचकालनिर्णयार्थमाहा त्रिरात्रं त्रीण्यहोरात्राणि। कालाद्यनोरत्यन्तसंयोग इ
त्युपपदविभक्तिर्द्वितीया तेन सततं आशौचं अशुचित्वं एके आचार्याः मान्वादयः उप
नयनप्रभृति दशाहं मन्यंते। दशाहं दशाहोरात्राणि। अत्र प्रकरणे अहः शब्दो

त्रो१

रात्रिशद्भिश्च अहोरौंपलक्षकः। एके त्रिरात्रं एके दशरात्रं तत्त्वव्यवस्थितं वृत्तस्वा

ध्यायपेक्षयाय याह। एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः। त्र्यहात्केवलवे

दस्तु निर्गुणो दशभिर्दिनैरिति। एतदपि वृत्तिसंकोचव्यवस्थापकं॥ तद्यथा॥

यदा आह्निकोश्वस्तनिको वा स्वाध्यायसंपन्नो भवति। तदास्य वृत्तिसंपादनाय

सद्यःशौचं भवति। यदा तु कुम्भूलकुंभीधान्यः केवलस्वाध्यायसंपन्नश्च तदा त्रि

रात्रं। यदा दशरात्रं कुटुंबवृत्तिपर्याप्तातिरिक्तधान्यावृत्तस्वाध्यायवांश्च तदा

दशरात्रं। वृत्तस्वाध्यायपैरहितस्यवृ[illegible]त्तिहीनस्यापि सर्वदा दशरात्रमेवाश्र

यं च वृत्तिसंकोचात वृत्तस्वाध्यायापेक्षयायश्राशौचकालसंकोचः स वृत्तिसंपा

दनविषय एव। न पुनः कर्मान्तराधिकारसंपादकस्तेन यस्याशौचिनो या आप

द्भवति तदपाकरणार्थं वृत्तस्वाध्यायसंपन्नस्याशौचसंकोचानेतरेषांतरेजनन

१८५

१८५

न६

शौचेप्येवम्। नस्वाध्यायमधीयीरन्स्वाध्यायं वेदं नअधीयीरन् न पठेयुः। नचाध्या
पयेयुः। येषां यावदाशौचम्। नित्यानिवर्त्तेरन्वैतानवर्ज्जं। नित्यान्यावश्यकानि सं
ध्यावंदनादीनि निवर्त्तेरन् अनधिकारान्न प्रवर्त्तेत। कथम्। वैतानवर्ज्जं विता
नोगार्हपत्याहवनीयदक्षिणाग्नीनां विस्तारस्तत्रसाध्यं अग्निहोत्रादिकर्म विता
नंतद्वर्ज्जयित्वान्यन्निवर्त्तेतइत्यर्थः। शालाग्नौचैकेऽन्येन एतानि कुर्युः। शालाग्निः
आवसथ्यः तत्रशालाग्नौ साध्यानि सायंप्रातर्होम स्थालीपाकादीनि वर्ज्जयित्वानि
त्यानि निवर्त्तेरन्न इत्येके आचार्याः मन्यन्ते। तस्मिन्पक्षे नस्वयंकुर्यात्। किंत्वन्येन
कारयेयुः। गृह्यकारपक्षेन कुर्यान्नच कारयेत्। यथाह कात्यायनः॥ सूतके
मृतके चैव स्मार्त्तं कर्म्म निवर्त्तते॥ पिंडयज्ञं चरुं होम मसगोत्रेण कारयेत्। वै
तानिकं स्वयंकुर्यात्स्मार्त्तं कर्म्म निवर्त्तते स्मार्त्तं कर्म परित्यागो राहोरन्यत्र सूतके।

२५

१८६

श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयात्। इतिस्मरणात्। राहुदर्शनेतुराहोरन्यत्रसूत
कवचनात्। यावद्राहुदर्शनंतावद्राहुदर्शननिमित्तकंस्नानतर्पणदेवार्चनजपहोमदान
स्मार्त्तकर्मकुर्यात्। प्रेतस्पर्शिनोग्रामंनप्रविशेयुरानक्षत्रदर्शनात्। प्रेतस्पर्शोविद्य
तेयेषांतेप्रेतस्पर्शिनःसपिंडाःग्रामंनप्रविशेयुःनगच्छेयुः किंयावत्आनक्षत्रदर्शनात्। न
क्षत्राणांदर्शनंतस्मात्। आङभिविधेः। रात्रौचेदादित्यस्यचेयदिरात्रौनिशिप्रेतस्पर्शःत
दाआदित्यस्यसूर्यस्यदर्शनात्। आकूनप्रविशेयुरित्यनुषंगः। प्रवेशनादिसमानमित
रैः। प्रवेशनमादौयस्यनिंबपत्रदशनस्यतत्प्रवेशनादिकर्म्मइतरैरसपिंडैःसमानंतु
ल्यंअसपिंडानामयंनियमः। असपिंडानांतुप्रवेशनादिकंकर्म्मप्रेतसंस्पर्शिनामपि॥
रक्षेत्तांतत्क्षणशुद्धिःपरेषांस्नानसंमयात्। इतियाज्ञवल्क्योक्तेरिच्छतांविकल्पःसंयमः
प्राणायामः। एवंब्राह्मणस्यआशौचमभिधायाधुनाइतरवर्णानामाशौचकालनिर्णयमाह॥

१८६

१ab

पक्षं द्वौ वाशौचं। पक्षं पंचदशाहोरात्राणि वैश्यस्याशौचं भवति। द्वौ पक्षौ त्रिंशदहोरात्राणि
शूद्रस्य। वाशब्दात् द्वादशाहोरात्राणि क्षत्रियस्य। तथा च स्मृत्यंतरं। शुध्येद्विप्रो दशाहेन द्वा
दशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यतीति। आचार्ये चैवं मातामहयो
श्च। आचार्ये उपनयनपूर्वकं वेदाध्यापके च उदकदानादिकर्तव्यम्। मातामही मातामहश्च
मातामहौ तयोः मातामहयोः चकारादेवमेवोदकदानादिकर्तव्यं। स्त्रीणां वाप्रत्तानां अप्रत्ता
नामपरिणीतानां च स्त्रीणां कन्यानां चकारात् एषैव निखननदहनोदकदानप्रभृतीति
कर्तव्यता। आशौचेपि विशेषोग्र्यकारमते नास्त्यनभिधानात्। स्मृत्यंतरे पुनर्दृश्यते। अहस्त
दत्तकन्यास्विति। एतच्चूडाकरणानंतरं दानात्प्राक्। कुतः स्त्रीणां चूडा तथा दानात्संस्कारा
दप्यधः क्रमात्। सद्यः शौचमथैकाहस्त्र्यहः स्यात्पितृबंधुषु। इति स्मृतेः। तस्मादपरिणी
तानां स्त्रीणां चूडाकरणात्प्राक् सद्यः शौचम्। चूडाकरणादुपरि दानात्प्रागेकाहं ततः चूडा

करणानंतरं दानाशाकृ(न)कुतः उपरि विंहात्प्राकृ अहमिति निर्णयः। प्रत्तौ मित्तरे कुर्यु
स्ताश्च तेषां। प्रत्तानां परिणीतानां स्त्रीणां इतरे भर्त्रादयो हादिकर्म कुर्युरन्। न पित्रा
दयः। ताश्च प्रत्ताः स्त्रियः तेषां भर्त्रादीनां यथा[illegible]धिकारमु[illegible]दक[illegible]दानादिकर्म कु
र्युः। पित्रादीनां मंत्रविशेषः। दत्तानां नारीणां पितुर्गेहे सूयते म्रियते पिवा। तद्बंधुवर्ग
स्त्वेकेन शुध्यते जनकस्त्रिभिरिति वचनात्।। प्रत्तानामपि पितुर्बंधूनां च आशौचाप
त्तिमात्रं। प्रोषितश्चेत् स्त्रिया श्रवणप्रभृति कृतोदकाः कालशेषमासीरन्। प्रोषितः
प्रवासंगतः। चेद्यदि श्रेयात् म्रियेत तदा तत्पुत्रादयः तन्मरण[illegible]श्र[illegible]वणकालमारभ्य
कृतं दत्तं [illegible] स्नानपूर्वकमुक्तविधिनौयेः ते कृतोदकाः संतः कालशेषमासीरन् आशौ
चसमयशेषमासीरन् आशौचं धर्मेण वर्तेरन्नित्यर्थः। अतीतश्चेद्दैरात्रं त्रिरात्रं वा। का
लातीतः प्रोषितमरणं च श्रुतं तदा एकरात्रमाशौचं त्रिरात्रं वा। अत्र यद्यपि सामान्येना

सं तथापि स्मर्त्यन्तरात् विशेषो वसातव्यः। कथं। मासत्रये त्रिरात्रं स्यात्षण्मासात्पक्षिणी
भवेत्। अहस्तु नवमादर्वाक् सद्यः शौचमतः परं। तथापितरौ चेन्मृतौ स्यातां दूरस्थोपि
हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति। अथ कामोदकान्यृत्विक्श्वशुर
सखिसंबंधिमातुलभागिनेयानां प्रत्तानां च। अथ नियमेन कृत्यमभिधाय कामतः कृत्यमाह।
कामोदकानि कामेन उदकपा उदकानि उदकदानानि भवन्ति। केषां। ऋत्विक् याजकः। श्वशुरो
भार्यामातापितरौ। सखा मित्रं। संबंधिनो वैवाह्याः। मातुला मातृभ्रातरः। भागिनेयाः भगिनी
पुत्राः। एतेषां प्रत्तानां च। प्रत्तानां ऊढानां दुहितृभगिन्यादीनां च स्त्रीणां उदक्या उदकदानं।
अदाने प्रत्यवायो नास्ति। एकादश्यामयुग्मान् ब्राह्मणान्भोजयित्वा मा॰ सवत्सेनायोद्दिश्य
गामप्येके ब्रुवन्ति। एकादश्यां एकादशेहनि ब्राह्मणान् कर्त्तोऽयुग्मान् त्रिप्रभृतीन् विषमसंख्या
कान् ब्राह्मणान् द्विजोत्तमान् भोजयित्वा भोजनं कारयित्वा श्राद्धविधिना मांसवता। मांसेन श्रा

पि४

न२

ष्ठं कुर्वन्ति। तच्छ्राद्धमग्रे वक्ष्यति। न चांतरेतावं कारयेन्न वेति। पिंडप्रकरणे प्रथमः पितृ
णां प्रेतः स्यात्पुत्रवांश्चेत्। पिंडानां करणं निर्वपणं पिंडकरणं तस्मिन्नमावास्यायां साग्नेः पु
त्रस्य पिंडपितृयज्ञे तत्र पितॄणां प्रथमः श्राद्धः प्रेतः स्यात्तत्रस्थति पिंडदानमित्यर्थः। वे
यदि स प्रेतः पुत्रवान् अधिकृतेन साग्निना पुत्रेण पुत्री भवति अयमर्थः साग्नेः पुत्रस्य य
दि पिता म्रियेत तदा पिंडपितृयज्ञानुष्ठानानुरोधेन द्वादशाहनि सपिंडीकरणं विधा
य। अमावास्यायां पिंडपितृयज्ञे पिंडदानं पिंडान्वाहार्यकं श्राद्धं च तत्प्रभृति या वर्षेणैव
श्राद्धं भवतीति। एकोद्दिष्टं तु निरग्निविषयं निवर्तेत च चतुर्थः। सपिंडने कृते पित्रादिभ्यस्त्रि
भ्यः पिंडदानं च तुर्थः पिंडो निवर्तेत। पिंडास्त्रिष्विति श्रुतेः। त्रिषु पिंडः प्रवर्तेत इति स्मृते
श्च। संवत्सरं पृथगेको एके आचार्याः साग्नेरपि पुत्रस्य संवत्सरं यावत्पृथक् एकस्यैव
पितुः पिंडदानमिच्छन्ति। संवत्सरे सपिंडीकरणमिति स्मरणात्। न च असपिंडीकृतस्येतरैः ।

सहदानंयुज्यते। सपिंडीकरणमितिशब्दः सहपूर्वजैः सपिंडमपिंडीकरणं एकीकरणं मेलनमिति यावत् इतिव्युत्पत्त्या अन्वर्थः तेन संवत्सरंयावत् असपिंडीकृतस्यपितुः प्रेतस्यएकोद्दिष्टमित्येकेत एषा सति संवत्सरे सपिंडीकरणमितिस्मृतेरनुग्रहः कृतो भवति। एवं प्राप्तउच्यते। न्यायस्तु। तुशब्देन पूर्वपक्षव्यावृत्तिः नैतदेवं स्मृत्यनुग्रहन्यायेन इदं परिकल्प्यते। ततः श्रुतिविरोधात्। कालो श्रुतिः नचतुर्थः पिंडो भवतीतिहि श्रुतिः। कथं श्रुतिविरोधः। शृणु अधिकृतस्यसाग्नेः एकोद्दिष्टमाणे चतुर्थोम पिपिंडनिर्वपणे विकारो भवति। अमावास्यायां एकोद्दिष्टस्यपार्वणं वत्रयाणामिति भवति श्रुतिविरोधः। तेनाधिकृतस्य पुत्रस्यसाग्नेः सपिंडीकरणं ऊर्ध्वं एकोद्दिष्टं कर्तव्यं न भवति। सपिंडीकरणं तु द्वादशाहएवनियतं अनधिकृतस्यनिरग्नेस्तु संवत्सरादिषु सपिंडीकरणकालेषुकृतसपिंडनस्यापि पितुः संवत्सरादूर्ध्वमपिप्रतिसंवत्सरं एकोद्दिष्ट

मेवा। अहरहरन्नमस्मै [illegible] ब्राह्मणायोदकुंभं च दद्यात्। अहरहः प्रतिदिनं अ-
स्मै प्रेतायोद्दिश्य ब्राह्मणाय संप्रदानभूताय अन्नं भोजनपर्याप्तं उदकुंभं च जलपूर्णं च
त्वरं संवत्सरं च यावत् दद्यात् अपच्छेत्। पिंडमप्येके निपृणंति। एके आचार्याः अहरहः
पिंडनिर्वपणमपीच्छन्ति। तच्चानधिकृतनिरग्निविषयम्। अधिकृतस्याहिताग्नेणमेवम-
वतिनैकपिंडः। नचैतत्प्रतिदिनमन्नोदकुंभदानं संवत्सरे सपिंडीकरण [illegible] पक्षएव॥
प्रागपि संवत्सरात्। यदि वा वृद्धिरापद्यत इत्यादिविहितकालान्तरे सपिंडीकरणेऽपि
तदूर्द्ध्वं संवत्सरं यावत् भवत्येव। यतः स्मरंति। अर्वाक् संवत्सरात् यस्य सपिंडीकरणं
भवेत्। तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विज इति तस्मात्साग्निना निरग्निना च पु-
त्रेण अहरहरन्नोदकुंभदानं कर्तव्यं पक्षे यत्पिंडदानं तन्निरग्नेरेवैकस्मै इतरस्यात्र-
यः पिंडदानं प्रसज्येत एकपिंडनिर्वपणनिषेधात्। ताहि [illegible] त्रिभ्योऽपि दद्यात् न वृ-

१८९

तस्याहिनत्समर्यते। मृताहनि[illegible]तु कर्तव्यं प्रतिमासं तु वत्सरं प्रतिसंवत्सरं चैवमाद्यमेकाद
शेहनीत्येतदेकोद्दिष्टं साग्नेः सपिंडीकरणात्प्राक्। ऊर्द्ध्वं तु पार्वणमेव यथाह मनुः। असपिं
डक्रियाकर्म द्विजातेः संस्थितस्य तु। अदैवं भोजयेच्छ्राद्धं पिंडमेकं तु निर्वपेत्। तथा। सहपिं
डक्रियायां तु कृतायामस्य धर्मतः। अनयैवावृता कार्यं पिंडनिर्वपणं सुतैरिति। स्मृत्यन्तरं च।
यः सपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत्। विधिघ्नस्तेन भवति पितृहा चोपजायते। ए
तच्च औरसक्षेत्रजसाग्निपुत्रविषयं। यतः स्मरंति। औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। दद्या
तामितरे कुर्युरेकोद्दिष्टं सुता दशेति। अत्राशौचप्रसंगात्स्मृत्यन्तरोक्तं अशौचापवाद उल्लि
ख्यते। ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। सत्रिव्रति ब्रह्मचारि दातृ ब्रह्मविदां तथा।
कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः।

१९०. 190

नर

एतद्व्ययज्ञादौ आरब्धे कुतः। आरब्धे सूतकं नास्ति अनारब्धे तु सूतकमिति वचनात्। आरंभ
श्चैवम्। आरंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रि
येति। इति सूत्रार्थः॥ ॐ॥ अथ पद्धतिः। तत्र ऊ द्विवार्षिकं प्रेतं अरण्यं नीत्वा भूमौ निखनेत्
उपनयना[illegible] दर्वाक्। प्रेतं श्मशानं नीयमानं सर्वे सापिंडाः यथा ज्येष्ठपुरःसरं पंक्तीभू
ता अनुगच्छन्ति। पश्चाद्यमगाथां गायंतो यमसूक्तं च जपंतः ततस्त[illegible]त्रैतं प्रेतं भूमिजोषणा
दिरहितं दग्धा वक्ष्यमाणविधिना स्नात्वा उदकांजलिं च दत्वा गृहमागत्य यथोक्तं शौच
मावरेयुः। उपनयनादूर्द्ध्वं भूमिजोषणादि उदकांतगमनपर्यंत यथाहिताग्नेः कर्म तथैव
यथासंभवं भवति। अत्रवक्रौपासनिकं पुत्रादिरधिकार दुर्वलं ज्ञात्वा स्नापयित्वा शुद्धवस्त्रे
णाछाद्य दक्षिणशिरसं दर्भवत्यां भूमौ संनिवेशयेत्। [illegible]पक्षे तु रात्रौ चेन्मृतस्तु शंकाग्नि हो

द्विवर्ष प्रेतेति

१९०

दिवा सायमाहुतिं वा तत्कर्मणोरक्षार्थं रक्षत्वात्र २ त्रुटि:

त्रिणः कृत्वा वशिष्टाः पक्षेऽस्मिन् न तु कुर्यात् सकलाहुतीः। दार्शे तत्र पिंडपितृयज्ञं विना आ
कृष्य कुर्यान्न तु पौर्णमासं भुक्तपक्षे आकृष्य कुर्यात्। अथ तत्रैवेतरणीं यथाशक्ति यथाश्र
द्धं हिरण्यभूम्यादिकं सर्वपापक्षयार्थं दापयित्वा। थगतासु ज्ञात्वा छेत्ताभ्यस्य उदकेना
प्लाव्य सवस्त्रमुपवीतिनं चंदनोक्षितसर्वांगं पुष्पमालाविभूषितं मुखनासिकाचक्षुश्रो
त्रं छिद्रेषु निक्षिप्त हिरण्यशकलं वस्त्रेणाच्छाद्य पुत्रादयो निर्हरेयुः। एतच्चावसथ्याग्निसं
निधौ गृहे मरणपक्षे यदा तु गंगादितीर्थेऽग्निसंनिधौ अर्द्धे जले मरणं तदा तत्रैव स्नापना
दि हिरण्यशकलनिधानांतं कुर्यात्। निर्हरणपक्षे आमपात्रे अग्निमादायाग्निपुरःसरं प्रे
तयमगाथां गायंतो ज्ञातयः अभितो षण्णूबेकं दक्षिणेन रायतं दारु च यथाविधाय चितौ कृष्णा
जिनं ... ग्रीवमुत्तरलोमास्तीर्य तत्रोत्तानं दक्षिणशिरसमेनं निपात्य दक्षिणेनास

रं चैव अन्य पूर्णंस्रुवं निधाय पादयोरधरारणिं प्रागग्रामुत्तरस्पुत्तरां पार्श्वयोः सव्यद
क्षिणयोः शूर्प्पं च मध्ये मुसलसहितमुलूखलं न्युब्जं भूवौरंतराले तत्रैव चात्र मौविली
चक्रुरुदन्नभयराहितो निदध्यात्। अपसव्येन वाम्यतो दक्षिणामुखः सन्नरत्न्यौविश्य
सव्यं जान्वाच्यो [illegible] पासनाग्निं गृहीत्वा अस्मात्वमधिजातोसीत्यनयर्चा स्वाहां तया दक्षि
णतो मुखे वा शनैरग्निं दध्यात्। अनावसथ्यके तु एवमेव ग्रामाग्निनाग्नं मंत्रकं दहक्षि
ततो दाहान्तेन घापुदकसमीपं गत्वा समीपस्थं यानि संनद्धं श्यालकं बा उदकं करि
ष्यामहइत्यनेन मंत्रेण उदकं पावेरन्नु सपिंडादयः एवं याचिते शतवर्षो दर्वाकृत्रेतो
नवति तदा कुरुध्वं मावैवं पुनरित्येवं प्रतिवचनं दद्यात्। अथ शतवर्षा इर्द्धे भवेतो न
वति तदा कुरुध्वमित्येतावदेव ततः सप्तपुरुषसंबंधिनः सपिंडाः दशपुरुषसंबंधाः
समानोदकाः स्वेकग्रामवासेयावत्स्यतं संप्र [illegible] विशन्ति॥ एकवस्त्राः प्राचीनावी

ति नः संतः ततः सव्यस्य हस्तस्यानामिकयांगुल्या उदकमापनो घापनः शोशुचदघमित्य
तावता मंत्रेण दक्षिणमुखाः तूष्णीं निमज्जन्ति ततः प्रेतमुद्दिश्यामुकगोत्रामुकशर्मन्न
प्रेत एतत्त उदकमित्युच्चार्यैकैकमंजलिं सकृत्सकृद्भूमौ प्रक्षिपन्ति ततउदकादुत्तीर्य शुद्धे
देशे शाद्वलवत्युपविष्टान् सपिंडादन्यः अन्ये सुहृदः इतिहासपुराणादिविदग्धकथा
भिः संसारानित्यतां दर्शयंतोपवदेयुः तथाहि कृतोदकान्समुत्तीर्य [illegible] मृदुशाद्वलसं
स्थितान्स्नातानुपवदेयुस्तानितिहासैः पुरातनैः मानुष्ये कदलीस्तंभनिःसारे
सारमार्गणं करोति यः स संमूढो जलबुद्बुदसन्निभे पंचधा संभृतः कायो यदि पं
चत्वमागतः कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना गंत्री वसुमती नाशमुदधिर्दै
वतानि च फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति। श्लेष्माश्रु बांधवैर्मुक्तं प्रे

१९२

तो भुंक्तेयत्तो वशाः। अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः इति संश्रुत्य गच्छेयुर्गृहं बालपुरः
सराः। विदर्श्यानि वपत्राणि नियतानि द्वारि वेश्मनः। मा शोकं कुरुतानित्ये संसारेऽस्मिन्प्राणिधर्मिणि।
धर्मं कुरुत यत्नेन यो वः संगतिमेष्यति॥ विष्णुः यदुदगयनं तदहर्देवानां दक्षिणायनं रात्रिः संवत्सरो
ह्यहोरात्रं तत्त्रिंशता मासस्तद्द्वादश वर्षं द्वादशवर्षशतानि दिव्यानि कलियुगं द्विगुणानि द्वा
परं त्रिगुणानि त्रेता चतुर्गुणानि कृतयुगं एवं द्वादशसहस्राणि दिव्यानि चतुर्युगं तत्सहस्रं तु क
ल्पः स च पितामहस्याहस्तावती चास्य रात्रिरेवंविधेनाहोरात्रेण मासवर्षगणनया सर्वश्रेष्ठस्ये
व ब्रह्मणो वर्षशतं युः ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसस्तस्यान्ते महाकल्पस्तावत्येव
चास्य निशा पौरुषाणामहोरात्राणामतीतानां संख्यैव नास्ति न च भविष्याणामनाद्यन्तत्वा
त्कालस्य एवमस्मिन्निरालंबे काले संततयायिनि तत्तद्रूपं न पश्यामि स्थितिर्यस्य भवेद्ध्रु
वा। गंगायाः सिकताधारास्तथा वर्षति वासवे। शक्या गणयितुं लोके न व्यतीताः पितामहाः।

वतुर्दश वै विनश्यन्ति कल्पे कल्पे सुरेश्वराः सर्वे लोकप्रधानाश्च मनवश्च चतुर्दश वहूनीन्द्र
सहस्राणि देवेन्द्राणि युतानि वा विनष्टानीह कालेन मनुष्यस्य तु का कथा ॥ राजर्षयश्च बह
वः सर्वे समुदिता गुणैः देवर्षयश्च कालेन सर्वे ते निधनं गताः। ये समर्था जगत्यास्मिन् सृष्टिसंहा
रकारिणः। तेऽपि कालेन नीयन्ते कालो हि बलवत्तरः। आक्रम्य सर्वे कालेन परलोकाय नी
यते। कर्मपथ्योदनो जन्तुस्तत्र का परिदेवना। तस्य हि ध्रुवो मृत्युर्ध्रुवं तन्मृतस्य च अर्थे
दुःपरिहार्येस्मिन्नास्ति कः सहायता। शोचन्तो नोपकुर्वन्ति मृतस्येह जनायतः। अतो न रो
दितव्यं हि क्रियाः कार्याः स्वशक्तितः। सुकृतं दुःकृतं वा भो सहायो यस्य गच्छतः। बांधवैस्तस्य
किं कार्यं शोचद्भिरथवा तथा। बांधवैर्नामशोचद्भिः स्थितिं प्रेतो न विन्दति। अशवस्य पति
तान्येव पिंडतोयप्रदायिनः। अशौचे सपिंडीकरणं प्रेतो भवति वै मृतः। प्रेतलोकगतस्यान्नं

सोदकुंभं त्रयह्यति। देवतायतनस्थाने तिर्यग्योनौ तथैव च। मनुष्येषु तथा प्रेति श्राद्धं दत्तं स्वबांध
वैः। प्रेतस्य श्राद्धकर्तुश्च पृथक् श्राद्धकृते ध्रुवं। तस्मात् श्राद्धं सदा कार्यं शोकं त्यक्त्वा निरर्थकम्
एतावदेव कर्त्तव्यं सदा प्रेतस्य बंधुभिः। नोपकुर्यान्नरः स्मृत्या चापरपक्षे पित्रोः प्रोषितमृतस्या
स्थिभिः। पर्णशरैर्वा प्रकृतिं कृत्वा दहेयुः। तथा। पलाशवृन्तमानीय शिरश्चत्वारिंशतं। ४० शि
रसि १० ग्रीवायां ३० उरसि २० उदरे १०० भुजद्वये १० हस्तांगुलीषु द्वयमत्स्ययोः ४ शिश्ने १०० ऊरु
द्वये ३० जानुद्वये १० पादांगुलीषु एवं ३६०। शौचं तत्प्रेतस्यात्मन एव वा। दृष्ट्वा लोकमनानंदं
म्रियमाणं च बांधवान्। धर्ममेकं सहायार्थं वरयध्वं सदा नराः। मृतोपि बांधवः शक्तो नानु
गंतुं मृतं नरम्। जायावर्ज्जं हि सर्वस्य याम्यः पंथा विभिद्यते। प्रथमे मूर्द्धसंभूत्यै द्वितीये
चक्षुः श्रोत्रनासिकासंभूत्यै। तृतीये भुजहृदयवक्त्रग्रीवासंभूत्यै। चतुर्थे नाभिस्थाने उदर
लिंगसंभूत्यै। पंचमे पृष्ठ्यादिजन्मसं षष्ठे सर्वमर्म्माणि सप्तमे सर्वरोमाणि शिरांसि वा। संभ्र
भूत्यै १

ष्टमे पाद दृयसं। नवमे वीर्यसंपत्तिः॥ दशमे क्षुत्पिपासया। धर्म एको नुमात्येनं यत्र क्वचन
गामिनं। तस्मात्सारे त्रिलोकेस्मिन्धर्मं कुरुत मा चिरं॥ श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकं।
नहि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतं। क्षेत्रापणगृहासक्तमन्यत्रगतमानसं। वृकी वोरण
मासाद्य मृत्युरादाय गच्छति। न कालस्य प्रियः कश्चिद्द्वेष्यश्चापि न विद्यते। आयुष्ये क
र्मणि क्षीणे प्रसह्य हरते जनम्। नाप्राप्तकालो म्रियते विद्धः शरशतैरपि। कुशाग्रेणा
पि संस्पृष्टः प्राप्तकालो न जीवति। नौषधानि न मंत्राश्च न होमा न पुनर्जपाः। त्रायंते मृत्यु
नोपेतं जरया वापि मानवम्॥ यथा धेनुसहस्रेषु वत्सो विंदति मातरं। तथा पूर्वकृतं कर्म
कर्त्तारमनुगच्छति॥ आगमिनमनर्थं हि प्रतिष्ठानशतैरपि। न निवारयितुं शक्तस्तत्र का परि
वेदना। यथा काष्ठं च काष्ठं च समेयातां महोदधौ। समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥

पे१ दृ१

१९४ 194

रामयणे। शोचमानास्तु सह स्नेहाद्बांधवाः सुहृदस्तथा॥ पातयंति जनं स्वर्गाद्दश्रुपातेन रा
घव। श्रूयते हि नरव्याघ्र पुरा परमधार्मिकः। भूरिद्युम्नो गतः स्वर्गं राजा पुण्येन कर्मणा। स पुन
र्विधुवर्गस्य शोकबाष्पगुणे राघव। कृत्स्नेन च्यावितेधर्मे पुनः स्वर्गान्निपातितः। अतिशोकाग्नि
ना दग्धः पिता ते स्वर्गतः प्रभुः। शापेत्त्वां मन्युनाविष्टः तस्मादुत्तिष्ठ मा शुचः॥ ततः पश्चाद्दनव
लोकयंतः कनिष्ठानयतः कृत्वा र्यज्ञीभूता ग्राममायां समागम्य गृहद्वारे स्थित्वा निंबपत्राणि
दंतैरवखंड्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमित्यनुक्रमेणालभ्य पादेनाश्मानमा
क्रम्य गृहं प्रविशन्ति। ततः प्रभृति त्रिरात्रं यावत्। ज्ञातीनां यमनियमा उच्यंते। ब्रह्मचर्यम
धःशयनं लौकिकं कर्माकरणमन्यपाकं कुर्युरित्यपरे क्रीत्वा लब्ध्वा वा दिवैव भोजनं मांस
वर्जनं चैते च नियमाः ज्ञातीनां पुत्रादीनां यावदाशौचम्। अथ यस्तेषां मध्ये प्रेतक्रियाधिकारी
पुत्रादिः दशरात्रं यावत् प्रत्यहमेकैकं पिंडं प्रेताय दद्यात् आशौचादिनहानौ व द्वौ वा

क३

१९४

कथम्१

दशैवपिंडान्दिनानिविभज्यदद्यात्।अमुकगोत्रामुकशर्म्मन्प्रेतअवनेनिक्ष्वाततोदर्भान
स्तीर्यअमुकगोत्र।अमुकशर्मन्प्रेतएषतेशिरःपूरकःपिंडोमयादीयतइतिपिंडंदत्वापूर्ववत्
पुनरवनेजनंततोनुलेपनपुष्पधूपदीपशीतलतोयऊर्णातंतुदानंपिंडेस्मरत्यन्तरोत्कमपि
कुर्यात्।अथयस्मिन्नहोरात्रेसम्रियतेतस्यांरात्र्यांमृन्मयेपात्रेक्षीरोदकेकृत्वापश्चादिक
मवलंब्याकाशेधारयेत्।तत्रस्नाहिपिबक्षीरमित्यनेनमंत्रेण।ततोद्वितीयादिषुनवसु
दिनेषुप्रत्यहंअनेनैवविधिनाएकैकपिंडमवयवपूरकंदद्यात्।क्षत्रियश्चेन्नवमेह
निनवमंपिंडंदत्वादशमंद्वादशेहनिदद्यात्।वैश्यश्चेत्पंचदशेहनिशूद्रश्चेत्त्रिंशत्तमे।
इतिशेषः।तथैवएकैकमंजलिंएकैकंजलपात्रंवद्विपक्षेतुअंजलीनांपात्राणांचदिनसंख्य
याएकैकंवर्द्धयेत्तत्रवाक्यम्।अमुकगोत्रामुकप्रेतएषतेतिलतोयांजलिःमयादत्तःतवो

पतिष्ठत्वाम्‌। अमुकगोत्रप्रेत एतत्ते तिलतोयपात्रं मया दत्तं तवोपतिष्ठताम्‌। सद्यःशौचपक्षे
तु एकस्मिन्नेव दिने क्रमेण दश पूरकान् पिंडान् पंचपंचाशत्तोयांजलीन् पंचपंचाशत्तोय
पात्राणि च दद्यात्‌। त्र्यहाशौचे पुनः प्रथमदिने त्रीन् पिंडान् षडंजलीन् षट् पात्राणि।
द्वितीयदिने चतुरः पिंडान् द्वाविंशत्यंजलीन्‌। द्वाविंशति पात्राणि। तृतीयदिने त्रीन् पिं
डान् सप्तविंशत्यंजलीन् सप्तविंशति पात्राणि दद्यात्‌। यतः स्मरंति प्रथमदिवसे देया
स्त्रयः पिंडाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसंचयनं तथा। त्रींस्तु दद्यात्तृती
येह्नि वस्त्रादि क्षालयेत्ततः। केचित्तु प्रथमदिने एकं पिंडं एकमंजलिं एकं पात्रं द्वितीयदि
ने चतुरः पिंडान् चतुर्दशांजलीन् चतुर्दश पात्राणि। तृतीयदिने पंच पिंडान् चत्वारिंश
दंजलीन् चत्वारिंशत्पात्राणि दद्यादित्याहुः। एतत्प्रेतकृत्यानंतरं न पुनः स्नायात्‌।

स्मरणमात्रात्। पिंडे दशवयवपूरणं यथा। शिरः प्रथमेनाकर्णाक्षिनासिका द्वितीयेन गलां
सभुजवक्षांसि तृतीयेन नाभिलिंगगुदानि चतुर्थेन जानुजंघापादाः पंचमेन सर्वमर्मा
णि षष्ठेन नाडिकाः सप्तमेन लोमान्यष्टमेन वीर्यं नवमेन शरीरपूर्णत्वं दशमेनाप्ततद्व्रत

२४ निर्हरणादिकं यतिव्यतिरिक्तानां त्रयाणां आश्रमिणां कुर्यात्। यतेस्तु न किंचित्। तथा च स्मृ स्तु
तिः। त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः। यतेः किंचिन्न कर्तव्यं न चान्येषां करोति स
इति तथा। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रिया। न कुर्यात्पार्वणादन्यत् ब्रह्मीभूता
य भिक्षवे। अहन्येकादशे प्राप्ते पार्वणं तु विधीयत इति। ब्रह्मचारी च आचार्योपाध्यायपितृव्य
तिरिक्तानां प्रेतानां निर्हरणादिकं कुर्यात्। यथाह याज्ञवल्क्यः। आदिष्टी नोदकं कुर्यात् व्रत
स्य तु समाँनात्। समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्। तथा आचार्यपित्रुपाध्यायान्निर्हृ

प१ ता३

१९६

स्यापि व्रती व्रती। स एकान्नं न चाश्नीयान्न चैतैः सह संविशेत्॥ इति। यदि मोहात्करोति न दा ब्र
ह्मचर्यं ह्यवते। पुनरुपनयनेन शुद्ध्यति। तथा ऽस्थिसंचयनं ब्राह्मणस्य चतुर्थेऽहनि। पं
चमे क्षत्रियस्य नवमे वैश्यस्य एकादशे शूद्रस्य। अहाशौचे द्वितीये ऽह्नि सद्यः शौचेषां सद्यः शौ
चे तु दाहानंतरमेव। तत्रास्थिसंचयननिमित्तं एकोद्दिष्टं श्राद्धं विधाय पुष्पधूपनैवेद्यानि सं
स्यत्यर्तुं क्रव्यादमुखेभ्यो देवेभ्यो नम इति मंत्रेण अर्घ्यादिना पूजां कुर्यात्। श्मशाने। ततः क्र
व्यादमुखेभ्यो देवेभ्यो बलिदानम्। तत्र मंत्रः॥ ये ऽस्मिन् श्मशाने देवाः स्युर्भगवन्तः सनात
नाः। तस्मात्सकाशाद्गृह्णंतु बलिमष्टांगमक्षयम्॥ प्रेतस्यास्य शुभाल्लोकान् प्रयच्छंत्वपि
शाश्वतान्। अस्माकं चायुरारोग्यं सुखं च ददतां वरः॥ एवं बलिं कृत्वा विसर्जयेत्। ततो ऽपस
व्यं कृत्वा पलाशवृंतेनास्थीनि परिवर्त्यांगुष्ठकनिष्ठाभ्यां आदाय पलाशपुटे धारयति। त
त्र शमीशैवलं कर्दमं च धारयति। ततो दुग्धेन काश्वौषधिमिश्रितान्यस्थीनि दद्वि

श्व ३

१९

ण पूर्वोयत्तां कर्षूयवाकारां खात्वा कुशानास्तीर्य हरिद्रया पीतवस्त्रखंडं निपात्य तत्र वह्म
माणमंत्रेण निक्षिपेत् । [illegible]र्दुर्वामनसा तेन ब्रह्मणा त्र्यम्बविद्यया पृथिव्यामन्त्रितायामंत्रेण
असो स्थानप्रेतनामादेशः स्वेन निर्वपाम्यसो इति ततः कुंभेन निधाय तत्र शीतं कुंभं प्ररण्ये
वृक्षमूले वाम्भसो खात्वा धारयेत् ॥ भस्म चितास्थितं सर्वमेव तोये निक्षिपेत् । चिताभूमिं च गो
मयेन लिप्य तत्र तेनैव पूर्वोक्त बलिमंत्रेण ब[illegible]लिं दद्यात् । तं च बलिं क्षीरेणाभ्यज्य देवताधि
सर्जयेत् । चिताभूमि[illegible]च्छादनार्थं च तत्र वृक्षं प[illegible]द्वर्कं वाकारयेत् । समाविश्रामार्थं काष्ठपाषा
णाधिन्यासविशेषः पट्टकः पर[illegible]रा इति कान्यकुब्जे प्रसिद्धः । लोकाचारादेव कुंडीवा । त
तः कदाचित् अस्थिकुंभं उद्धाप्य दायती र्थं गच्छेत् । अस्थीनि मातापितृवंशजानां नय
न्ति गंगामपि येकदाचित् । सद्धं धवोस्थापिदयाभिमृतास्तेषां च तीर्थो निफलप्रदा नि त

तश्च गंगां गत्वा स्नात्वा पंचगव्येनास्थीनि सिक्त्वा हिरण्यमध्वाज्यतिलमिश्रितानि कृत्वा मृत्पिंडे
निधाय दक्षिणां दिशं वीक्ष्यन् नमोस्तु धर्माय इति वदन्। जलं प्रविश्य स मे प्रीतः इत्यभिधाय
गंगांभसि निक्षिप्य जलादुत्थाय सूर्यमवेक्ष्य विप्रमुख्याय यथाशक्ति दक्षिणां दद्यात्। एवं
कृते प्रेतक्रियाकर्तृः स्वर्गगतिः स्यात् महेंद्रतुल्यो यावदस्थि मनुष्याणां गंगातोयेषु तिष्ठति।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते। यमः। गंगातोयेषु यस्यास्थि प्लवते शुभकर्मणः। न तत
स्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन। गंगातोयेषु यस्यास्थि नीत्वा संक्षिप्यते नरैः। युगा
नां तु सहस्राणि तस्य स्वर्गे स्थितिर्भवेत्। मातुः कुलं पितृकुलं वर्जयित्वा नराधमः। अस्थीन्यन्यकुल
स्य नीत्वा चांद्रायणं चरेत्। एतच्च वृद्धव्यासादिभिर्लोभेन नयतः। न तु श्रेयोर्थिनः। अथ सांगतः पतित
यदि जीवद्भर्तृका म्रियेत तदा कोटिदक्षिणा वाराह्नौरं नाडुः। अन्यो विधिः सर्वोप्युक्तो भवति॥

गर डु:

र्त्तरि मृते यदि म्रियेत तदा अरण्यंतरं संपाद्य ततो निर्मथ्येनाग्निना पात्रैर्विना तां दहेत्॥
तदभावे लौकिकाग्निना॥ एवं पश्चान्मृतस्य पुंसो ऽपि भवति। अन्वारोहणे तु पृथगाहुतिस्त
न्मुखरतिशेष?पात्रासादनं तु यजमानदेहे एव॥ अथ यदि साग्निः शवस्य दाहे क्रियमाणे
वृष्ट्या धूपघातेनाग्निनाशे ऽर्द्धदग्धदेहशेषं वृष्टौ शांतयाम ऽर्द्धदग्धारण्यां निर्मथ्या
तदलाभे ऽर्द्धदग्धकाष्ठं निर्मथ्य तदलाभे अश्वत्थादिपवित्रकाष्ठमथनोत्थेनाग्निं पुनर्द
हेत्॥ अथ प्रोषिते तु मृते अग्निहोत्रिणि तदस्थीन्यानीयोक्तविधिनाऽत्रेतया पुनर्दहेत्॥ अ
स्थ्नामप्यलाभे षष्ट्यधिकत्रिशतमितपलाशवृन्तान्युद्धृत्य कृष्णसारचर्मणि पुरुषाका
रेण प्रसारिते तदुपरि पुरुषाकारं प्रसार्य तत्र पलाशवृंतानां चत्वारिंशता शिरः। द
शभिर्ग्रीवा त्रिंशता उरः। विंशत्योदरम्। शतेन भुजद्वयं। दशभिर्हस्तांगुलीः। षड्भिर्वृष
णौ। चतुर्भिः शिश्नं। शतेनोरुद्वयं। त्रिंशता जानुनी जंघे वा। दशभिः पादांगुलीः। परिक

ल्योर्णासूत्रेण सम्यग्बद्धानेनैवमृगचर्मणा संवेष्ट्य ऊर्णासूत्रेणैव बद्ध्वा यवपिष्टजलेन सं
प्रलिप्य मंत्रपूर्वकं पूर्ववत्पात्रे देहेत् । एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥ द्वितीये
ह्नि तु तद[illegible]स्थीनि वंतन्नूपात्रे दग्धानां संचयनं । एवं मृतबुद्ध्या पर्णशरं दग्धे तस्य
देवात्पुनरागमने पुनराधानं कृत्वा आयुष्याख्यामिष्टिं कुर्यात् । पर्णनरदाहानंतरं तु
तदस्थीनां लाभे दग्धकाष्ठानि निर्मथ्याग्निमुत्पाद्य तेनाग्निनास्थीनि पुनर्दहेत् । आहि
ताग्नेस्तु नास्ति संस्कारः ॥ एवं साग्नेः दहनादिनाग्निरग्ने [illegible] मरणादिना दूषणे
न । अथ येषां प्रेतदेहानां रजस्वलादिस्पर्शः स्यात्तं मृन्मये कुंभे पूर्णे जले पंचगव्यं प्रक्षिप्य
तस्नानं शवं तेनोदकेनाभिषिंचेत् । आपोहिष्ठेत्यादिभिरृग्भिरिमं मे गंगे इत्यादिपु
ण्यानि [illegible]ग्निस्त्वस्माभिरभिषिंचेत् । एवं सूतिकां रजस्वलां चापि एकादशे च
तुर्थे वा अहनि प्रायश्चित्तं कृत्वा पंचगव्येन प्रक्षाल्य वाससा संवेष्ट्य उक्तविधिना दहेदिति ॥१०॥

एवंतावत्प्रेतायोद्दिश्य गामप्यालभेरन्निति सूत्रकृता एकादशाहे प्रेतामुद्दिश्य गो
श्चालंभो विहितस्तत्प्रसंगादन्यापि यावंतं च पशावस्तत्कारणमभिधातुमिदमा
रभ्यते पशुश्चेदाल्लाव्यागामग्रेणाग्नीन्परीत्य पलाशशाखान्निहन्नावेघादिस्माल्ले
पशुः क्रियते। तदा तं पशुं गोपशुवर्जं आल्लाव्य स्नापयित्वा नियुञ्ज्यात् गोपशो तु आल्लाव भा
वः पशु नियोजनं यूपे श्रूयते॥ अस्य कुत्रेत्यपेक्षायामाह। अग्रेण पुरस्तात् अग्नी तु चितानप
त्नेगार्हपत्यादीन् आवसथ्यपक्षे एकमग्निं परीत्य प्राग्दक्षिणेन तां स्वां पलाशस्य ब्रह्मवृक्ष
स्य शाखां तां निहन्ति निखनन्ति आसादनानन्तरं । यूपकार्यं तया शाखया॥ परिव्ययेणो
पकारेण नियोजनं प्रोक्षणं पान्यावताकुर्यो घ घान्यत्र। परिव्ययणं त्रिगुणरशनया शा
खायाः। उपाकरणं तृणेन पशोः नियोजनं द्विगुणरशनया अन्तरा शृंगा बद्धस्य पशोः॥ पा
लाशशाखायां बंधनं। प्रोक्षणीभिरद्भिः पशोरासेचनं। एतानि परिव्ययणोपाकारणनिया

जुन ब्राह्मणानिवृत्तां पशुप्रकरणविहितया क्रियया कुर्य्यात् । विदधीत । न केवलमेतां
नैव । अन्यदपि । पशुसंस्कारकं पशुसमंजनपर्यग्निकरणादिकं तच्चैव कुर्य्यात् । परिप
शव्ये हुत्वा तूष्णीमपराः पंच पशुसंज्ञपनं परि उभयतः हूयेते येन परिपशव्ये स्वाहादे
वेभ्यः देवेभ्यः स्वाहेति हुत्वा तूष्णीं मंत्रवर्जं अपराः ४ अन्याः पंच आज्याहुती जुहोति
वपाया उद्धरणं चाभिघारयेत् । पशोर्वपायाः उद्धरणं यथालोके कृत्वा तां वपां अभिघारये
च उद्धृत्येव । देवतां त्वादिशेदुपाकरणनियोजनब्राह्मणेषु । उपाकरणं च नियोज
नं च ब्राह्मणं च उपाकरणनियोजनब्राह्मणानि तेषु देवतां यद्दैवत्यः पशुर्भवति तां देवतां
आदिशेत् । अमुष्मै त्वा उपाकरोमि अमुष्मै त्वा नियुनज्मि । अमुष्मै त्वा जुष्टं प्रोक्षामीत्येवं
स्थालीपाके चैवं । स्थालीपाके चैवं स्थालीपाके चरौ च एवं देवतामादिशेत् । चैवंनु
पाकरणनियोजनाभावात् । प्रोक्षणे अमुष्मै त्वा जुष्टं प्रोक्षामीति तंडुलप्रोक्षणे द

वतादेशः॥ वपां हुत्वावदानान्यवद्यतिसर्वाणि त्रीणि पंचवा॥ वपीयथोक्तविधिना
हुत्वा अवदानानिपशोर्हृदयादीनि अवद्यति॥ छिन्नत्तिकतिसर्वाणि हृदयंजिह्वा
क्रोडं सव्यवाहुं पार्श्वद्वयं यकृत्वृक्कौ गुदमध्यं दक्षिणां श्रोणिंनित्येकादशाअथा
नाथो ति॥ दक्षिणवाहुं गुदत्ततो यासिष्टं श्रोणिंनितित्रीणिसौविसकृतानि॥ यद्यत्री
णि हृदयजिह्वाक्रोडानि॥ अथवापंच हृदयजिह्वाक्रोडसव्यबाहुदक्षिणपार्श्वा
नि॥ अत्रपंचपक्षे ... त्रिवापक्षेवासर्वावदानपक्षेतेभ्यएवस्विष्टकृत्यागः॥ वपां हुत्वा
वदानान्यवद्यतीतिवदता सूत्रकृतापशुरोडाशोनिरस्तः॥ स्थालीपाकमिश्राण्य
वदानानिजुहोति॥ स्थालीपाकेनचरुणामिश्राणिसंयुक्तानिन्यवदानानि हृदया
दीनिजुहोति॥ स्थालीपाकमिश्रणवचनात्सहैव॥ पश्वंगं दक्षिणा॥ पशोः श्रंगं पश्वं
गं दक्षिणा॥ अस्यपशुबंधस्यानद्वेवतेतद्देवतं यजेतस्मैमवमार्गं कुर्यात्तं वद्भूयादिमम

पु ४

२००
२००

नुप्रा पयेति। एतदर्थप श्रूनत्र कृत्यकर्म्माभिहितं। तत्रयस्यार्थस्य आचार्यो दक्ष्या
देवता तद्देवतः स पशुयागः। तस्मिंस्त देवते यागे तद्देवतं अर्घ्यदेवतं बृहस्पत्यादि
कं च यजेत तत्र। अर्घ्यदेवताः। आचार्यस्य बृहस्पतिः। ब्राह्मणस्य चंद्रमाः। उद्गातुः पर्जन्यः। अग्नि
होतुः॥ अश्विनाव ध्वर्योः॥ विवाह्यस्य प्रजापतिः। सर्वार्थं इंद्रः। प्रियस्य मित्रः। स्नातस्य
विश्वेदेवाः। इंद्राग्नी वेति तस्मै च अर्घ्याय आचार्यादये भागं पशोः किंचिदंगं कुर्यात् तातं च
अर्घ्यं आचार्यादिके इममनुप्रापयेति ब्रूयात्॥ नर्ध्यंतरे नावकारयेत्तदा॥ इदानीं येते
देशान गामप्येके ध्नंतीति यदुक्तं॥ तस्य देशविधानार्थमाह। नधन्तरा नधाः अन्त
रद्वीपनावंतवेप कादशाहश्राद्धं तदर्थे नार्वगो पशुं कारयेत्। अनुतिष्ठेत्। को र्थः श्रा
धेतो देशे न गोपशुं एकादशाहेन धंतरे आलभेत न वा आलभेत॥ इति सूत्रार्थः ४॥
अ चालाव कीर्णे प्रायश्चित्तं नधंतरे नार्वकारयेदित्यनेन न वश्राद्धप्रयोजन पशु

राम

२००

रेतः। तत्प्रसंगान्नैमित्तिकं पशुं तरं व्याख्या[illegible] तुमाह॥ अथ यद्दानीयतः पशुं रासभितः
अतस्तत्प्रसंगान्नवकीर्णिनः स्खलितब्रह्मचर्यस्य ब्रह्मचारिण १ प्रायश्चित्तं शुद्धिसंपा
दकं कर्म व्याख्यास्यते। अमावास्यायां चतुष्पथे गर्दभं पशुमालभते। यो ब्रह्मचारी सन्न
वकीर्णो भवति स्त्रीगमनात् सः। अमावास्यायां कस्यांचित् कृष्णपंचदश्यां चतुष्पथे च
त्वारः पंथानः ४ यत्रासौ चतुष्पथस्तस्मिन्चतुष्पथे देशे गर्दभं रासभं पशुं आलभते सं
ज्ञपयति निर्ऋतिं पाकयज्ञेन यजेत। निर्ऋतिं देवतां पाकयज्ञविधानेन पशुपशुना य
जेत्। तत्रावकीर्णिनः अन्योपि हविर्यज्ञरूपः पशुरस्ति तेन हेतुना पाकयज्ञेन यजेते
त्युक्तम्॥ अप्स्ववदानहोमः॥ अप्सु जले अवदानानां होमः। प्रदेपादेवतातो दृशे न भवति
नाग्नौ अवदानग्रहणं तु आघारादीनां लौकिकाग्नावेव होमः। भूमौ पशुपुरोडा
शश्रपणं॥ भूमौ न कपालेषु पशुपुरोडाशस्य श्रपणं पाको भवति॥ शाखापशो पु

कवि

२०१

रोडाशाभावात्त्र इहापूर्व पुरोडाशो धर्मो विधीयते॥ तस्य च संस्कारः आज्येन सह क्रियते
तां छविं परिदधीतोर्ध्वं वालोमिति त्येके संवत्सरं तिष्ठाच यें चरेष्य कर्म परिकीर्त्तयन् तां
अलुब्धस्य गर्दभस्य छविं कार्तिं परिदधीत श्रोणुवीतश्रा छादयीतेत्ति यावत् तापस्के आ
तायिः तां ऊर्ध्वं वालां उरिपुच्छां परिदधीतेति वर्णयन्ति। अपरे तिर्यग्वालां तत्तश्च विक
ल्पाः गर्दभपश्चालंभात् तत्र तच्छविं परिदधानः संवत्सरं यावत् भित्ताच यें चरे
त्। किं कुर्वन् स्वकर्मेदं अवकीर्णोत्वं कयय न् अहं अवकीर्णी भवतिभिक्षां देहीत्येवं
स्वकर्म परिख्यापयन्नकुत इति चेत् निरुक्तं वा एनः कनीयो भवतीति श्रुतेः ४। अथा
परमाद्या जुहोति कामावकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा। का
माभिदुग्धोस्म्यभिदुग्धोस्मि काम कामाय स्वाहेति॥ अथ इदानीं अपरं अन्यत् अ
पश्चित्तं अवकीर्णिनो विधीयते। कामावकीर्णोस्मि कामाभिदुग्धोस्मीत्येताभ्यां

उ

मंत्राभ्यां प्रतिमंत्रमाज्याहुतीर्जुहोति इदं कामायेति त्यागः। आग्नेयं हुत्वा चतुर्दशाज्याहुत्यन्ते।
आग्नं लूनामं तेनिवेशइति न्यायात्। अथोपतिष्ठते सं मा सिंचंतु मरुतः समिंद्रः सं बृ
हस्पतिः। सं मायमग्निः सिंचतु प्रजया च धनेन चेत्येतद्देव प्रायश्चित्तं। अथ होमानन्त
रमुपतिष्ठते ऊर्ध्वोम्नयसंमा सिंचत्विति त्यादिसो त्र मंत्रेण लिंगोक्ता देवताः प्रार्थयते
। संवत्सरमित्य त्रा प्यनुवर्त्तते। अतः प्रतिदिनं पंच वन्हेः संस्कारः पूर्वकं लौकिका
ग्निं स्थापयित्वा आघारादिस्विष्टकृदंतां चतुर्दशाज्याहुतीर्हुत्वा कामावकीर्णोऽस्मि
कामाभिद्रुग्धोऽस्मीत्येताभ्यां प्रतिमंत्रमाज्याहुतिद्वयं हुत्वा सं मा सिंचंत्विति मंत्रेण उप
तिष्ठते संवत्सरे यावत्॥ एतदेव यदुत्सर्गदृश्यपक्षालंभनरूपं आज्याहुतिहोमोत्मार्क
वकीर्णिनः प्रायश्चित्तद्वयं विज्ञेयं॥ इति सूत्रार्थः॥ अथातः सभाप्रवेशनं। अथ
अग्निसाध्यकर्मविधानानंतरं साक्षारण्णानि कर्माणि अनुविक्षात्तव्यानि यतः अतो

२०२

ध

हेतोः सभाप्रवेशनं कर्म व्याख्यायते। स नाम भ्येति सभां गिरसि नादिनी मासि
त्विषिनीमासि तस्यै ते नम इति यदा द्विजः सभां गच्छति तदा सभां अभिआसि मुखो
न एति केन मंत्रेण सभां गिरसीत्यादिना॥ अथ प्रविशति सभा॰ सभा [illegible] यमास
मिति चामे प्रजापते र्दुहितरौ सचेतसौ यो मानविद्या दुपमासतिष्ठन्म चेतनो
भवंतु शा॰ सर्वे जन इति अभिमुखं एत्य सभावमासमित्यादिना मंत्रेण सभां प्रवि
शति। परिषदमेत्य जपेत् परिषदं सभां एत्य प्रविश्य अभिभूरहमागाँ विराड
घ्नतिवा इषा अस्याः परिषद ईशानः सस्वासु दुष्टरो जन इत्यमुं मंत्रं जपेत्। सय
दि मन्येत क्रुद्धो यमिति तमभिमंत्रयते सः सभां प्रविष्टः यदि चेन्मन्येत जो
तोपा दयं सभापतिः क्रुद्ध इति क्रुद्धं अभिलक्षीकृत्य मंत्रयते क्रोधापनयना
यः यात एषा ररा घातनूर्मन्यो क्रोधस्य नाशनीतां देवा ब्रह्मचारिणो विनयंतु

तर

२०२

ध

सुमेधसः॥ द्यौरहं पृथिवी चाहं तौ ते ब्राः धं न यामसि गर्भमखतर्यसहसा वं दि
त्यनेन मंत्रेण॥ अथ यदि मन्येत दुग्धो यमिति तमभिमंत्रयते दुग्धो ह्यो हस्य कर्त्ता।
अयं इति यदि मन्येत तर्हि तां देवा चमास्य आदत्ते हृदय आदधीाय त्रय त्र निहि
ता कृतांत तस्त आ ददे॥ यदहं ब्रवीमि तत्क्रन्यमध रोमतां घस्वेत्यनेन मंत्रेण
एतदेव वशीकरणं॥ तानेवा चमास्य इत्यादिना मंत्रेण अनुमंत्रणं अवशस्य वशी
करणं॥ अथानोरथारोहणं॥ अथ का यौ॑भिगमिबोद्धिं तस्य यानारोहणं ताव
त्र व्याख्यायते॥ युङ्क्ष्वेति संप्रेष्य। युक्ते इति प्रोक्ते साविराडित्येत्यवक्रे अभिमृश
ति रथं संप्रेष्य आज्ञाप्य॥ ततः प्रेषितेन सारथिना युक्ते रथ इति प्रोक्ते सति। सावि
राडित्यनेन मंत्रेण एत्य रथसमीपमागत्य चक्रे रथाङ्गे अभिमृशति। कथं रतयंत
रमसि इत्यनेन दक्षिणं वृहदसीत्यनेनोत्तरं चक्रं वामदेव्यमसीति कुवरी॥

तरमसीति दक्षिणं वृहदसीत्युत्तरं तत्र युङ्क्ते सैति सारथिं इत्युरिः

तत्र

रथारूढं जायां अभिमृशतीत्यनुवर्त्तते॥ हस्तेनोपस्थमभिमृशति। उपस्थं रथस्य
[illegible]नीडं उपवेशनस्थानं। अभिमृशति आलभते हस्तेनेति सर्वत्र मंत्रः अंकौ
न्यंकावभितो रथवध्स्या[illegible]तु वातायमभि संतरंत दूरेहेति [illegible]डिया वाध्यतस्त्रि
स्ते मा ग्रयः पथ्यः पारयंत्विति नमो माणिचरायेत्यनेन मंत्रेण दक्षिणधुर्य्ये
दक्षिणधुरायां युक्तं अश्वं वृषभं वा प्रतोदेन प्रेरयति। गवां मध्ये स्थापयति।
अप्राप्य देवताः प्रत्यवरोहेत्। अप्राप्य अनासा[illegible]घ दूरत एव देवता हरिहर
ब्रह्मादिकाः प्रत्यवरोहेत् रथात् देवतरेन्त्वासं प्रति ब्राह्मणेनानाब्राह्मणा
न संप्रति निकटे प्रत्यवरोहेत्। मध्ये गाः सुरभीः प्राप्य मध्ये प्रत्यवरोहेत्।
अग्निं क्रम्यापि तेन। अभिमुखमेत्यापि तेनापि त्रादीनान्यान्न प्रत्यवरोहेत्।
न स्त्री ब्रह्मचारिणौ सारथी स्यातां। स्त्री नारी ब्रह्मचारी उपकुर्वाणको नै
ष्ठिकश्च स्त्री ब्रह्मचारिणौ सारथी न स्यातां न भवेतां। मुहूर्त्तमतीयाय जा

२०३

राम
२०३
२१५

यदि हरतितरि हरमच्छमेकेमास्विहरंतितरित्ति॥ मुहूर्तेत्र्त्रएं अतीयायअत्येत्तञजपेत अ
हरंतितरित्यादिकंमंत्रं।सयदिदुर्बलरथः स्यात्तमास्थायजपेत्।सःरथी।यदिवेत
अश्वानंगच्छेत् ३ दुर्वलः द्दौणोरथोस्येति दुर्बरथः स्यात्तमवेत्तंरथंआस्यायअ
रूह्यवत्तमाएं मंत्रंजपेत्।अयंवामस्विनारथोमादुर्गेमासुगिरिषइति।स म यदि
न्नम्यत्तंमपुपस्टश्यभूमिवाजपेदेषवामश्विनारथोमादुर्गेमासुगेरिषँदिति॥ र
सरथःयदिन्नम्यात्।चलनेचकुटिलो भवेत्।तदात्तंमंरथध्वजस्तंमं उपस्टश
भूमिंवाउपस्टशजपेत्॥ एषवामश्विनारथइतिमंत्रं तस्यनकाचमार्त्तिर्नेशि
ष्यैर्भवतितस्यरथिनः नकाचनआर्त्तिः पीडानचरिष्टिउपसर्गोभवतियएवं
दुर्वलरथः उद्गीतरथोवाजयति।यात्वाध्वानंविमुच्यरथंयवसोदकेयवदेव

४

२०४

उवाह तस्याः पक्व इति श्रुतेः। पात्वा गत्वा अश्वाद्यानं मार्ग्ये विमुच्य मुक्त्वा कं रथ्यं यवसो-
दकं यवसं च उदकं यवसोदके घासपानीये तेदापयेत्। अश्वेभ्यो यवसोदके दीये-
तामिति मन्त्रात् अत्रेष येत्र कुतः एष उवाह नस्याः अश्वादेः अपक्व त्वमानं इति
श्रुतेः वचनात् एष कः तस्मात् येन वाहनेन धावयेत् तद्विमुच्य ब्रूयात् पापयते
नत सुहितं कुरुतेति ॥ अथातो हस्त्यारोहणम् ॥ अथ रथारोहणानन्तरं हस्त्या-
रोहणं व्याख्यास्यते॥ एत्य हस्तिनमभिमृशति। एत्य हस्तिसमीपमागत्य हस्ति-
नं गजमभिमृशति॥ आलभते। वक्ष्यमाणेन मंत्रेण हस्ति यशसमसि हस्ति व-
र्चसमसीति। अथारोहती इन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्तिमा संपारयेति। अथ
अभिमर्शनानन्तरं आरोहति हस्तिनं इन्द्रस्य त्वेति मंत्रेण। एतेनैवाश्वारोहणं व्या-
ख्यातं। एतेन हस्त्यारोहणेनैव अश्वारोहणं व्याख्यातं कथितं। अतश्च अश्वसमो

२०४

पमेत्यश्वमभिमृशति अश्वपशसमस्य ध्वं[से]मसीति ततो ऽश्वमारोहति इं
द्रस्य त्वा वज्रेणाभितिष्ठामि स्व[स्ति]स्तिमा संपारयेत्यनेन मंत्रेण ॥ उष्ट्रमारोहन्नभिमं
त्रयते त्वाष्ट्रोसि त्वष्टृदेवत्यः स्वस्तिमा संपारयेति । उष्ट्रं क्रमेलकं आरोढुमिच्छन्
अभिमंत्रयते । त्वाष्ट्रोसीत्यादिनामंत्रेण । रासभमारोहन्नभिमंत्रयते शूद्रोसि
शूद्रजन्माग्नेयो वै द्विरेताः स्वस्ति मा संपारयेति । रासभं गर्दभं आरोढुमिच्छन् शू
द्रोसीत्यादिनामंत्रेणाभिमंत्रयते ॥ अग्निमुखः सन् मंत्रं पठति रासभो न्वाश्वतरः प्र
तीयते मंत्रलिंगात् । पंथानमभिमंत्रयते नमो रुद्राय पथिषदे स्वस्ति मा संपारये
ति । अध्वानं गंतुमिच्छन् पंथानं मार्गमित्यभिमंत्रयते ॥ नमो रुद्रायेत्यादिनामंत्रे
ण ।

[illegible] इत्यादिना मंत्रेण । चतुष्प
थम भिमंत्रयते ॥ चतुष्पथं चतुर्मार्गाभिसरणप्रदेशं एत्य नमो रुद्राय चतुष्पथसदे स्वस्ति मा
संपारयेत्यनेन मंत्रेण । नदीमुत्तरिष्यन्नभिमंत्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा संपारयेति । न
दीस्रवन्तीमुत्तरिष्यन् पारं गन्तुमिच्छन् नमो रुद्रायाप्सुषद इत्यादिना मंत्रेणाभिमंत्रयते ॥ नावमा
रोक्ष्यन्नभिमंत्रयते सुनावमिति । नावं तरीमारोढुमिच्छन् सुनावमारुहेयमित्यनया ऋचाऽभिमंत्र
यते । उत्तरिष्यन्नभिमंत्रयते सुत्रामाणमिति । उत्तरिष्यं नुत्तर्तुं प्रत्यवरोढुमिच्छन् सुनावमि
त्यनयर्चाभिमंत्रयते ॥ वनमभिमंत्रयते । नमो रुद्राय वनसदे स्वस्ति मा संपारयेति । वनं का
ननं प्रवेष्टुकामः नमो रुद्राय वनसद इत्यादिना मंत्रेणाभिमंत्रयते । गिरिमभिमंत्रयते । गि
रिं पर्वतं आरोढुकाम १ । नमो रुद्राय गिरिसद इत्यादिना मंत्रेणाभिमंत्रयते । श्मशानम

भिमंत्रयते। श्मशानप्रेतदहनभूमिं कार्यवशात्प्राप्य नमो रुद्राय पितृषद इत्यादिनामं
त्रेणाभिमंत्रयते॥ गोष्ठमभिमंत्रयते॥ गोष्ठं गोवाटं नमो रुद्राय शकृत्पिंडसद इत्यादि
नामंत्रेणाभिमंत्रयते यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदं सर्वमिति श्रुतेः
यत्र येषु च अन्यत्रापि अन्येष्वपि कार्येष्वनुक्तेषु कर्त्तव्येषु पूर्वं नमो रुद्रायेत्येव ब्रूयात्तत्र प
श्चात्तत्कार्यं कुर्यात् कुतः हि यस्माद् इदं सर्वं रुद्र एवेति वेदवचनात्॥ सिचावधूते
भिमंत्रयते। सिचा वस्त्रप्रान्तेन अवधूतः वाताहतः तां सिचामभिमंत्रयते सिचासि नवतो
सि नमस्ते अस्तु मा मा हिंसीरित्यनेन मंत्रेण॥ स्तनयित्नुमभिमंत्रयते स्तनयित्नुं मेघग
र्जितं शिवा नमो नो वर्षाः संतु शिवा नः संतु हेतयः शिवा नस्ताः सन्तु यास्त्वं सृजसि वृत्रह
न्नित्यनेन मंत्रेण शिवां वाश्यमानामभिमंत्रयते शिवां शृगालीं वाश्यमानां शिवो नामासी
त्यादिना मा मा हिंसीरित्यनेन मंत्रेणाभिमंत्रयते शकुनिं वाश्यमानमभिमंत्रयते शकुनिं

पाद्विणां शक्लायमानं कनतं हिरण्यपर्णशकुने देवानां प्रहितंगमयम दूतन
मस्तेऽस्तु किं त्वाका ग्धेणो अवीदित्यनेन मंत्रयते। लदूलण्यं वद्नमभिमंत्रयते। लोदलण्यं व
दूलं शोभनं मंगल्यं आम्रादिकं आसाघमालां शान्तिमर्गापरश्रुमर्गा वातोमा दतु। रानग्रेषि
तादं उः अंकुरास्ते प्ररोहंतु ति वाले त्वाभिवर्षतु। अग्निरेमूलं माहिंसीत्स्वस्तिते स्तु व
नस्पते स्वस्तिमेस्तु वनस्पत इत्येतेन मंत्रेणाभिमंत्रयते। स यदि किंचिल्लभेत तत्प्रतिग
ह्लाति। स द्विजः यदि किं तगोभू हिरण्यादिकं लभेत प्राप्नुयात्। तदा द्यौस्त्वा ददातु पृ
थिवी त्वा प्रतिगृह्णात्विति। स्वीकुरुते। सास्य न ददतः क्षीयते भूयसी च प्रतिगृहीता
भवतीति। सा दक्षिणा एवं विधाय दीयमाना अस्य ददतः दातुः उपयुज्यमानापि न क्षी
यते। न क्रसति।। प्रत्युत एवं प्रतिगृहीता सती भूयसी च उत्तरोत्तरमभिवर्द्धमाना भ
वति।। अथ यय घोदानं लभेत तत्प्रतिगृह्णीयाद्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति। अ

श्री

श्रा ३

थकदाचित्त्वयदि र्दुग्धौदनं मत्वं प्राप्नुयात्तदा तं प्रतिगृह्य दाताय द्यौस्त्वेति मंत्रं पठेत्॥ मंत्रपठ
नात् आदानानंतरं सर्वत्र स्वसन्तानप्राप्तये। तस्य द्विः प्राश्नाति तस्य लब्धस्यौदनस्य द्विः
द्विवारं प्राश्नाति आलिकथां ब्रह्मणा त्वाश्नामिति प्रथमं। ब्रह्मणा त्वाऽश्नामीति द्वितीयं। सय
दिमं यं लभेत तत्प्रतिगृह्णाति द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति स द्विजः। यदि मं
थं दधिमंथं प्राप्नुयात्तदा द्यौस्त्वेत्यनेन मंत्रेण प्रतिगृह्य तस्य मंथस्य त्रिः त्रीन्वारान्प्रा
श्नाति कथां। ब्रह्मणा त्वाश्नामिति प्रथमं। ब्रह्मणा त्वा प्राश्नामिति द्वितीयं। ब्रह्मणा त्वापिबत्वि
तितृतीयं इति त्रिभिर्मंत्रैः॥ अथातो धीत्याधीत्यानिराकरणं प्रतीकमेव विवृणं॥ अथइ
दानीं द्विजानां प्रतिदिनमध्ययनं विहितं अतः कारणात्॥ अधीत्याधीत्य पठित्वा पठित्वा
अनिराकरणं अपरित्यागः कर्त्तव्यः वक्ष्यमाणेन निगदेन तत्र यथा प्रतीकमेव विवृणं
जिह्वा मे मधुयद्वचः। कर्णाभ्यां भूरि शुश्रुवे मा त्वं हार्षीः श्रुतं मयि ब्रह्मणः प्रवचनमसि

ब्रह्मणः प्रतिष्ठा नमसि ब्रह्मकोशोसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे
विश वाचा त्वापिदधामि वाचा त्वापिदधामि स्वरकरणकण्ठोरसदन्त्योष्ठ्यग्रहणधारणो
च्चारणशक्तिर्मयि मवर्त्वध्यायं तु अङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलं यन्मे श्रुतमधी
तं तन्मे मनसि तिष्ठतु तिष्ठत्विति ॥ अस्यार्थः ॥ प्रतीकं मु स्वं त्वं मे मम विवक्षणं साधु श
ब्दोच्चारणसमर्थमस्त्विति सूत्रशेषः ॥ मम जिह्वाय द्वचो वचनं मधु मधुरस वत्तत द्वद
त्विति शेषः एवमभीप्सितः शेषः सर्वत्र पूरणीयः ॥ कर्णाभ्यां भूरि वकुश्रु वे शृणुयाम ॥ अ
हं मयि विषयेय कुतं अधीतं वर्त्तते तत्त्वं मा हासीः मापनय ॥ मयि विषये ब्रह्मणो वे
दस्य प्रवचनं अध्यापनं व्याख्यानं वा अस्मिन् वसि ॥ तथा ब्रह्मणो वेदस्य प्रतिष्ठानं प्र
तिष्ठा स्थितिरित्यर्थः ॥ असि ॥ मयीत्यनुवर्त्तते ॥ ब्रह्मकोशोसि ब्रह्मणः शब्दरूपस्य को
शः गोपनगृहं गुप्तिस्थानं मयि ॥ असि ॥ तथा सनिः संभजनं जीवनं असि तथा ॥ शान्ति

राम

२०७

रसि शांतिःअनिष्टस्य अनिष्टहेतोश्च शमनमसि॥ तथा निराकरणं निरॉति ४ परित्या
ग ४॥ न निराकरणं अनिराकरणं अस्ति॥ ब्रह्म कोशं मा विशमे मम ब्रह्म कोशं हृदयं
विश॥ सर्वेषां वेदानां हृदयमेकायनमिति श्रुतेः ४ वाचा गिरा वृत्वा त्वा त्वां अपिदधा
मि॥ छादयामि त्र्यावृत्तिरादरार्द्यो स्वराः उदात्तानुदात्तस्वरिताः करणानि शब्दोत्प
तेः शब्दाभिव्यक्तेर्वा साधननानि॥ उरः कंठ शिरो जिह्वा मूल दंतनासिकोष्ठताल्व
नि। कंठेन वा कंठ्याः अवर्णं कवर्गो विसर्गो ४॥ उरसि नवा औरसाः ह कार सहिताः
वर्गपंचमांतस्थाः दंतेषु नवा दंत्या लृवर्णं तवर्गसकाराः ४॥ उष्ठेन वा ओष्ठ्याः ४॥
उवर्णं पवर्गो पध्मानीयाः ४॥ स्वराश्च करणानि कंठ्याश्च औरसाश्च दंत्याश्च उष्ठ्याश्च स्व

२०८

रक्षणं कं चोरस दं त्योष्ण्याः तेषां ग्रहणं उपादानं धारणं स्थिरीकरणं उच्चारणं प्र
योग ४। ग्रहणं च धारणं च उच्चारणं च ग्रहणधारणोच्चारणानि तेषु मधिशक्तिर्मेऽव
तु सामर्थ्यमस्तु॥ स्वरादीनां धारणादि सामर्थ्यमप्यस्तु। मे मम अङ्गानि गात्राणि आ
प्यायन्तु वर्द्धन्तां न केवलमङ्गानि किंतु वाक् गीः प्राणः घ्राणेन्द्रियं। सूत्रात्मेति या
वैचक्षु नेयनेन्द्रियं। श्रोत्रं श्रवणेन्द्रियं यशः कीर्त्ति ४॥ बलं शारीरमोज ४ एतान्य
पि बागादीनि आप्यायन्त्विति अनुषंग ४॥ यन्मे मया श्रुतमधीतं तन्मे मनसि तिष्ठतु
यन्मे मम श्रुतं मीमांसादि अधीतं मया आदि। तत्सर्वं मेम नसि तिष्ठतु तिष्ठतु। स्थि
रोऽमवतु अत्र वीप्सा अर्थस्य स्व प्रतिपादनार्थोग्रं यस्मात्रिर्जापनार्थो वा॥

२०८

२५

इत्यग्निहोत्रे हरिहराणां कृतिरियम्॥ ॥ अथ पृष्टोदिविधानम्॥ अथ प
रिशिष्टोक्तं पृष्टोदिविधानं वक्ष्यामि॥ केशान्तादूर्ध्वं समपत्नीकः उत्सन्नाग्निको वा
प्रवासी ब्रह्मचारी वामात्पूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा [illegible] ऋग्निः [illegible]
[illegible]रित्यनयर्चाग्निमाहृत्य पंचभूसंस्कारान्कृत्वा पृष्टोऽग्निः पृथिव्यामित्यनय
र्चाग्नेः स्थापनम्॥ तत्सवितुस्तास्ऽसवितुर्विश्वानि देव सवितरित्येताभिस्तिसृभिः
सावित्रीभिः ४ प्रज्वा[illegible]लनमग्नेः४॥ अथ तस्मिन्नग्नौ सायंप्रातर्होमं पंचमहायज्ञपिं
डपितृयज्ञपक्षाद्याग्रायणानि कुर्यात्पूर्ववद्गृह्योक्तं मणिकाविधानादि सर्वे
मावस्या[illegible]धानादिवत्[illegible]अनुदिते च होमः४॥ एवंकृतेन वयापाको भवति॥
नवयापाकं पचेन्नवयायाकमश्नीयात्रवयापाकमश्नीयादिति पृष्टोदिविधानम्
॥ इत्यग्निहोत्रे हरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोग

संवत्सरे शुभे युक्ते नेत्र मङ्ग रसेंदु मिते

पद्धतौ तृतीयः कांडः समाप्तः॥ शुभमस्तु॥ लेखकपाठकयोः कल्याणमस्तु॥ या
दृशं पुस्तकं दृष्टं तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात्॥ परहस्ते न दातव्यमेवं वदति पुस्त
कम्॥ ॐ श्री शुक्ले तृतीयायां मङ्गलमे थरवेति दिन॥ लिखितं हंसरामेण पुस्तकं
पाठसिद्धये॥ संवत् १८ ७२ समये रत्नालिनामिन्न संवत्सरे लिखितं काश्यामि
दं पुस्तकं हंसरामस्येदं पुस्तकम्॥ ॥ ॥ श्रीः॥ ॥ श्रीः

१२०